भाषा परिच्छेद (कारिकावली) with सिद्धान्त मुक्तावली of विश्वनाथ पञ्चानन भट्टाचार्य - Edited with short Notes by तर्क महादेव शास्त्री (on the directions of सुदर्शनाचार्य) लक्ष्मी वेंकटेश्वर प्रेस edn. - slightly brittle condition.

मुम्बई, 1950 विक्रम era.

25

Bill No. 5/07-08

420

2008-0500

॥ श्रीः ॥

491.2
BHA

# भाषापरिच्छेदः।

## ( कारिकावली )

श्रीविश्वनाथपञ्चाननभट्टाचार्येण

विरचितः।

तेनैव प्रणीतया मुक्तावल्या

संदर्भितः।

सुदर्शनाचार्याधीततर्कमहाबनशास्त्रिणा संशोधितः।

अयं च

श्रीकृष्णदासात्मजगङ्गाविष्णुना

स्वकीये

" लक्ष्मीवेङ्कटेश्वर " मुद्रणालये

अङ्कितः।

कल्याण-(मुंबई)

शकाब्दाः १८१५ संवत् १९५०

अस्य पुनर्मुद्रणाद्यधिकाराः प्रकाशकेन स्वायत्तीकृताः।

1279

SANS
491.2
BHA

DATA ENTERED
Date 01/07/08

KALANIDHI
Rare Book Collection
IGNCA
ACC No.: R-500
Date: 26.3.08

श्रीः ।

# तर्कसंग्रहव्याख्यायाः लघुबोधिनी समाख्यायाः प्रसिद्धिपत्रिका ।

भो भो न्यायशास्त्राऽधिजिगांसवो विदाङ्कुर्वन्त्वत्रभवन्तः जगत्प्रसिद्ध-श्रीवृन्दावननिवासिश्रीरङ्गाचार्यस्वामिप्रणीता लघुबोधिनीसमाख्य तर्क-संग्रहसमेता तर्कसंग्रहव्याख्यासाम्प्रतं "लक्ष्मीवेङ्कटेश्वर" मुद्रणागारे सं-मुद्य प्रकाशिता साच न्यायशास्त्रपरिभाषाजिज्ञासूनामतीवोपकारिणी तस्यां च, इतरव्याख्यापेक्षया अधिका उपयुक्ताश्च सर्वेऽपि विषयाः अल्पशो दर्शिताः, तथा च मन्येऽहमेतदध्ययनेन गादाधरी जागदीशीत्याद्याकरग्र-न्थाध्ययने व्यवसायशालिनोऽवश्यं समुत्सहेरन्, येषां महाशयानां जि-घृक्षाचेत् तैः सूचना कार्येति मे विज्ञप्तिः ।

## रागरत्नाकर-भक्तचिन्तामणि-रागमालासहित।

६ राग ३६ रागनीका पूर्ण गानविद्याका घर है परम मनोहर चुचुहाते रसभरे रोज मर्रहकी गवनई लिखी है नीतिविषयक तथा सामयिक ५०० दोहे सोरठेभी हैं १००२ राग हैं और नाजनियोंके गानेलायक गजलै हैं कीमत २ रु०

गङ्गाविष्णु श्रीकृष्णदास
"लक्ष्मीवेङ्कटेश्वर" छापाखाना
कल्याण-(मुंबई)

श्रीः ।

# प्रस्तावना ।

सन्ति च शतशः कुसुमाञ्जलिचिन्तामणिप्रभृतिनिबन्धाः न्यायशास्त्रेन्धकाः सर्वतः सर्वैः समाद्रिताः समाद्रियमाणाश्च तेषु नानाविधविपुलतर्कशास्त्रनिबन्धेषु विस्तरं निरीक्ष्येदानींतनजनानां प्रतिभामान्द्यं चाकलय्य निखिलशास्त्रपारावारपारीणविश्वनाथपञ्चाननभट्टाचार्येण सकलन्यायशास्त्रप्रतिपादकमहानिबन्धानालोड्यायं मुक्तावलीनामा न्यायशास्त्रप्रकरणग्रन्थो व्यरचि अस्त्यस्मिन्नापादचूडं प्रमेयपदार्थानां मुख्यतया निरूपणं तथासत्ययमेक एव निबन्धो व्यवसायशालिनां प्रायः सकलशास्त्रार्थज्ञानं वितरीतुमलं मन्य एतन्निबन्धाध्ययनमात्रेणैवेतरप्रकरणग्रन्थाध्ययनस्य गतार्थतेति सोऽयं ग्रन्थः आसीत्पुरा "श्रीवेङ्कटेश्वर" मुद्रणालये मुद्रितः तमालोच्याशुद्धत्वादिदोषकलुषिततया दोषज्ञानां चेतो नोदसहताध्येतुमध्यापयितुं चेति तदनुत्साहस्थितिमवसीय रा० ब० साठेत्युपनामक—मोरेश्वरात्मज—सदाशिवशर्माणः यदा कुरुक्षेत्रान्तर्गतफतेपुरलब्धजनि। बिहाणीवास्तव्याचार्य—नारायणदासात्मज-महाबनशास्त्रिणः पुनस्तच्छोधने प्रोदसीसहन् तदैव टिपण्यलंकृतश्चायं ग्रन्थस्तैः शास्त्रिभिः यथामतिविभवं विमृश्य शोधितः सच मया स्वीये "लक्ष्मीवेङ्कटेश्वर" मुद्रणागारे स्थूलसूक्ष्माक्षरैर्मुद्रितः अभ्यर्थये च पाठकगणान् दर्शितग्रन्थस्य परिशोधनं शुद्धिपत्रं च यथामति अचीकरम् परमेतस्मिन्नपि क्वचिदशुद्धिरुपलभ्येत सा पुनर्विचारितप्रतिबन्धेन ज्ञाप्येति ।

विद्वज्जनकृपाभिलाषी—

श्रीकृष्णदासात्मजो गङ्गाविष्णुः,

"लक्ष्मीवेङ्कटेश्वर" मुद्रायन्त्रम् कल्याण—(मुंबई)

श्रीः ।

लक्ष्मीवेङ्कटेश्वराय नमः ।

# कारिकावली ।

नूतनजलधररुचये गोपवधूटीदुकूलचौराय ।
तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय॥१॥
द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।
समवायस्तथाऽभावः पदार्थाः सप्त कीर्तिताः ॥२॥
क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः ।
द्रव्याण्यथ गुणा रूपं रसो गन्धस्ततः परम्॥ ३॥
स्पर्शः संख्यापरिमितिः पृथक्त्वं च ततःपरम् ।
संयोगश्च विभागश्च परत्वं चापरत्वकम् ॥ ४ ॥
बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरुत्वकम् ।
द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ॥५॥
उत्क्षेपणं ततोऽपक्षेपणमाकुञ्चनं तथा ।
प्रसारणं च गमनं कर्माण्येतानि पञ्च च ॥ ६ ॥
भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च ।
तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ॥ ७ ॥
सामान्यं द्विविधं प्रोक्तं परं चापरमेव च ।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥ ८ ॥

परभिन्ना च या जातिः सैवापरतयोच्यते।
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥ ९ ॥
व्यापकत्वात्परापि स्याद्व्याप्यत्वादपरापि च।
अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः॥१०॥
घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः ।
तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः ॥११॥
अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः।
प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च १२
एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते।
सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते ॥ १३ ॥
द्रव्यादयः पञ्च भावा अनेके समवायिनः।
सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणाक्रियः ॥१४॥
सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः।
पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्॥१५॥
अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता।
कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम् ॥१६॥
समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम्।
एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम् १७
यत्समवेतं कार्यं भवति ज्ञेयं तु समवायिजनकं तत्।
तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् १८
येन सह पूर्वभावः कारणमादाय वा यस्य।

अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम् १९
जनकं प्रतिं पूर्ववर्तितामपरिज्ञाय न यस्य गृह्यते।
अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्वभाविनः।
एते पञ्चान्यथा सिद्धा दण्डत्वादिकमादिमम्।
घटादौ दण्डरूपादि द्वितीयमपि दर्शितम् ॥२१॥
तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः।
पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ २२
समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम्।
गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम्२३
अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते।
क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता॥२४॥
क्षितिर्जलं तथा तेजः पवनो मन एव च।
परापरत्वमूर्त्तत्वक्रियावेगाश्रया अमी ॥ २५ ॥
कालखात्मदिशां सर्वगतत्वं परमं महत्।
क्षित्यादिपञ्चभूतानि चत्वारि स्पर्शवन्ति हि २६
द्रव्यारम्भश्चतुर्षु स्यादथाकाशशरीरिणाम्।
अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते ॥२७॥
रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः।
गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः ॥ २८ ॥
आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः।
यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत् ॥२९॥

स्पर्शादयोऽष्टौ वेगाख्यः संस्कारो मरुतो गुणाः ।
स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः ॥ ३० ॥
स्पर्शादयोऽष्टौ वेगश्च द्रवत्वं च गुरुत्वकम् ।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ॥ ३१ ॥
स्नेहहीना गन्धयुक्ताः क्षितावेते चतुर्दश ।
बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा ॥३२॥
धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश ।
संख्यादिपञ्चकं कालदिशोः शब्दश्च ते च खे ३३
संख्यादिपञ्चकं बुद्धिरिच्छा यत्नोऽपि चेश्वरे ।
परापरत्वे संख्याद्याः पञ्च वेगश्च मानसे ॥ ३४ ॥
तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता ।
षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः ॥ ३५ ॥
स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः ।
नित्यानित्या च सा द्वेधा नित्या स्यादणु-
लक्षणा ॥ ३६ ॥
अनित्या तु तदन्या स्यात् सैवावयवयोगिनी ।
सा च त्रिधा भवेद्देहमिन्द्रियं विषयस्तथा ॥३७॥
योनिजादिभवेद्देहमिन्द्रियं घ्राणलक्षणम् ।
विषयो द्व्यणुकादिश्च ब्रह्माण्डान्त उदाहृतः॥३८॥
वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ ।
स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम् ॥ ३९ ॥

नित्यतादि प्रथमवत्किं तु देहमयोनिजम् ।
इन्द्रियं रसनं सिन्धुर्हिमादिर्विषयो मतः ॥ ४० ॥
उष्णः स्पर्शस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम् ।
नैमित्तिकं द्रवत्वं तु नित्यतादि च पूर्ववत् ॥ ४१ ॥
इन्द्रियं नयनं वह्निः स्वर्णादिर्विषयो मतः ।
अपाकजोऽनुष्णाशीतःस्पर्शस्तु पवने मतः ॥४२॥
तिर्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः ।
पूर्ववन्नित्यताद्युक्तं देहव्यापि त्वगिन्द्रियम् ॥४३॥
प्राणादिस्तु महावायुपर्यन्तो विषयो मतः ।
आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः॥४४॥
इन्द्रियं तु भवेच्छ्रोत्रमेकः सन्नप्युपाधितः ।
जन्यानां जनकः कालो जगतामाश्रयो मतः॥४५॥
परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः ।
दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते ॥४६॥
उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक् ।
आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् ४७
शरीरेषु न चैतन्यं मृतेषु व्यभिचारतः ।
तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः॥४८॥
मनोपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत् ।
धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः ॥ ४९ ॥
प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः ।

अहङ्कारस्याश्रयोऽयं मनोमात्रस्य गोचरः ॥५० ॥
विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता ।
अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा ॥५१॥
प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे ।
घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम् ॥ ५२ ॥
घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः ।
तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुतेः॥५३॥

उद्भूतरूपं नयनस्य गोचरो-
द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये ।
विभागसंयोगपरापरत्व-
स्नेहद्रवत्वं परिमाणयुक्तम् ॥ ५४ ॥

क्रिया जातिर्योग्यवृत्तिः समवायश्च तादृशः ।
गृह्णाति चक्षुःसंयोगादालोकोद्भूतरूपयोः ॥५५॥
उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः ।
रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणम् ॥५६॥
द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणम् ।
मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिःकृतिः॥५७॥
ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते ।
महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम् ॥ ५८ ॥
विषयेन्द्रियसंबन्धो व्यापारः सोऽपि षड्विधः ।
द्रव्यग्रहस्तु संयोगात्संयुक्तसमवायतः ॥ ५९ ॥

द्रव्येषु समवेतानां तथा तत्समवायतः ।
तत्रापि समवेतानां शब्दस्य समवायतः ॥ ६० ॥
तद्वृत्तीनां समवेतसमवायेन तु ग्रहः ।
विशेषणतया तद्वदभावानां ग्रहो भवेत् ॥ ६१ ॥
यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते ।
प्रत्यक्षं समवायस्य विशेषणतया भवेत् ॥ ६२ ॥
अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः ।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥ ६३ ॥
आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते ।
तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते ॥ ६४ ॥
विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ।
योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ॥ ६५ ॥
युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः ।
व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् ॥६६॥
अनुमायां ज्ञायमानं लिङ्गं तु करणं नहि ।
अनागतादिलिङ्गेन न स्यादनुमितिस्तदा ॥ ६७ ॥
व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते ।
व्याप्तिः साध्यवदन्यस्मिन्न संबन्ध उदाहृतः ॥६८॥
अथवा हेतुमन्निष्ठविरहाप्रतियोगिना ।
साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते ॥ ६९ ॥
सिषाधयिषया शून्या सिद्धिर्यत्र न तिष्ठति ।

स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत् ॥ ७० ॥
अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः।
कालात्ययापदिष्टश्च हेत्वाभासाश्च पञ्चधा ॥७१॥
आद्यः साधारणस्तु स्यादसाधारणकोपरः ।
तथैवानुपसंहारी त्रिधाऽनैकान्तिको भवेत् ॥७२॥
यः सपक्षे विपक्षे च भवेत्साधारणस्तु सः।
यस्तूभयस्माद्व्यावृत्तः सत्वसाधारणो मतः ॥७३॥
तथैवानुपसंहारी केवलान्वयिपक्षकः।
यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः ॥७४॥
आश्रयासिद्धिराद्या स्यात् स्वरूपासिद्धिरप्यथ ।
व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा॥७५॥
पक्षासिद्धिर्यत्र पक्षो भवेन्मणिमयो गिरिः।
ह्रदो द्रव्यं धूमवत्त्वादत्रासिद्धिरथापरा ॥ ७६ ॥
व्याप्यत्वासिद्धिरपरा नीलधूमादिकं भवेत्।
विरुद्धयोः परामर्शे हेत्वोः सत्प्रतिपक्षता ॥ ७७ ॥
साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः।
उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते ॥ ७८ ॥
ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम्।
सादृश्यधीर्गवादीनां या स्यात्सा करणं मतम् ७९
वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते ।
गवयादिपदानां तु शक्तिधीरुपमा फलम् ॥ ८० ॥

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ८१
लक्षणा शक्यसंबन्धस्तात्पर्यानुपपत्तितः ।
आसत्तिर्योग्यताकाङ्क्षा तात्पर्यज्ञानमिष्यते॥८२॥
कारणं सन्निधानं तु पदस्यासत्तिरुच्यते ।
पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता ॥ ८३ ॥
यत्पदेन विना यस्याननुभावकता भवेत् ।
आकाङ्क्षा वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम् ८४
साक्षात्कारे सुखादीनां करणं मन उच्यते ।
अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहोच्यते॥८५॥
अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रियागुणाः।
रूपं रसः स्पर्शगन्धौ परत्वमपरत्वकम् ॥ ८६ ॥
द्रवत्वस्नेहवेगाश्च मता मूर्तगुणा अमी ।
धर्माधर्मौ भावना च शब्दो बुद्ध्यादयोपि च ८७
एतेऽमूर्तगुणाः सर्वे विद्वद्भिः परिकीर्तिताः ।
संख्यादयो विभागान्ता उभयेषां गुणा मताः ८८
संयोगश्च विभागश्च संख्या द्वित्वादिकास्तथा ।
द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः ॥ ८९ ॥
अतः शेषगुणाः सर्वे मता एकैकवृत्तयः ।
बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः॥
अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः।

संख्यादिरपरत्वान्तो द्रवोऽसांसिद्धिकस्तथा॥९१॥
गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्तिताः ।
संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च ॥ ९२ ॥
एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दकाः ।
बाह्यैकैकेन्द्रियग्राह्या गुरुत्वादृष्टभावनाः ॥ ९३ ॥
अतीन्द्रिया विभूनां तु ये स्युर्वैशेषिका गुणाः ।
अकारणगुणोत्पन्ना एते तु परिकीर्तिताः ॥ ९४ ॥
अपाकजास्तु स्पर्शान्ता द्रवत्वं च तथाविधम् ।
स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकम् ॥ ९५ ॥
स्थितिस्थापक इत्येते स्युः कारणगुणोद्भवाः ।
संयोगश्च विभागश्च वेगश्चैते तु कर्मजाः ॥ ९६ ॥
स्पर्शान्तपरिमाणैकपृथक्त्वस्नेहशब्दके ।
भवेदसमवायित्वमथ वैशेषिके गुणे ॥ ९७ ॥
आत्मनः स्यान्निमित्तत्वमुष्णस्पर्शगुरुत्वयोः ।
वेगेपि च द्रवत्वे च संयोगादिद्वये तथा ॥ ९८ ॥
द्विधैव कारणत्वं स्यादथ प्रादेशिको भवेत् ।
वैशेषिको विभुगुणः संयोगादिद्वयं तथा ॥ ९९ ॥
चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलम्भकम् ।
चक्षुषः सहकारि स्याच्छुक्लादिकमनेकधा॥१००॥
जलादिपरमाणौ तन्नित्यमन्यत्सहेतुकम् ।
रसस्तु रसनाग्राह्यो मधुरादिरनेकधा ॥ १०१ ॥

सहकारि रसज्ञाया नित्यतादि च पूर्ववत्।
घ्राणग्राह्यो भवेद्गन्धो घ्राणस्यैवोपकारकः॥१०२॥
सौरभश्चासौरभश्च स द्वेधा परिकीर्तितः।
स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः १०३
अनुष्णाशीतशीतोष्णभेदात्स त्रिविधो मतः।
काठिन्यादि क्षितावेव नित्यतादि च पूर्ववत् १०४
एतेषां पाकजत्वं तु क्षितौ नान्यत्र कुत्रचित्।
तत्रापि परमाणौ स्यात्पाको वैशेषिके नये १०५
नैयायिकानान्तु नये द्व्यणुकादावपीष्यते।
गणनव्यवहारे तु हेतुः संख्याभिधीयते ॥१०६॥
नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते।
द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजा मताः १०७
अनेकाश्रयपर्याप्ता एते तु परिकीर्तिताः।
अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः॥१०८॥
अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरिष्यते।
परिमाणं भवेन्मानव्यवहारस्य कारणम् ॥१०९॥
अणु दीर्घं महद्ध्रस्वमिति तद्भेद ईरितः। अनित्ये
तदनित्यं स्यान्नित्ये नित्यमुदाहृतम्॥११०॥
संख्यातः परिमाणाच्च प्रचयादपि जायते। अनित्यं
द्व्यणुकादौ तु संख्याजन्यमुदाहृतम् ॥१११॥
परिमाणं घटादौ तु परिमाणजमुच्यते।

प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते ११२
परिमाणन्तूलकादौ नाशस्त्वाश्रयनाशतः।
संख्यावत्तु पृथक्त्वं स्यात्पृथक्प्रत्ययकारणम्॥
अन्योन्याभावतो नास्य चरितार्थत्वमिष्यते।
अस्मात्पृथगिदन्नेति प्रतीतिर्हि विलक्षणा॥११४॥
अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः।
कीर्तितस्त्रिविधस्त्वेष आद्योन्यतरकर्मजः॥११५॥
तथोभयस्पन्दजन्यो भवेत्संयोगजोपरः।
आदिमः श्येनशैलादिसंयोगः परिकीर्तितः ११६
मेषयोः सन्निपातो यः स द्वितीय उदाहृतः।
कपालतरुसंयोगात्संयोगस्तरुकुम्भयोः॥ ११७॥
तृतीयः स्यात्कर्मजोऽपि द्विधैव परिकीर्तितः।
अभिघातो नोदनं च शब्दहेतुरिहादिमः॥११८॥
शब्दाहेतुर्द्वितीयः स्याद्विभागोपि त्रिधा भवेत्।
एककर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवोऽपरः॥ ११९॥
विभागजस्तृतीयः स्यात्तृतीयोपि द्विधा भवेत्।
हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः॥ १२०॥
परत्वं चापरत्वं च द्विविधं परिकीर्तितम्।
दैशिकं कालिकं चापि मूर्त एव तु दैशिकम् १२१
परत्वं मूर्तसंयोगभूयस्त्वज्ञानतो भवेत्।
अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम्॥१२२॥

तयोरसमवायी तु दिक्संयोगस्तदाश्रये ।
दिवाकरपरिस्पन्दभूयस्त्वज्ञानतो भवेत् ॥ १२३ ॥
परत्वमपरत्वन्तु तदीयाल्पत्वबुद्धितः ।
अत्र त्वसमवायी स्यात् संयोगः कालपिण्डयोः ॥
अपेक्षाबुद्धिनाशेन नाशस्तेषां निरूपितः ।
बुद्धेः प्रपञ्चः प्रागेव प्रायशो विनिरूपितः ॥ १२५ ॥
अथावशिष्टोप्यपरः प्रकारः परिदर्श्यते ।
अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते॥१२६॥
तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता ।
तत्प्रपञ्चो विपर्यासः संशयोपि प्रकीर्तितः ॥१२७॥
आद्यो देहेष्वात्मबुद्धिः शङ्खादौ पीततामतिः ।
भवेन्निश्चयरूपा या संशयोथ प्रदर्श्यते ॥ १२८ ॥
किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः ।
तदभावाप्रकाराधीस्तत्प्रकारा तु निश्चयः॥१२९॥
स संशयो मतिर्या स्यादेकत्राभावभावयोः ॥
साधारणादिधर्मस्य ज्ञानं संशयकारणम् ॥ १३० ॥
दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् ।
पित्तदूरत्वादिरूपो दोषो नानाविधो मतः ॥१३१॥
प्रत्यक्षे तु विशेष्येण विशेषणवता समम् ।
सन्निकर्षो गुणस्तु स्यादथ त्वनुमितौ पुनः॥१३२॥
पक्षे साध्यविशिष्टे तु परामर्शो गुणो भवेत् ।

शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः ॥१३३॥
शाब्दबोधे योग्यतायास्तात्पर्यस्याथवा प्रमा।
गुणः स्याद्भ्रमभिन्नं तु ज्ञानमत्रोच्यते प्रमा ॥१३४॥
अथवा तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकम्।
तत्प्रमा न प्रमा नापि भ्रमः स्यान्निर्विकल्पकम् ॥
प्रकारतादिशून्यं हि संबन्धानवगाहि तत्।
प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः ॥१३६॥
व्यभिचारस्याग्रहोऽथ सहचारग्रहस्तथा।
हेतुर्व्याप्तिग्रहे तर्कः क्वचिच्छङ्कानिवर्तकः ॥१३७॥
साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा।
स उपाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्श्यते ॥१३८॥
सर्वे साध्यसमानाधिकरणाः स्युरुपाधयः।
हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता १३९
व्यभिचारस्यानुमानमुपाधेस्तु प्रयोजनम्।
शब्दोपमानयोर्नैव पृथक् प्रामाण्यमिष्यते॥१४०॥
अनुमानगतार्थत्वादिति वैशेषिकं मतम्।
तन्न सम्यग्विना व्याप्तिबोधं शब्दादिबोधतः १४१
त्रैविध्यमनुमानस्य केवलान्वयिभेदतः।
द्वैविध्यन्तु भवेद्व्याप्तिरन्वयव्यतिरेकतः॥ १४२॥
अन्वयव्याप्तिरुक्तैव व्यतिरेकादिहोच्यते।
साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेत् १४३

अर्थापत्तिस्तु नैवेह प्रमाणान्तरमिष्यते ।
व्यतिरेकव्याप्तिबुद्धया चरितार्था हि सा यतः १४४
सुखं हि जगतामेवं काम्यं धर्मेण जायते ।
अधर्मजन्यं दुःखं स्यात्प्रतिकूलं सचेतसाम् १४५
निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते ।
इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि॥१४६॥
चिकीर्षाकृतिसाध्यत्वप्रकारेच्छा तु या भवेत् ।
तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत् ॥ १४७॥
बलवद्विष्टहेतुत्वमतिः स्यात्प्रतिबन्धिका ।
तदहेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते ॥ १४८ ॥
द्विष्टसाधनताबुद्धिर्भवेद्द्वेषस्य कारणम् ।
प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम् ॥१४९॥
एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिकीर्तितम् ।
चिकीर्षाकृतिसाध्येष्टसाधनत्वमतिस्तथा ॥१५०॥
उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् ।
निवृत्तिस्तु भवेद्द्वेषाद्विष्टसाधनता धियः ॥१५१॥
यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत् ।
शरीरे प्राणसञ्चारे कारणं तत्प्रकीर्तितम् ॥ १५२॥
अतीन्द्रियं गुरुत्वं स्यात्पृथिव्यादिद्वये तु तत् ।
अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् १५३
तदेवासमवायि स्यात्पतनाख्ये तु कर्मणि ।

सांसिद्धिकं द्रवत्वं स्यान्नैमित्तिकमथापरम् १५४
सांसिद्धिकं तु सलिले द्वितीयं क्षितितेजसोः।
परमाणौ जले नित्यमन्यत्रानित्यमिष्यते॥१५५॥
नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु।
द्रवत्वं स्पन्दने हेतुर्निमित्तं संग्रहे तु तत् ॥१५६॥
स्नेहो जले स नित्योऽणावनित्योऽवयविन्यसौ।
तैलान्तरे तत्प्रकर्षाद्दहनस्यानुकूलता ॥ १५७ ॥
संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने।
मूर्तमात्रे तु वेगः स्यात्कर्मजो वेगजः क्वचित् १५८
स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि।
अतीन्द्रियोऽसौ विज्ञेयः क्वचित्स्पन्देपि कारणम्॥
भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः।
उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् १६०
स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते।
धर्माधर्मावदृष्टं स्याद्धर्मः स्वर्गादिसाधनम् १६१
गङ्गास्नानादियागादिव्यापारः स तु कीर्तितः।
कर्मनाशाजलस्पर्शादिना नाश्यस्त्वसौ मतः१६२
अधर्मो नरकादीनां हेतुर्निन्दितकर्मजः।
प्रायश्चित्तादिनाश्योसौ जीववृत्ती त्विमौ गुणौ१६३
इमौ तु वासनाजन्यौ ज्ञानादपि विनश्यतः।
शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः१६४

कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः।
सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते ॥१६५॥
वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता।
कदम्बकोरकन्यायादुत्पत्तिः कस्यचिन्मते ॥१६६॥
उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता।
सोऽयं क इति बुद्धिस्तु साजात्यमवलम्बते ॥१६७॥
तदेवौषधमित्यादौ सजातीयेपि दर्शनात्।
तस्मादनित्या एवेति वर्णाः सर्वे मतं हि नः ॥१६८॥

---

आधआनेका टिकट आनेसे विनादाम बडासूचीपत्र रवाना कियाजाताहै.

पुस्तकें मिलनेका ठिकाना-

गंगाविष्णु श्रीकृष्णदास,

"लक्ष्मीवेङ्कटेश्वर" छापाखाना

कल्याण-(बंबई)

श्रीः ।

# तर्कसंग्रहव्याख्यायाः
# लघुबोधिनी
## समाख्यायाः
# प्रसिद्धिपत्रिका ।

भो भो न्यायशास्त्राऽधिजिगांसवो विदाङ्कुर्वन्त्वत्रभवन्तः जगत्प्रसिद्ध-श्रीवृन्दावननिवासिश्रीरङ्गाचार्यस्वामिप्रणीता लघुबोधिनीसमाख्या तर्कसं-ग्रहसमेता तर्कसंग्रहव्याख्या साम्प्रतं " लक्ष्मीवेङ्कटेश्वर " मुद्रणागारे सं-मुद्य प्रकाशिता साच, न्यायशास्त्रपरिभाषाजिज्ञासूनामतीवोपकारिणी तस्यां च, इतरव्याख्यापेक्षया अधिका उपयुक्ताश्च सर्वेऽपि विषयाः अल्पशो दर्शिताः, तथा च मन्येऽहमेतदध्ययनेन गादाधरी–जागदीशीत्याद्याकरग्र-न्थाध्ययने व्यवसायशालिनोऽवश्यं समुत्सहेरन्, येषां महाशयानां जिघृक्षा चेत् तैः सूचना कार्येति मे विज्ञप्तिः. मूल्यम् ६ आ०

# रागरत्नाकर–भक्तचिन्तामणि–
# रागमालासहित ।

६ राग ३६ रागनीका पूर्ण गानविद्याका घर है परम मनोहर चुचुहाते रसभरे रोज मर्रहकी गवनई लिखी है नीतिविषयक तथा सामयिक ५०० दोहे सोरठेभी हैं १००२ राग हैं और नाजनियोंके गानेलायक गजलै हैं कीमत २ रु०

## मनुस्मृतिः ।

सान्वय अत्युत्तम सरल हिंदीभाषाटीकासहित छपकर विक्रयार्थ प्रस्तुत है ऐसा उत्तमग्रंथ अद्यावधि पर्यंत कहीं नहीं छपाथा भारतवर्षके राजा महाराजा तथा विप्रगण इसीके अनुसार राजनीति और प्रजापालन धर्मशासन करतेहैं यहाँतक कि, श्रीमन्महाराज अंग्रेजबहादूरभी इसका अवलम्ब लेतेहैं यह ग्रंथ परमसुंदर मोटे टैप् और जाडे विलायती कागजपर छपाहै की० २॥ रु०

## शाक्तप्रमोद ।

दशमहाविद्याओंका और पञ्चदेवोंका पञ्चाङ्ग ।

सम्पूर्ण भारतनिवासि द्विजोत्तमोंपर विदित हो कि, यह अलभ्य क्लिष्टतासे प्राप्त परमगुप्त अत्युत्तम नवीन ग्रंथ हमारे यहां छपा है; इसमें आदिशक्ति जगन्माताके दशोंस्वरूप अर्थात् काली, तारा, त्रिपुरसुंदरी, भुवनेश्वरी, छिन्नमस्ता, त्रिपुरभैरवी, धूमावती, बगलामुखी, मातंगी, कमलात्मिका, तथा पंच देवता दुर्गा शिव, गणेश, सूर्य, विष्णु और वेदोक्त, शास्त्रोक्त, मंत्रोक्त, तंत्रोक्त, विस्तारपूर्वक लिखीहै; जिनके चित्र ( तस्बीरें ) भी फोटूग्राफानुसार यथावत् खींचीगईहैं. इस ग्रंथकामूल्य पञ्च ( ५ ) मुद्रा.

## श्रीमद्भागवतम् ।

### ( श्रीमद्वीरराघवीयटीकासमन्वितम् )

संप्रति श्रीमद्भागवतं महापुराणं बहुविधटीकासमन्वितं सर्वत्र सुप्रसिद्धं विद्यते तथापि सर्वटीकानां मध्ये श्रीवीरराघवीया टीकाऽत्यन्तं सरला सुबोधा नवति ( ९० ) सहस्रग्रन्थात्मिका सविस्तरा सुप्रसिद्धा श्रीवैष्णवजनादरणीयाऽतिप्रशस्तास्ति । तया वीरराघवीयया टीकया समन्वितमेतत्पुस्तकं सर्वसज्जनविद्वज्जनसंप्रदायिजनपौराणिकजनानां स्वत्यन्तोपयोगित्वात्—अस्माभिः तैलङ्गद्राविडादिलिपिलिखितपुस्तकान्युपलभ्य तिरुपतिनगरस्थवेदमार्गप्रतिष्ठापकाचार्योभयवेदान्ताचार्यश्रीमदनन्तपूरुषसिंहासनासीनातिरुपतिश्रीरङ्गाचार्यद्वारा शोधयित्वा स्वकीये "लक्ष्मीवेङ्कटेश्वर" मुद्रणालये स्थूलस्थूलैरतिविशदवर्णविन्यासैरायसाक्षरैः पुष्टघनचिक्कणपत्रेषु मुद्रयितुं समारभ्यते । तत्रच प्रथमं श्रीमद्दशमस्कन्धो मुद्रयितुमुपक्रम्यते ।

येषां येषामेतत्समग्रग्रन्थसंग्रहणेच्छास्ति । ते स्वस्वनामग्रामस्थलप्रत्यभिज्ञा एकं पत्रं प्रेषयन्तु । यथा यथा पुस्तकं मुद्रयिष्यते तथातथा प्रेषयिष्यामः प्रतिस्कन्धं मुद्रिते सति तावदेव ग्रन्थं प्रेषयित्वा तावदेव वा मूल्यं तत्तत्समये ग्रहीष्यामः । येषां तु प्रथमम् एतद्ग्रन्थजिघृक्षा स्यात् येच वा प्रतिस्कन्धं संगृह्णीयुः—तेऽतीव स्वल्पमूल्येन समग्रं ग्रन्थं लभेरन् । पश्चाद् मूल्यं वर्द्धयिष्यते । अतस्त्वर्यतामेतदलभ्यस्वल्पमूल्य–श्रीवीरराघवीयटीकासमन्वित–श्रीमद्भागवतमहापुराणग्रन्थसंग्रहणेच्छयेति शम् ।

## व्रजविलास ।

व्रजमण्डलसे प्राप्त यह ग्रंथ अत्यंत शुद्धतापूर्वक बडे २ अक्षरोंमें मोटे कागजपर छपाहै कठिन शब्दोंकी टीप्पणीभी है, कीमत ५ रु०

# हारीतसंहिता-(वैद्यकग्रन्थ)

## (मूल संस्कृत और भाषाटीकासहित)

समस्त महाशयोंको विदित करनेमें जाताहै कि,-"हारीतसंहिता" नामक वैद्यक ग्रन्थ सरल हिन्दीभाषानुवाद बनवाकर और शास्त्रियों-द्वारा शुद्ध करवाकर सुन्दर मध्यम अक्षरोंमें छपाकर विक्रयार्थ प्रस्तुत है,-लीजिये तो यह ग्रन्थ बहुतही उपकारक है और स्वल्पहोकरभी सर्ववैद्योंको सर्वप्रकारके औषधज्ञान तथा रोगियोंकी चिकित्सा करनेमें अप्रतिम सहाय होगा इस्में कुछ संदेह नहींहै इसलिये वैद्य महाशयजी! अभी ज्यादा लिखना बाहुल्यमात्रहै, तथापि इस अपूर्व ग्रन्थको अवश्य संग्रहमें रखकर रोगनिवारण एवं धनार्जनपूर्वक निर्मलकीर्तिको प्राप्त करिये इस ग्रन्थका मूल्य केवल ३ रु. रक्खाहै

## शार्ङ्गधरसंहिता (भाषाटीकासह)

यह टीका आढमल्ली और गूढार्थप्रकाशिका जो इस्की संस्कृतटीका है उनके अनुसार भाषाटीका करीगई है यद्यपि इसग्रंथकी टीका कई भिषग्वरोंने कीहै परन्तु इस रीतिसे विस्तारपूर्वक किसीने नहींकीहै तिसपरभी मूल्य केवल (तीन मुद्रा) ३ रु० रक्खाहै विलायतीकपडेकी जिल्दसहित ये नया छपाहै। पांच पुस्तक लेनेवालेकु महसूल माफ है.

पुस्तकें मिलनेका ठिकाना-

गंगाविष्णु श्रीकृष्णदास,

"लक्ष्मीवेङ्कटेश्वर" छापाखाना

कल्याण-मुंबई.

श्रीः ।

श्रीगणेशाय नमः ।

# भाषापरिच्छेदः ।

## मुक्तावलीव्याख्योपेतः ।

चूडामणीकृतविधुर्वलयीकृतवासुकिः ।
भवो भवतु भव्याय लीलाताण्डवपण्डितः ॥
निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरन्तनोक्तिभिः ।
विशदीकरवाणि कौतुकान्ननु राजीवदयावशंवदः ॥
सद्द्रव्या गुणगुम्फिता सुकृतिनां सत्कर्मणां ज्ञापिका
सत्सामान्यविशेषनित्यमिलिता भावप्रकर्षोज्ज्वला ।
विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली
विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम् ॥

विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति ।

**नूतनजलधररुचये गोपवधूटीदुकूलचौराय ।**
**तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय ॥ १ ॥**

ननु मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणम् । विनापि मङ्गलं नास्तिकादीनां ग्रन्थे निर्विघ्नपरिसमाप्तिदर्शनादिति चेन्न । अविगीतशिष्टाचारविषयत्वेन मङ्गलस्य सफलत्वे सिद्धे तत्र फलजिज्ञासायां सम्भवति दृष्टफलकत्वेऽदृष्टफलकल्पनाया अन्याय्यत्वात् । उपस्थितत्वाच्च समाप्तिरेव फलं कल्प्यते । इत्थं च यत्र मङ्गलं न दृश्यते तत्रापि जन्मान्तरीयं तत् कल्प्यते यत्र च सत्यपि मङ्गले समाप्तिर्न दृश्यते तत्र बलवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्यम् प्रचुरस्यास्यैव बलवत्तरविघ्ननिवारणे कारणत्वम् विघ्नध्वंसस्तु

मङ्गलस्य द्वारमित्याहुः प्राञ्चः । नव्यास्तु मङ्गलस्य विघ्नध्वंस एव फलम् । समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापात् । न चैवं स्वतःसिद्धविघ्नविरहवता कृतस्य मङ्गलस्य निष्फलत्वापत्तिरिति वाच्यम् इष्टापत्तेः । विघ्नशङ्कया तदाचरणात् । तथैव शिष्टाचारात् । न च तस्य निष्फलत्वे तद्बोधकवेदाःप्रामाण्यापत्तिरिति वाच्यं सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात् । अतएव पापभ्रमेण कृतस्य प्रायश्चित्तस्य निष्फलत्वेऽपि न तद्बोधकवेदाःप्रामाण्यम् । मङ्गलं च विघ्नध्वंसविशेषे कारणम् विघ्नध्वंसविशेषे च विनायकस्तवपाठादिः । क्वचिच्च विघ्नात्यन्ताभाव एव समाप्तिसाधनम् प्रतिबन्धकसंसर्गाभावस्यैव कार्यजनकत्वात् । इत्थं च नास्तिकादीनां ग्रन्थेषु जन्मान्तरीयमङ्गलजन्यदुरितध्वंसः स्वतःसिद्धविघ्नात्यन्ताभावो वास्तीति न व्यभिचार इत्याहुः । संसारमहीरुहस्य बीजाय इति । संसार एव महीरुहो वृक्षस्तस्य बीजाय निमित्तकारणायेत्यर्थः । एतेन ईश्वरे प्रमाणं दर्शितं भवति तथाहि यथा घटादिकार्यं कर्तृजन्यं तथा क्षित्यङ्कुरादिकमपि न च तत्कर्तृत्वमस्मदादीनां सम्भवतीत्यतस्तत्कर्तृत्वेनेश्वरसिद्धिः । न च शरीराजन्यत्वेन कर्त्रजन्यत्वसाधकेन सत्प्रतिपक्ष इति वाच्यम् अप्रयोजकत्वात् । मम तु कर्तृत्वेन कार्यत्वेन कार्यकारणभाव एव अनुकूलस्तर्कः । " द्यावाभूमी जनयन् देव एक आस्ते विश्वस्य कर्ता भुवनस्य गोप्ता " इत्यादय आगमा अप्यनुसन्धेयाः ।। १ ।।

पदार्थान् विभजते ।

**द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।**
**समवायस्तथाऽभावः पदार्थाः सप्त कीर्तिताः ॥२॥**

सप्तमस्याभावत्वकथनादेव षण्णां भावत्वं प्राप्तं तेन पृथगुपन्यासो न कृतः एते च पदार्थाः वैशेषिकप्रसिद्धाः नैयायिकानामप्यविरुद्धाः प्रतिपादितं चैवमेव भाष्ये अत एव उपमानचिन्तामणौ सप्तपदार्थभिन्नतया

शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वमाशङ्कितम् । ननु कथमेत एव पदार्थाः शक्तिसादृश्यादीनामप्यतिरिक्तपदार्थत्वात् तथाहि मण्यादिसमवहितेन वह्निना दाहो न जन्यते तच्छून्येन तु जन्यते, तत्र मण्यादिना वह्नौ दाहानुकूला शक्तिर्नाश्यते उत्तेजकेन मण्याद्यपसारणेन च जन्यत इति कल्प्यते एवं सादृश्यमप्यतिरिक्तः पदार्थः तद्धि न षट्पदार्थेष्वन्तर्भवति सामान्येऽपि सत्त्वात् यथा गोत्वं नित्यं तथाश्वत्वमपि नित्यमिति सादृश्यप्रतीतेः । नाप्यभावे सत्त्वेन प्रतीयमानत्वादिति चेन्न मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रति स्वातन्त्र्येण मण्याद्यभावादेरेव वा हेतुत्वं कल्प्यते । अनेनैव सामञ्जस्ये अनन्तशक्तितत्प्रागभावध्वंसकल्पनानौचित्यात् । न चोत्तेजके सति प्रतिबन्धकसद्भावेऽपि कथं दाह इति वाच्यम् उत्तेजकाभावविशिष्टमण्याद्यभावस्य कारणत्वात् । सादृश्यमपि न पदार्थान्तरम् किं तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् यथा चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्त्वं मुखे चन्द्रसादृश्यमिति ॥२॥

Indira Gandhi National Centre for the Arts

द्रव्याणि विभजते ।

## क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः । द्रव्याणि-

क्षितिः--पृथिवी, आपो--जलानि, तेजो--वह्निः, मरुत्--वायुः,-व्योम-आकाशः, कालः--समयः, दिक् आशा, देही-आत्मा, मनः, एतानि नव द्रव्याणि इत्यर्थः । ननु द्रव्यत्वजातौ किं मानम् ? नहि तत्र प्रत्यक्षं प्रमाणम् घृतजतुप्रभृतिषु द्रव्यत्वाग्रहादिति चेन्न । कार्यसमवायिकारणतावच्छेदकतया, संयोगस्य विभागस्य वा समवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धेरिति । ननु दशमं द्रव्यं तमः कुतो नोक्तम् तद्धि प्रत्यक्षेण गृह्यते तस्य च रूपवत्त्वात् कर्मवत्त्वाच्च द्रव्यत्वम् । तच्च गन्धशून्यत्वान्न पृथिवी नीलरूपवत्त्वाच्च न जलादिकम् । तत्प्रत्यक्षे चालोकनिरपेक्षं चक्षुः कारणमिति चेन्न आवश्यकतेजोऽभावेनैवोपपत्तौ द्रव्यान्तरकल्पनाया अन्याय्यत्वा-

त् । रूपवत्त्वप्रतीतिस्तु भ्रमरूपा, कर्मवत्ताप्रतीतिरप्यालोकापसारणौपाधिकी भ्रान्तिरेव । तमसोऽतिरिक्तत्वेऽनन्तावयवादिकल्पनागौरवं स्यात् । सुवर्णस्य यथा तेजस्यन्तर्भावस्तथा अग्रे वक्ष्यते ॥

गुणान् विभजते ।

अथ गुणा रूपं रसो गन्धस्ततः परम् ॥ ३ ॥
स्पर्शः संख्यापरिमितिः पृथक्त्वं च ततः परम् ।
संयोगश्च विभागश्च परत्वं चापरत्वकम् ॥ ४ ॥
बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरुत्वकम् ।
द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ॥ ५ ॥

एते गुणाश्चतुर्विंशतिसंख्याकाः कणादेन कण्ठतश्चशब्देन च दर्शिताः । तत्र गुणत्वादिकजातिसिद्धिरग्रे वक्ष्यते ॥३॥४॥५॥

कर्माणि विभजते ।

उत्क्षेपणं ततोऽपक्षेपणमाकुञ्चनं तथा ।
प्रसारणं च गमनं कर्माण्येतानि पञ्च च ॥ ६ ॥

कर्मत्वजातिस्तु प्रत्यक्षसिद्धा एवमुत्क्षेपणत्वादिकमपि ॥६॥

ननु भ्रमणादिकमपि पृथक्कर्माधिकतया कुतो नोक्तमत आह ।

भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च ।
तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ॥ ७ ॥

सामान्यं निरूपयति ।

सामान्यं द्विविधं प्रोक्तं परं चापरमेव च ।

तल्लक्षणं तु नित्यत्वे सति अनेकसमवेतत्वम् । अनेकसमवेतत्वं संयोगादीनामप्यस्तीत्यत उक्तं नित्यत्वे सतीति । नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्तीत्यत उक्तम् अनेकेति । नित्यत्वे सति अनेकवृत्तित्वमत्यन्ताभावेऽप्यस्त्यतो वृत्तित्वसामान्यं विहाय समवेतत्वमित्युक्तम् । एकव्यक्तिमात्रवृत्तिस्तु न जातिः तथा चोक्तम् ।

व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः ।
रूपहानिरसम्बन्धो जातिबाधकसंग्रहः ॥ इति ।

एकव्यक्तिकत्वादाकाशत्वं न जातिः तुल्यव्यक्तिकत्वात् । घटत्वं कलशत्वं न जातिद्वयम् । संकीर्णत्वात्, भूतत्वं मूर्तत्वं न जातिः । अनवस्थाभयात्, सामान्यत्वं न जातिः । विशेषस्य व्यावृत्तस्वभावस्य रूपहानिः स्यात्, अतो विशेषत्वं न जातिः । समवायसम्बन्धाभावात्, समवायत्वमभावत्वं च न जातिः ॥

Indira Gandhi National Centre for the Arts

**द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥ ८ ॥**
**परभिन्ना च या जातिः सैवापरतयोच्यते ।**
**द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥ ९ ॥**

परत्वम् अधिकदेशवृत्तित्वम् । अपरत्वम् अल्पदेशवृत्तित्वम् । सकलजात्यपेक्षयाऽधिकदेशवृत्तित्वात् सत्तायाः परत्वम् । तदपेक्षया चान्यासां जातीनामपरत्वम् ॥८॥९॥

**व्यापकत्वात्परापि स्याद्व्याप्यत्वादपरापि च ।**

पृथिवीत्वाद्यपेक्षया व्यापकत्वादधिकदेशवृत्तित्वात् द्रव्यत्वादेः परत्वम् । सत्तापेक्षया व्याप्यत्वात् अल्पदेशवृत्तित्वात् द्रव्यत्वस्यापरत्वम् ॥

विशेषं निरूपयति ।

**अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः ॥ १० ॥**

अन्ते अवसाने वर्तत इत्यन्त्यः यदपेक्षया विशेषो नास्तीत्यर्थः।घटादीनां द्व्यणुकपर्यन्तानां तत्तदवयवभेदात् परस्परं भेदः परमाणूनां परस्परभेदको विशेष एव स तु स्वत एव व्यावृत्तः तेन तत्र विशेषान्तरापेक्षानास्तीत्यर्थः ॥ १० ॥

समवायं दर्शयति ।

**घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः ।**
**तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः ॥११॥**

अवयवावयविनोर्जातिव्यक्तयोर्गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवायः । समवायत्वं नित्यसम्बन्धत्वं तत्र प्रमाणं तु गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया । विशिष्टबुद्धित्वात्। दण्डी पुरुष इति विशिष्टबुद्धिवदित्यनुमानम् । तेन संयोगादिबाधात् समवायसिद्धिः । न च स्वरूपसम्बन्धेन सिद्धसाधनमर्थान्तरं वा। अनन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवात् लाघवादेकसमवायसिद्धिः । न च समवायस्यैकत्वे वायौ रूपवत्ताबुद्धिप्रसङ्गः तत्र रूपसमवायसत्त्वेऽपि रूपाभावात् । न चैवमभावस्यापि वैशिष्ट्यं सम्बन्धान्तरं सिध्येदिति वाच्यम् तस्य नित्यत्वे भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसङ्गात् घटाभावस्य तत्र सत्त्वात् तस्यच नित्यत्वात् अन्यथा देशान्तरेऽपि घटाभावप्रतीतिर्न स्यात् वैशिष्ट्यस्य च तत्र सत्त्वात् ।मम तु घटे पाकरक्ततादशायां श्यामरूपस्य नष्टत्वान्न तद्वत्ताबुद्धिः वैशिष्ट्यस्यानित्यत्वे त्वनन्तवैशिष्ट्यकल्पने तवैव गौरवम् । एवं च तत्तत्कालीनं तत्तद्भूतलादिकं तत्तदभावानां सम्बन्धः ॥११॥

अभावं विभजते ।

**अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ।**

अभावत्वं द्रव्यादिषट्कान्योऽन्याभाववत्त्वम् । संसर्गाभावान्यो-

न्याभावभेदादित्यर्थः। अन्योन्याभावस्यैकविधत्वात् तद्विभागाभावात् ॥

संसर्गाभावं विभजते।

**प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च॥१२॥**
**एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते॥**

संसर्गाभावत्वम् अन्योन्याभावभिन्नाभावत्वम्, अन्योन्याभावत्वं तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम् विनाश्यभावत्वं प्रागभावत्वम् जन्याभावत्वं ध्वंसत्वम् नित्यसंसर्गाभावत्वमत्यन्ताभावत्वम्। यत्र तु भूतलादौ घटादिकमपसारितं पुनरानीतं च तत्र घटकालस्य सम्बन्धाघटकतया अत्यन्ताभावस्य नित्यत्वेऽपि घटकाले न घटात्यन्ताभावबुद्धिःतत्र उत्पादविनाशशाली चतुर्थोऽयमभाव इति केचित्। अत्र ध्वंसप्रागभावयोरधिकरणे नात्यन्ताभाव इति प्राचां मतम्। श्यामघटे रक्तो नास्तीति रक्तघटे श्यामो नास्तीति धीः प्रागभावं ध्वंसं चावगाहते न तु तदत्यन्ताभावम् तयोर्विरोधात्। नव्यास्तु तत्र विरोधे मानाभावात् ध्वंसादिकालावच्छेदेनाप्यन्ताभावो वर्तत इत्याहुः। नन्वस्त्वभावानामधिकरणात्मकत्वं लाघवादिति चेन्न अनन्ताधिकरणात्मकत्वकल्पनामपेक्ष्यातिरिक्तकल्पनाया एव लघीयस्त्वात्। एवञ्च आधाराधेयभावोऽप्युपपद्यते। एवञ्च तत्तच्छब्दगन्धरसाद्यभावानां प्रत्यक्षत्वमुपपद्यते अन्यथा तत्तदधिकरणानां तत्तदिन्द्रियाग्राह्यत्वात् प्रत्यक्षत्वं न स्यात् एतेन ज्ञानविशेषाद्यात्मकत्वमभावस्येत्यपि प्रत्युक्तम् अप्रत्यक्षत्वापत्तेः॥

इदानीं पदार्थानां साधर्म्यवैधर्म्ये वक्तुं प्रक्रमते।

**सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते॥ १३॥**

समानो धर्मो येषां ते सधर्माणः तेषां भावः साधर्म्यं समानो धर्म इति फलितोर्थः। एवं विरुद्धो धर्मो येषां ते विधर्माणः तेषां भावो वैधर्म्यं वि-

रूढो धर्म इति फलितोर्थः। ज्ञेयत्वं ज्ञानविषयता सा च सर्वत्रैवास्ति ईश्वरज्ञानविषयतायाः केवलान्वयित्वात् एवम् अभिधेयत्वप्रमेयत्वादिकं बोध्यम्॥ १२॥ १३॥

## द्रव्यादयः पञ्च भावा अनेके समवायिनः।

द्रव्यगुणकर्मसामान्यविशेषाणां साधर्म्यं भावत्वमनेकत्वं समवायित्वं च। यद्यप्यनेकत्वम् अभावेऽप्यस्ति तथाप्यनेकत्वे सति भावत्वं पञ्चानां साधर्म्यम्। तथा च अनेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वमिति फलितोर्थः। तेन घटादावाकाशादौ च प्रत्येकं नाव्याप्तिः। समवायित्वं च समवायसम्बन्धेन सम्बन्धित्वं न तु समवायवत्त्वं सामान्यादावभावात्॥

## सत्तावन्तस्त्रयस्त्वाद्याः—

द्रव्यगुणकर्मणां सत्तावत्त्वमित्यर्थः॥

## गुणादिर्निर्गुणक्रियः॥ १४॥

यद्यपि गुणक्रियाशून्यत्वमाद्यक्षणे घटादावतिव्याप्तं क्रियाशून्यत्वं च गगनादावतिव्याप्तम् तथापि गुणवदवृत्तिधर्मवत्त्वं कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वं च तदर्थः। नहि घटत्वादिकं द्रव्यत्वादिकं वा गुणवदवृत्तिकर्मवदवृत्ति वा किन्तु गुणत्वादिकम्। तथा आकाशत्वादिकं तु न पदार्थविभाजकोपाधिः॥ १४॥

## सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः।

सामान्यानधिकरणत्वं सामान्यादीनामित्यर्थः॥

## पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्॥१५॥

पारिमाण्डल्यम् अणुपरिमाणं कारणत्वं तद्भिन्नानामित्यर्थः। अणुपरिमाणं तु न कस्यापि कारणं तद्धि स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत् तच्च

न सम्भवति। परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमात्[1]। महदारब्धस्य महत्तरत्ववदणुजन्यस्याप्यणुतरत्वप्रसङ्गात्[2]। एवं परममहत्परिमाणमतीन्द्रियसामान्यं विशेषाश्च बोध्याः। इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वम् ज्ञायमानसामान्यं न प्रत्यासत्तिः। ज्ञायमानं लिङ्गम् नानुमितिकरणमित्यभिप्रायेणोक्तम्। आत्ममानसप्रत्यक्षे[3] आत्मपरममहत्त्वस्य कारणत्वात् परममहत्परिमाणमाकाशादेर्बोध्यम्। तस्यापि न कारणत्वमित्याचार्याणामाशय इत्यन्ये तन्न। ज्ञानातिरिक्तं प्रत्येवाकारणताया आचार्यैरुक्तत्वात्॥ १५॥

ननु कारणत्वं किम्? अत आह।

अन्यथासिद्धिशून्यस्य नियता पूर्ववर्त्तिता।
कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम्॥ १६॥
समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम्।
एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम्॥ १७

तस्य,—कारणत्वस्य॥ १६॥ १७॥

यत्समवेतं कार्यं भवति ज्ञेयं तु समवायिजनकं तत्।
तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात्॥
॥ १८॥

तत्र-समवायिकारणे प्रत्यासन्नं कारणं द्वितीयमसमवायिकारणमित्यर्थः।

---

१ साजात्यमिह परिमाणविभाजकोपाधिरूपेण ज्ञेयम्। तच्च अणुत्वत्वमहत्त्वत्वादि।

२ उत्कृष्टं चाणोरणुतरमेवेति। नचाणुजन्यस्य अणुतरत्वमस्तु किं बाधकमिति। तथासति त्रुटेरचाक्षुषत्वप्रसङ्गात्।

३ यद्यपि स्वप्रत्यक्षे इत्येव वक्तुमुचितम् तथापि टीकाकृन्मते आत्मैकत्वमहत्त्वयोरयोग्यत्वात् प्रत्यक्षं न सम्भवतीत्यात्ममानसेत्युक्तम्।

अत्र यद्यपि तुरीतन्तुसंयोगे[१] पटासमवायिकारणत्वं स्यात्, एवं वेगादीनामभिघाताद्यसमवायिकारणत्वं स्यात्, एवं ज्ञानादीनामपीच्छाद्यसमवायिकारणत्वं स्यात्,तथापि पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगभिन्नत्वं देयम् । तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रत्यसमवायिकारणं भवत्येव । एवं वेगादिकमपि स्पन्दाद्यसमवायिकारणं भवत्येवेति । तत्तत्कार्यासमवायिकारणलक्षणे तत्तद्भिन्नत्वं देयम् । आत्मविशेषगुणानां तु कुत्राप्यसमवायिकारणत्वं नास्ति । तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेव । अत्र समवायिकारणे प्रत्यासन्नं द्विविधम्।कार्यैकार्थप्रत्यासत्त्या कारणैकार्थप्रत्यासत्त्या च। आद्यं यथा घटादिकं प्रति कपालसंयोगादिकमसमवायिकारणम्। तत्र कार्येण घटेन सह कारणस्य कपालसंयोगस्य एकस्मिन् कपाले प्रत्यासत्तिरस्ति। द्वितीयं यथा घटरूपं प्रति कपालरूपमसमवायिकारणम् । स्वगतरूपादिकं प्रति समवायिकारणं घटः।तेन सह कपालरूपस्य एकस्मिन् कपाले प्रत्यासत्तिरस्ति। तथा च क्वचित् समवायसम्बन्धेन, क्वचित् स्वसमवायिसमवायसम्बन्धेनेति फलितोर्थः । इत्थं च कार्यैकार्थकारणैकार्थान्यतरप्रत्यासत्त्या समवायिकारणे प्रत्यासन्नं कारणं ज्ञानादिभिन्नमसमवायिकारणमिति सामान्यलक्षणं पर्यवसितम् । आभ्यां समवायिकारणासमवायिकारणाभ्यां परं भिन्नंकारणं तृतीयं निमित्तकारणमित्यर्थः ॥ १८ ॥

इदानीमन्यथासिद्धत्वमेव कियतां तदाह।

## येन सह पूर्वभावः–

यत् कार्यं प्रति कारणस्य पूर्ववृत्तिता येन रूपेण गृह्यते, तत्कार्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः । यथा घटं प्रति दण्डत्वमिति ॥

---

१ समवायिकारणत्वासमवायिकारणत्वभिन्नकारणत्वमिति यावत् । तेन तुरीपटसंयोगं प्रति तुरीतन्तुसंयोगस्यासमवायिकारणत्वेपि न तस्य पटं प्रति निमित्तकारणत्वक्षतिः ।

द्वितीयमन्यथासिद्धमाह ।

कारणमादाय वा यस्य ।

यस्य स्वातन्त्र्येणान्वयव्यतिरेकौ न स्तः किंतु स्वकारणमादायैव अन्वयव्यतिरेकौ गृह्येते तंप्रति तदन्यथासिद्धम् यथा दण्डरूपम् ॥

तृतीयमाह ।

अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम् १९

अन्यंप्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम्। यथा घटादिकं प्रत्याकाशस्य,तस्य हि घटादिकं प्रति कारणत्वमाकाशत्वेनैव स्यात् तद्धि शब्दसमवायिकारणत्वम्। एवंच तस्य शब्दं प्रति जनकत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं ग्राह्यमतस्तदन्यथा सिद्धम् । ननु शब्दाश्रयत्वेन तस्य कारणत्वे काऽन्यथासिद्धिः ? इति चेत् पञ्चमीति गृहाण । नन्वाकाशस्य शब्दं प्रति जनकत्वे किमवच्छेदकम् ? इति चेत् कवत्त्वादिकं विशेषपदार्थो वेति ॥ १९ ॥

चतुर्थमन्यथासिद्धमाह ।

जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते ।

यत्कार्यजनकं प्रति पूर्ववृत्तितां गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम् । यथाकुलालपितुर्घटं प्रति, तस्य हि कुलालपितृत्वेन घटं प्रति जनकत्वेऽन्यथासिद्धत्वम्, कुलालत्वेन रूपेण जनकत्वे त्विष्टापत्तिः, कुलालमात्रस्य घटं प्रति जनकत्वात् ॥

---

१ यद्यपि शब्दत्वावच्छिन्नं प्रति शब्दकारणत्वेन गगनस्य कारणत्वेपि नान्यथासिद्धिः शब्दस्य शब्दभिन्नत्वाभावात् । तथापि स्वस्य स्वावच्छेदकत्वे आत्माश्रयापत्तिः कारणतावच्छेदकज्ञानस्य कारणताग्रहहेतुत्वादिति कवत्त्वादेः कारणतावच्छेदकत्वानुधावनम् ।

पञ्चममन्यथासिद्धमाह ।

अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्व भाविनः ॥ २० ॥

नियतावश्यकपूर्वभाविनः अवश्यक्लृप्तनियतपूर्ववर्त्तिन एव कार्यसम्भवे तद्भिन्नमन्यथासिद्धमित्यर्थः । अत एव प्रत्यक्षे महत्त्वं कारणमनेकद्रव्यत्वमन्यथासिद्धम् । तत्र हि महत्त्वमवश्यक्लृप्तं तेनानेकद्रव्यत्वमन्यथासिद्धम् । न च वैपरीत्ये किं विनिगमकम् ? इति वाच्यम् महत्त्वत्वजातेः कारणतावच्छेदकत्वे लाघवात् ॥ २० ॥

एते पञ्चान्यथासिद्धा दण्डत्वादिकमादिमम् ।
घटादौ दण्डरूपादि द्वितीयमपि दर्शितम् ॥२१॥
तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः ।
पञ्चमो रासभादिः स्यात्–

यद्यपि यत्किंचित् घटव्यक्तिं प्रति रासभस्य नियतपूर्ववृत्तित्वमस्ति तथापि घटजातीयं प्रति सिद्धकारणभावैर्दण्डादिभिरेव तद्व्यक्तेरपि सम्भवे रासभोऽन्यथासिद्ध इति भावः ॥

एतेष्वावश्यकस्त्वसौ ॥ २२ ॥

एतेषु पञ्चष्वन्यथासिद्धेषु मध्ये पञ्चमोऽन्यथासिद्ध आवश्यकः, तेनैव परेषां चरितार्थत्वात् । तथाहि, दण्डादिभिरवश्यक्लृप्तनियतपूर्ववृत्तिभिरेव कार्यसम्भवे दण्डत्वादिकमन्यथासिद्धम् । न च वैपरीत्ये किं विनिगमकम् ?

---

१ इहानेकद्रव्यत्वम् नानेकद्रव्यसमवेतत्वम् तस्य द्व्यणुकेपि सत्त्वेन द्व्यणुकप्रत्यक्षापत्तेः । समवेतसमवेतद्रव्यत्वं तदित्यापि न आत्मनि तस्याभावेनात्मप्रत्यक्षानुपपत्तेः । किंत्वणुभिन्नद्रव्यत्वमिति ज्ञेयम् ।

इति वाच्यम् दण्डत्वस्य कारणत्वे दण्डघटितपरम्परायाः सम्बन्धत्वकल्पने गौरवात् एवमन्येषामप्यनेनैव चरितार्थत्वं सम्भवति ॥ २१ ॥ २२ ॥

समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम् । स्पष्टम् ।
गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम् ॥
॥ २३ ॥

असमवायिकारणत्वं गुणकर्मभिन्नानां वैधर्म्यं नतु गुणकर्मणोः साधर्म्यमित्यत्र तात्पर्यम् । अथवा असमवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्वं तदर्थः । तेन ज्ञानादीनामसमवायिकारणत्वविरहेऽपि नाव्याप्तिः ॥ २३ ॥

अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते ।

नित्यद्रव्याणि परमाण्वाकाशादीनि । विहायाश्रितत्वं साधर्म्यमित्यर्थः । आश्रितत्वं तु समवायादिसम्बन्धेन वृत्तिमत्त्वम् । विशेषणतया नित्यानामपि कालादौ वृत्तेः ॥

इदानीं द्रव्यस्यैव विशिष्य साधर्म्यं वक्तुमारभते ।

क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता ॥ २४ ॥

स्पष्टम् ॥ २४ ॥

क्षितिर्जलं तथा तेजः पवनो मन एव च ।
परापरत्वमूर्त्तत्वक्रियावेगाश्रया अमी ॥ २५ ॥

पृथिव्यप्तेजोवायुमनसां परत्वापरत्ववत्त्वं मूर्त्तत्वं क्रियावत्त्वं वेगवत्त्वं च साधर्म्यम् । नच यत्र घटादौ परत्वमपरत्वं वा नोत्पन्नं तत्राव्याप्तिरिति वाच्यम् । परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षित-

---

१ सर्वाधारतानियामकसंबन्धातिरिक्तसंबन्धेनेत्यर्थः ।

२ कालिकविशेषणतयेत्यर्थः ।

त्वात् । मूर्तत्वम् अपकृष्टपरिमाणवत्त्वम्, तच्चैषामेव । गगनादिपरिमाणस्य कुतोऽप्यपकृष्टत्वाभावात् । पूर्ववत् कर्मवत्त्वम्[1], कर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वम्, वेगवत्त्वं[2] वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं च बोध्यम् ॥ २५ ॥

## कालखात्मदिशां सर्वगतत्वं परमं महत् ।

कालाकाशात्मदिशां सर्वगतत्वम् सर्वमूर्त्तसंयोगित्वम् परममहत्त्वं च परममहत्त्वत्वं जातिविशेषः । अपकर्षानाश्रयपरिमाणवत्त्वं वा ॥

## क्षित्यादिपञ्च भूतानि–

पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वम् । तच्च बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम् । अत्र ग्राह्यत्वं लौकिकप्रत्यक्षविषयत्वस्वरूपयोग्यत्वं बोध्यम् । तेन ज्ञातो घट इत्यादिप्रत्यक्षे ज्ञानस्याप्युपनीतभानविषयत्वात् तद्वति आत्मनि नातिप्रसङ्गः । न वा प्रत्यक्षाविषयरूपादिमति परमाण्वादावव्याप्तिः । तस्यापि स्वरूपयोग्यत्वात्[3] महत्त्वलक्षणकारणान्तरासन्निधानाच्च न प्रत्यक्षत्वम् । अथवा आत्मावृत्तिविशेषगुणवत्त्वं तत्त्वम् ॥

## चत्वारि स्पर्शवन्ति हि ॥ २६ ॥

पृथिव्यप्तेजोवायूनां स्पर्शवत्त्वम् ॥ २६ ॥

## द्रव्यारम्भश्चतुर्षु स्यात्–

---

१ "धात्वर्थो हि क्रिया ज्ञेया भाव इत्यभिधीयते" इति हरिकारिकोक्तेः धात्वर्थः क्रिया तत्रातिप्रसङ्गः इत्यत आह कर्मवत्त्वमिति । प्रकृते क्रियापदार्थो न धात्वर्थः अपितु कर्मैव ।

२ वेगवत्त्वं च वेगसंबन्धित्वं तेन वेग इव वेगवत् तस्य भावस्तत्त्वमिति व्युत्पत्त्या वेगसदृशत्वं वेगत्वमिति भ्रमनिरासः ।

३ बहिरिन्द्रियजन्यलौकिकप्रत्यक्षं प्रति उद्भूतरूपत्वेनैव कारणतया कारणतावच्छेदकधर्मवत्त्वस्यैव स्वरूपयोग्यत्वादित्यर्थः ।

पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारम्भकत्वम् नच द्रव्यानारम्भके घटादावव्याप्तिः। द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ॥

## अथाकाशशरीरिणाम्।
## अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते ॥२७॥

आकाशात्मनामव्याप्यवृत्तिक्षणिकविशेषगुणवत्त्वं साधर्म्यमित्यर्थः-। आकाशस्य विशेषगुणः शब्दः सचाव्याप्यवृत्तिः, यदा किञ्चिदवच्छेदेन शब्द उत्पद्यते तदान्यावच्छेदेन तदभावस्यापि सत्त्वात्, क्षणिकत्वंच तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्।योग्यविभुविशेषगुणानां स्वोत्तरवृत्तिगुणनाश्यत्वात् प्रथमशब्दस्य द्वितीयशब्देन नाशः। एवं ज्ञानादीनामपि, ज्ञानादिकं यदात्मनि विभौ शरीराद्यवच्छेदेनोत्पद्यते तदा घटाद्यवच्छेदेन तदभावोऽस्त्येव एवं ज्ञानादिकमपि क्षणद्वयावस्थायि। इत्थं चाव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं चार्थः । पृथिव्यादौ रूपादिर्विशेषगुणोऽस्तीत्यऽव्याप्यंवृत्तीत्युक्तम् । पृथिव्यादावव्याप्यवृत्तिसंयोगादिरस्तीति विशेषगुणेत्युक्तम् । नच रूपादीनामपि कदाचित् तृतीयक्षणे नाशसम्भवात् क्षणिकविशेषगुणवत्त्वं क्षित्यादावतिव्याप्तमिति वाच्यं चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य तदर्थत्वात् । अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति क्षणचतुष्टयं तु न किमपि जन्यज्ञानादिकं तिष्ठति, रूपत्वादिकं तु क्षणचतुष्टयस्थायिन्यपि रूपादौ वर्तत इति तद्व्युदासः। ईश्वरज्ञानस्य चतुःक्षणवृत्तित्वात् ज्ञानत्वस्य तद्वृत्तित्वात् जन्येत्युक्तम् । यद्याकाशजीवात्मनोः साधर्म्यम् तदा जन्येति न देयं

१ इहाव्याप्यवृत्तिपदेन दैशिकाव्याप्यवृत्तित्वं ज्ञेयम् तेन रूपादीनामपि कालिकाव्याप्यवृत्तित्वेपि न क्षतिः ।

२ चतुःक्षणवृत्तीनि यानि जन्यानि घटादीनि तदवृत्तिर्या जातिर्ज्ञानत्वादिस्तद्वान् विशेषगुणो ज्ञानादिस्तद्वत्त्वस्येत्यर्थः।

द्वेषत्वादिकमादाय. लक्षणसमन्वयात् । परममहत्त्वस्य तादृशगुणत्वाच्चतुर्थक्षणे द्वित्वादीनाम् नाशाभ्युपगमात्, द्वित्वादीनामपि तथात्वात्, तद्वारणाय विशेषेति । त्रिक्षणवृत्तित्वं वा वाच्यम्, इच्छात्वादिकमादायात्मनि लक्षणसमन्वयः ॥ २७ ॥

## रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः ।

पृथिव्यप्तेजसां रूपवत्त्वं द्रवत्ववत्त्वं प्रत्यक्षविषयत्वं चेत्यर्थः । नच चक्षुरादीनां भर्जनकपालस्थवह्नेरूष्मणश्च रूपवत्त्वे किं मानम्? इति वाच्यं तत्रापि तेजस्त्वेन रूपानुमानात्, एवं वाय्वानीतपृथिवीजलतेजोभागानामपि पृथिवीत्वादिना रूपानुमानं बोध्यम् । नच घटादौ द्रुतसुवर्णादिभिन्ने तेजसि च द्रवत्ववत्त्वमव्याप्तमिति वाच्यं द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् घृतजतुप्रभृतिषु पृथिवीषु, जलेषु, द्रुतसुवर्णादौ तेजसि च द्रवत्वसत्त्वात् तत्र च पृथिवीत्वादिसत्त्वात् तदादाय सर्वत्र लक्षणसमन्वयः । न च प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तम् अतिव्याप्तं च । रूपादाविति वाच्यं चाक्षुषलौकिकप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् आत्मन्यतिव्याप्तिवारणाय चाक्षुषेति ॥

## गुरुणी द्वे रसवती-

गुरुत्व[१]वत्त्वम् रसवत्त्वं च पृथिवीजलयोरित्यर्थः । न च घ्राणेन्द्रियादीनां वाय्वानीतपार्थिवादिभागानां च रसादिमत्त्वे किं मानम्? इति वाच्यं, तत्रापि पृथिवीत्वादिना तदनुमानात् ॥

## द्वयोर्नैमित्तिको द्रवः ॥ २८ ॥

पृथिवीतेजसोरित्यर्थः । न च नैमित्तिकद्रवत्ववत्त्वं घटादौ वह्न्यादौ

---

१ गुरुत्वं रक्तिकामाषकतोलकत्वादि इदमुपलक्षणम् पतनवत्त्वमित्यपि बोध्यम् । पतनत्वं च गुरुत्वासमवायिकारणककर्मत्वम् उल्का पतति इत्यादिप्रयोगस्तु लाक्षणिकः ।

चाव्याप्तमिति वाच्यं नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ॥ २८ ॥

आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः ।

पृथिव्यप्तेजोवाय्वाकाशात्मनां विशेषगुणवत्त्वमित्यर्थः ॥

यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत् ॥२९॥

ज्ञेयत्वादिकं विहाय इति बोध्यम् । तत्तु न कस्यापि वैधर्म्यं, केवलान्वयित्वात् ॥ २९ ॥

स्पर्शादयोऽष्टौ वेगाख्यः संस्कारो मरुतो गुणाः।
स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः॥ ३० ॥
स्पर्शादयोऽष्टौ वेगश्च द्रवत्वं च गुरुत्वकम् ।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ॥३१ ॥
स्नेहहीना गन्धयुक्ताः क्षितावेते चतुर्दश ।
बुद्ध्यादिषट्कंसंख्यादिपञ्चकं भावना तथा ॥३२॥
धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश ।
संख्यादिपञ्चकं कालदिशोः शब्दश्च ते च खे ॥ ३३ ॥

ते च संख्यादयः पञ्च, खे आकाशे ॥ ३०॥३१॥३२॥३३॥

संख्यादिपञ्चकं बुद्धिरिच्छा यत्नोऽपि चेश्वरे ।
परापरत्वे संख्यादि पञ्च वेगश्च मानसे ॥ ३४ ॥

साधर्म्यवैधर्म्ये निरूप्य संप्रति प्रत्येकं पृथिव्यादिकं निरूपयति ।
तत्र क्षितिर्गन्धहेतुः–

गन्धसमवायिकारणमित्यर्थः । यद्यपि गन्धवत्त्वमात्रं पृथिव्या लक्षणमुचितम्, तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तम् । तथाहि, पृथिवीत्वं हि गन्धसमवायिकारणतावच्छेदकतया सिध्यति अन्यथा[१] गन्धत्वावच्छिन्नस्याकस्मिकत्वापत्तेः[२] । नच पाषाणादौ गन्धाभावाद्गन्धवत्त्वमव्याप्तमिति वाच्यम्, तत्रापि गन्धसत्त्वात् अनुपलब्धिस्तु अनुत्कटत्वेनाप्युपपद्यते कथमन्यथा तद्भस्मनि गन्ध उपलभ्यते इति वाच्यम् । भस्मनो हि पाषाणध्वंसजन्यत्वात् पाषाणोपादानोपादेयत्वं सिध्यति, यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्तेः । दृष्टं चैतत् खण्डपटे महापटध्वंसजन्ये । इत्थं च पाषाणपरमाणोः पृथिवीत्वात् तज्जन्यपाषाणस्यापि पृथिवीत्वम् तथाच तस्यापि गन्धवत्त्वे बाधकाभावः ॥

## नानारूपवती मता ।

शुक्लनीलादिभेदेन नानाजातीयं रूपं पृथिव्यामेव वर्तते नतु जलादौ, तत्र शुक्लस्यैव सत्त्वात् । पृथिव्यां तु एकस्मिन्नपि धर्मिणि पाकवशेन नानारूपसम्भवात्, नच यत्र नानारूपं नोत्पन्नं तत्राव्याप्तिरिति वाच्यम् रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् रूपनाशवद्वृत्तिद्रव्यत्वव्याप्य जातिमत्त्वस्य वा वाच्यत्वात् । वैशेषिकनये पृथिवीपरमाणौ रूपनाशस्य, रूपान्तरस्य च सत्त्वात् न्यायनये घटादावपि तत्सत्त्वाल्लक्षणसमन्वयः ।।

## षड्विधस्तु रसस्तत्र–

मधुरादिभेदेन यः षड्विधो रसः स पृथिव्यामेव । जले च मधुर एव रसः, अत्रापि पूर्ववद्रसद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणार्थोऽवसेयः ॥

---

१ गन्धत्वावच्छिन्नं प्रति पृथिव्याहेतुत्वानङ्गीकारे ।

२ नियतकारणानियम्यत्वापत्तेरित्यर्थः । तथाच कार्यमात्रवृत्तेर्गन्धत्वस्य कार्यतावच्छेदकत्वानुरोधेन तदवच्छिन्ने पृथिवीत्वेन हेतुत्वमावश्यकमिति भावः ।

गन्धस्तु द्विविधो मतः ॥ ३५ ॥

द्विविध इति वस्तुस्थितिमात्रं नतु द्विविधगन्धवत्त्वं लक्षणं द्विविधत्वस्य व्यर्थत्वात् । द्वैविध्यं च सौरभासौरभभेदेनबोध्यम् ॥ ३५ ॥

स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः ।

तस्याः-पृथिव्याः अनुष्णाशीतस्पर्शवत्त्वं वायावपि वर्तत इत्युक्तम् । पाकज इति । इत्थं च पृथिव्याः स्पर्शोऽनुष्णाशीत इति ज्ञापनार्थमुक्तम् । वस्तुतस्तु । पाकजस्पर्शवत्त्वमात्रं लक्षणम् । अधिकस्य वैयर्थ्यात् । यद्यपि पाकजस्पर्शः पटादौ नास्ति तथापि पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः ॥

नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा ॥ ३६ ॥

सा—पृथिवी द्विविधा नित्या अनित्या च इत्यर्थः । अणुलक्षणा परमाणुरूपा पृथिवी नित्या ॥ ३६ ॥

अनित्या तु तदन्या स्यात् सैवावयवयोगिनी ।

तदन्या परमाणुभिन्ना पृथिवी द्व्यणुकादिरूपासर्वाऽप्यनित्येत्यर्थः । सैव अनित्या पृथिव्येवावयववतीत्यर्थः । ननु अवयविनि किं मानम्? परमाणुपुञ्जैरेवोपपत्तेः नच परमाणूनामतीन्द्रियत्वाद्घटादेः प्रत्यक्षत्वं न स्यादिति वाच्यम् । एकस्य परमाणोरप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वसम्भवात् । यथा एकस्य केशस्य दूरेऽप्रत्यक्षत्वेपि तत्समूहस्य प्रत्यक्षत्वम् । नच एको घटः स्थूल इति बुद्धेरनुपपत्तिरिति वाच्यम् एको महान् धान्यराशिरितिवदुपपत्तेः । नैवम् परमाणोरतीन्द्रियत्वेन तत्समूहस्यापि प्रत्यक्षत्वायोगात् दूरस्थकेशस्तु नातीन्द्रियः सन्निधाने तस्यैव प्रत्यक्षत्वात् नच तदानीम् दृश्यपरमाणुपुञ्जस्यउत्पन्नत्वान्न प्रत्यक्षत्वेपि विरोधः इति वाच्यम्, अदृश्यस्य दृश्या-

नुपादानत्वात् । अन्यथा चक्षुरूष्मादिसन्ततेः कदाचिद्दृश्यत्वप्रसङ्गात् । न चातितप्ततैलादौ कथमदृश्यदहनसन्ततेर्दृश्यदहनोत्पत्तिरिति वाच्यम् तत्र तदन्तःपातिभिर्दृश्यदहनावयवैः स्थूलदहनोत्पत्तेरुपगमात् । नचादृश्येन द्व्यणुकेन कथं दृश्यत्रसरेणोरुत्पत्तिरिति वाच्यम् यतो न दृश्यत्वमदृश्यत्वं वा कस्यचित्स्वभावादाचक्ष्महे किंतु महत्त्वोद्भूतरूपादिकारणसमुदायवशाद्दृश्यत्वम् तदभावे चादृश्यत्वम् । तथाच त्रसरेणोर्महत्त्वात्प्रत्यक्षत्वम् नतु द्व्यणुकादेस्तदभावात्।नहि त्वन्मतेपि सम्भवतीदम् परमाणौ महत्त्वाभावात् । इत्थं चावयविसिद्धौ तेषामुत्पादविनाशयोः प्रत्यक्षसिद्धत्वादनित्यत्वं तेषां चावयवावयवधाराया अनन्तत्वे मेरुसर्षपयोरपि साम्य[2]प्रसङ्गः। अतः क्वचिद्विश्रामो वाच्यः । यत्र तु विश्रामस्तस्यानित्यत्वेऽसमवेतकार्योत्पत्तिप्रसङ्गः स्यादतस्तस्य नित्यत्वम् । महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिवाणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वमस्तीति तस्य परमाणुत्वसिद्धिः । नच त्रसरेणावेव विश्रामोऽस्त्विति वाच्यम् त्रसरेणुः सावयवःचाक्षुष द्रव्यत्वाद्घटवदित्यनुमानेन तदवयवसिद्धौ त्रसरेणोरवयवाः सावयवाः महदारम्भकत्वात् कपालवदित्यनुमानेन तदवयवसिद्धेः । नचेदमप्रयोजकम् अपकृष्टमहत्त्वम्प्रत्यनेकद्रव्यत्वस्यप्रयोजकत्वात् । नचैवं क्रमेण तदवयवधारापि सिद्ध्येदिति वाच्यम् अनवस्थाभयेन तदसिद्धेरिति ॥

## सा च त्रिधा भवेद्देहमिन्द्रियं विषयस्तथा ॥३७॥

सा-कार्यरूपा पृथिवी त्रिधेत्यर्थः । शरीरेन्द्रियविषयभेदादित्यर्थः॥ ३७॥

तत्र देहमुदाहरति ।

## योनिजादिभवेद्देहम्-

१ अदृश्यस्य दृश्योत्पादकत्वे इत्यर्थः ।

२ साम्यं-परिमाणतारतम्याभावः प्रसङ्गः-परिमाणकारणीभूताया अवयवसंख्याया उभयत्र साम्यात् द्व्यणुकस्य सावयवारब्धत्वे महत्त्वापत्तिरूपप्रसङ्ग इत्यर्थः ।

योनिजमयोनिजं चेत्यर्थः । योनिजमपि द्विविधम् जरायुजमण्डजञ्चेति। जरायुजं मानुषादीनाम्[2];अण्डजं सर्पादीनाम्,अयोनिजं स्वेदजोद्भिज्जादिकम्। स्वेदजाः कृमिदंशाद्याः, उद्भिज्जास्तरुगुल्माद्याः। नारकिणां शरीरमपि अयोनिजम् । नच मानुषादिशरीराणां पार्थिवत्वे किंमानमितिवाच्यं गन्धादिमत्त्वस्यैवप्रमाणत्वात् । न च क्लेदोष्मादेरुपलम्भादाप्यत्वादिकमपि स्यादिति वाच्यम् । तथा सति जलत्वपृथिवीत्वादिनासङ्करप्रसङ्गात्। नच तर्हि जलीयत्वादिकमेवास्तु नतु पार्थिवत्वमिति वाच्यम् क्लेदादीनां विनाशेऽपि शरीरत्वेन प्रत्यभिज्ञानात् । गन्धाद्युपलब्धेश्च पृथिवीत्वसिद्धेः । तेन पार्थिवादिशरीरे जलादीनां निमित्तत्वमात्रं बोध्यम् । शरीरत्वं न जातिः पृथिवीत्वादिना साङ्कर्यात्। किन्तु चेष्टाश्रयत्वं, वृक्षादीनामपि चेष्टाश्रयत्वान्नाव्याप्तिः। नच वृक्षादीनां शरीरत्वे किं मानमिति वाच्यम् । आध्यात्मिकवायुसम्बन्धस्य प्रमाणत्वात् तत्रैव किं मानम् ? इति चेत् भग्नक्षतसंरोहणादिना तदुन्नयनात् । यदि हस्तादौ शरीरव्यवहारो न भवति तदान्त्यावयवित्वेन विशेषणीयम् । नच यत्र शरीरे चेष्टा न जाता तत्राव्याप्तिरिति वाच्यम् तादृशे प्रमाणा-

---

१शुक्रशोणितयोः परस्परमेलनजन्यमित्यर्थः । न योनिद्वारा निर्गतं योनिजमित्यर्थः स्वेदजस्यापि योनिद्वारा निर्गमसम्भवात् अतिव्याप्त्यापत्तेः ।

२ आदिना पशुमृगादीनां परिग्रहः । यद्यपि पशुशब्दस्य लोमलाङ्गूलवद्वाचकतया तेनैव मृगसंग्रहे आदिना पृथक् मृगपदसंग्रहो व्यर्थः । तथापि गोबलिवर्दन्यायेन लाङ्गूलरहितस्यापि संभवाभिप्रायेण वा तत्संग्रहः ।

३ क्लेदः-क्षरणं स्वेद इति यावत् । ऊष्मा-पाकः औष्ण्यमिति यावत् ।

४ आध्यात्मकवायुश्च प्राणाख्यो बोध्यः ।

५ भग्नक्षतयोर्विभागविशेषविश्लिष्टावयवयोः संरोहणादिकम् । आदिना वृद्धिसंग्रहः । वृद्धिश्चावयवोपचयः इति ज्ञेयम् ।

६ आध्यात्मिकवायुसंबन्धानुमितेरित्यर्थः ।

७ द्रव्यानारम्भकद्रव्यत्वेनेत्यर्थः ।

भावात् । अथवा चेष्टावदन्त्यावयविवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं अन्त्यावयविमात्रवृत्तिचेष्टाद्वृवत्तिजातिमत्त्वं वा तत् । मानुषत्वचैत्रत्वजातिमादाय लक्षणसमन्वयः । नच नृसिंहशरीरे कथं लक्षणसमन्वयः ? तत्र नृसिंहत्वस्यैकव्यक्तिवृत्तितया जातित्वाभावात् जलीयतैजसशरीरवृत्तितया देवत्वस्यापि जातित्वाभावादिति वाच्यम् । कल्पभेदेन नृसिंहशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात् ॥

## इन्द्रियं घ्राणलक्षणम् ।

घ्राणेन्द्रियं पार्थिवमित्यर्थः । पार्थिवत्वं कथम् ? इति चेत् इत्थम्, घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धस्यैवाभिव्यञ्जकत्वात् । कुङ्कुमगन्धादिव्यञ्जकगोघृतवत् । नच दृष्टान्ते स्वकीयरूपादिव्यञ्जकत्वादसिद्धिरिति वाच्यं परकीयरूपाद्यव्यञ्जकत्वस्य तदर्थत्वात् । नच नवशरावगन्धव्यञ्जकजलेऽनैकान्तिक इति वाच्यम् तस्य सक्तुरसाभिव्यञ्जकत्वात् यद्वा परकीयेति न देयम्, वायूपनीतसुरभिभागानां दृष्टान्तत्वसम्भवात् । नच घ्राणेन्द्रियसन्निकर्षस्य गन्धमात्राभिव्यञ्जकत्वात् तत्र व्यभिचार इति वाच्यम्, द्रव्यत्वे सति इति विशेषणात् ॥

## विषयो द्व्यणुकादिश्च ब्रह्माण्डान्त उदाहृतः ३८

उपभोगसाधनं विषयः सर्वमेव हि कार्यजातम् अदृष्टाधीनं यत् कार्यं यददृष्टाधीनं तत्तदुपभोगं साक्षात् परम्परया वा जनयत्येव । नहि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति । तेन द्व्यणुकादिब्रह्माण्डान्तं सर्वमेव विषयो भवति शरीरेन्द्रिययोर्विषत्वेऽपि प्रकारान्तरेणोपन्यासः शिष्यबुद्धिवैशद्यार्थः ॥ ३८ ॥

---

१ चेष्टा च यदि शरीरक्रियारूपा तदा आत्माश्रयः अतः हिताहितप्राप्तिपरिहारार्था क्रिया नतु स्पन्दनमात्रम् । तस्य घटादावपि सत्त्वात् ।

२ विषयत्वं न जातिः । सामान्यादौ सत्त्वात् । अतः विषयत्वजातिमत्त्वरूपलक्षणं वक्तुमशक्यम् ।

जलं निरूपयति ।

## वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ ।

स्नेहसमवायिकारणतावच्छेदकतया जलत्वजातिसिद्धिः । यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया न कार्यतावच्छेदकं, तथापि जन्यस्नेहत्वं तथा[1] बोध्यम् । अथ परमाणौ जलत्वं न स्यात् तत्र जन्यस्नेहाभावात् तस्यच नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भावनियमादिति चेन्न । जन्यस्नेहजनकतावच्छेदकतया जन्यजलत्वजातेः सिद्धौ तदवच्छिन्नजनकतावच्छेदकतया जलत्वजातिसिद्धेः । शुक्लरूपमेव जलस्येति दर्शयितुमुक्तं वर्णः शुक्ल इति । नतु शुक्लरूपवत्त्वं लक्षणम् । अथवा नैमित्तिकद्रवत्ववद्वृत्तिरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम् ।अभास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः । तेन स्फटिकादौ नातिव्याप्तिः । रसस्पर्शाविति । जलस्य मधुर एव रसः शीतं[2] एव स्पर्शः। तिक्तवदवृत्तिमधुरवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्, तेन शर्करादौ नातिव्याप्तिः । शीतेतरस्पर्शवदवृत्तिशीतस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं च तदर्थः । ननु शुक्लरूपमेवेति कुतः, कालिन्दीजलादौ नीलिमोपलब्धेरिति चेन्न । नीलजनकतावच्छेदिकायाः पृथिवीत्वजातेरभावात् जलेनीलरूपासम्भवात् कालिन्दीजले नीलत्वप्रतीतिस्त्वाश्रयौपाधिकी भ्रान्तिरेव । अत[3] एव वियति विक्षिप्ते धवलिमोपलब्धिः । अथ जले माधुर्ये किं मानम्? नहि

---

१ कार्यतावच्छेदकमित्यर्थः । वस्तुतस्तु नित्यसाधारणधर्मस्य कार्यतावच्छेदकत्वे दोषाभावात् जन्यपदं न देयमेवेति ज्ञेयम् ।

२ यद्यपि शीतं गुण इति कोशात् क्लीबतैवोचिता तथापि विशेष्यस्य स्पर्शशब्दस्य पुल्लिङ्गत्वात् पुल्लिङ्गतया निर्देशः ।

३ स्वसमवायिसंयोगसंबन्धस्य जलंनीलमिति प्रतीतिनियामकत्वादेवेत्यर्थः ।

४ अत्र स्वसमवायिसंयोगसंबन्धघटकसंयोगनाशात् आकाशे विक्षिप्ते जले धवलिमोपलब्धिरिति भावः ।

प्रत्यक्षेण क्वेऽपि रसस्तत्रानुभूयते । नच नारिकेलजलादौ माधुर्यमुपलभ्यत एवेति वाच्यम् तस्याश्रयौपाधिकत्वात् । अन्यथा जम्बीरकरवीरजलादावम्लादिरसोपलब्धेरम्लादिमत्त्वमपि स्यादिति चेन्न । हरीतक्यादिभक्षणस्य जलरसव्यञ्जकत्वात् नच हरीतक्यामेव जलोष्मसंयोगाद्रसान्तरोत्पत्तिरिति वाच्यं कल्पनागौरवात् । पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्च जले नाम्लादिकं, जम्बीररसादौ तु आश्रयौपाधिकी तथा प्रतीतिः । एवं जन्यशीतस्पर्शजनकतावच्छेदकं जलत्वं जन्यजलत्वं वा बोध्यम् । घृष्टचन्दनादौ तु शैत्योपलब्धिश्चन्दनान्तर्वर्त्तिशीततरसलिलस्यैव तेजःसंयोगाज्जले औष्ण्यप्रतीतिरौपाधिकी स्फुटैव तत्र पाकासम्भवात् ॥

## स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम् ॥ ३९ ॥

घृतादावपि तदन्तर्वर्त्तिजलस्यैव स्नेहः जलस्य स्नेहसमवायिकारणत्वात् । तेन जले एव स्नेह इति मन्तव्यम् । द्रवत्वन्त्विति । सांसिद्धिकद्रवत्वत्वं जातिविशेषः प्रत्यक्षसिद्धस्तदवच्छिन्नजनकत्वावच्छेदकमपि तदेवेति भावः । तैलादावपि जलस्यैव द्रवत्वं स्नेहप्रकर्षेण च दहनानुकूल्यमिति वक्ष्यति॥ ३९॥

## नित्यतादि प्रथमवत्किं तु देहमयोनिजम् ।

पृथिव्या एवेत्यर्थः । तथाहि जलं द्विविधं नित्यमनित्यञ्च । परमाणुरूपं नित्यम् । द्व्यणुकादिकं सर्वमनित्यम्, अवयवसमवेतं च । अनित्यमपि त्रिविधं शरीरेन्द्रियविषयभेदात् । पृथिवीतो यो विशेषस्तमाह किन्त्विति । देहमयोनिजम् अयोनिजमेवेत्यर्थः । जलीयम् शरीरमयोनिजं वरुणलोके प्रसिद्धम् ॥

## इन्द्रियं रसनं सिन्धुर्हिमादिर्विषयो मतः ॥ ४० ॥

इन्द्रियं जलीयमित्यर्थः । तथाहि रसनं जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात् सक्तुरसाभिव्यञ्जकोदकवत् रसनेन्द्रियसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं देयम् । विषयं दर्शयति सिन्धुर्हिमादिरिति। सिन्धुः-समुद्रः

हिमं-तुषारः, आदिपदात् सरित्कासारकरकादिः सर्वोऽपि ग्राह्यः। नच हिमकरकयोः कठिनत्वात् पार्थिवत्वमिति वाच्यम्। ऊष्मणा विलीनस्य तस्य जलत्वस्य प्रत्यक्षसिद्धत्वात् यद्द्रव्यं यद्द्रव्यध्वंसजन्यम् इति व्याप्तेर्जलोपादानोपादेयत्वसिद्धेः। अदृष्टविशेषेण द्रवत्वप्रतिरोधात् करकादौ काठिन्यप्रत्ययस्य भ्रान्तित्वात् ॥ ४० ॥

SANS 491.2 BHA

तेजो निरूपयति।

## उष्णःस्पर्शस्तेजसस्तु-

उष्णत्वं स्पर्शनिष्ठो जातिविशेषः प्रत्यक्षसिद्धः। इत्थं च जन्योष्णस्पर्शसमवायिकारणतावच्छेदकं तेजस्त्वं जातिविशेषः। तस्य परमाणुवृत्तित्वं तु जलत्वस्येवानुसन्धेयम् न चोष्णस्पर्शवत्त्वं चन्द्रकिरणादावव्याप्तमिति वाच्यम् तत्रापि उष्णत्वस्य सत्त्वात्। किन्तु तदन्तःपातिजलस्पर्शेनाभिभवात्तदग्रहः। एवं रत्नकिरणादौच पार्थिवस्पर्शेनाभिभवाच्चक्षुरादौ चानुद्भूतत्वादग्रहः ॥

## स्याद्रूपं शुक्लभास्वरम्।

वैश्वानरे मरकतकिरणादौ च पार्थिवरूपेणाभिभवात् शुक्लरूपाग्रहः। अथ तद्रूपाग्रहे धर्मिणोऽपि चाक्षुषत्वं न स्यादिति चेन्न। अन्यदीयरूपेणैव[1] धर्मिणो ग्रहसम्भवात्। शङ्खस्येव पित्तपीतिम्ना। वह्नेस्तु रूपं शुक्लं नाभिभूतं किन्तु तदीयं शुक्लत्वमभिभूतमित्यन्ये ॥

## नैमित्तिकं द्रवत्वं तु-

सुवर्णादिरूपे तेजसि तत्सत्त्वात्। नच न नैमित्तिकद्रवत्ववत्त्वं लक्षणं दहनादावव्याप्तेर्घृतादावतिव्याप्तेश्चेति वाच्यम्। पृथिव्यवृत्तिनैमित्तिकद्रवत्ववद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्य विवक्षितत्वात् ॥

१ पार्थिवरूपेणैवेत्यर्थः।



IGNCA RAR ACC. No. R-500

नित्यतादि च पूर्ववत् ॥ ४१ ॥

जलस्येवेत्यर्थः । तथाहि तत् द्विविधं नित्यमनित्यं च। नित्यं परमाणुरूपम्, तदन्यदनित्यम् अवयवि च । तच्च त्रिधा शरीरेन्द्रियविषयभेदात् । शरीरमयोनिजमेवेत्यर्थः । तच्च सूर्यलोकादौ प्रसिद्धम् ॥ ४१ ॥

अत्र यो विशेषस्तमाह ।

इन्द्रियं नयनं वह्निःस्वर्णादिर्विषयो मतः ।

ननु चक्षुषस्तैजसत्वे किंमानमिति चेदुच्यते। चक्षुस्तैजसम् परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रदीपवत्। प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वादाद्यं परकीयेति । घटादेः स्वीयरूपव्यञ्जकत्वात् व्यभिचारवारणाय द्वितीयं परकीयेति ।अथवा प्रभाया दृष्टान्तत्वसम्भवादाद्यं परकीयं न देयम्।चक्षुःसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं देयम्। विषयं दर्शयति वह्निरिति । ननु सुवर्णस्य तैजसत्वे किं मानमिति चेन्न।सुवर्णं तैजसम् असति प्रतिबन्धके अत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानद्रवत्वात्[१]।यन्नैवं तन्नैवं यथा पृथिवीति । न चाप्रयोजकं पृथिवीद्रवत्वस्य जन्यजलद्रवत्वस्य चात्यन्ताग्निसंयोगनाश्यत्वात् । ननु पीतिमगुरुत्वाश्रयस्य पार्थिवस्यापि तदानीं द्रुतत्वात्तेन व्यभिचार इति चेन्न । जलमध्यस्थमषीक्षोदवत्[२] तस्यद्रुतत्वात्[३] । अपरे तु पीतिमाश्रयस्य अत्यन्ताग्निसंयोगेऽपि पूर्वरूपापरावृत्तिदर्शनात् । तत्प्रतिबन्धकं विजातीयद्रवद्रव्यं कल्प्यते । तथाहि अत्यन्ताग्निसंयोगी पीतिमगुरुत्वाश्रयः विजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तः । अत्यन्ताग्निसंयोगे सत्यपि पूर्वरूपविजातीयरूपानधिकरणत्वात् । तप्तजलमध्यस्थपीतपटवत् । तस्य[४] च पृथिवीजलभिन्नस्य तेजस्त्वनियमात् ॥

---

१ अनुच्छिद्यमानद्रवत्वाधिकरणत्वादित्यर्थः । नतूच्छिद्यमानद्रवत्वानधिकरणत्वादिति गगनादौ व्यभिचारात् ।

२ क्षोदश्चूर्णम् । ३ पीतिमगुरुत्वाश्रयस्य । ४ द्रवद्रव्यस्येत्यर्थः ।

वायुं निरूपयति।

**अपाकजोऽनुष्णाशीतः स्पर्शस्तु पवने मतः ॥४२**
**तिर्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः।**
**पूर्ववन्नित्यताद्युक्तं देहव्यापि त्वगिन्द्रियम् ॥४३॥**

अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वादुक्तम् अपाकज इति। अपाकजस्पर्शस्य जलादावपि सत्त्वादुक्तम् अनुष्णाशीत इति। एतन वायवीयो विजातीयः स्पर्शो दर्शितः। तज्जनकतावच्छेदकं वायुत्वमिति भावः। एष वायुः स्पर्शादिलिङ्गकः। वायुर्हि स्पर्शशब्दधृतिकम्पैरनुमीयते। विजातीयस्पर्शेन, विलक्षणशब्देन, तृणादीनां धृत्या, शाखादीनां कम्पनेन च वायोरनुमानात्। यथा च वायुर्न प्रत्यक्षः तथाग्रे वक्ष्यते। पूर्ववदिति। वायुर्द्विविधः नित्योऽनित्यश्च। परमाणुरूपो नित्यस्तदन्योऽनित्यः। अवयव समवेतश्च। सोऽपि त्रिविधः शरीरेन्द्रियविषयभेदात्। तत्र शरीरमयोनिजं पिशाचादीनाम्,परन्तु जलीयतैजसवायवीयशरीराणां पार्थिवभागोपष्टम्भादुपभोगसाधनत्वं जलादीनां प्राधान्याज्जलीयत्वादिकमिति।अत्र यो विशेषस्तमाह देहव्यापीति। शरीरव्यापकं स्पर्शग्राहकमिन्द्रियं त्वक्। तच्च वायवीयम्। रूपादिषु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वात्। अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवत् ॥ ४२ ॥ ४३ ॥

विषयं दर्शयति।

**प्राणादिस्तु महावायुपर्यन्तो विषयो मतः।**

---

१ अत्र तृतीयार्थो विशेष्यत्वम् तस्यच अनुमाने निरूपकतासंबन्धेनान्वयः तथाच विजातीयस्पर्शः किंचिद्द्रव्याश्रितः स्पर्शत्वात् इत्यनुमितेः।किंचिद्द्रव्याश्रितत्वव्याप्यस्पर्शत्ववान् स्पर्शः इति लिङ्गपरामर्शात्मकानुमानस्य वा स्पर्शविशेषकत्वादिति भावः।

२ अनुमितिप्रकारस्तु योयं रूपवद्द्रव्यासमवेत :स्पर्शः स क्वचिदाश्रितः स्पर्शत्वात् पृथिवीसमवेतस्पर्शवत्।

यद्यपि अनित्यो वायुश्चतुर्विधः तस्य चतुर्थीविधा प्राणादिरित्युक्तमाकरे। तथापि संक्षेपादेव त्रैविध्यमुक्तम् प्राणस्त्वेक एव। हृदादिनानास्थानभेदात् मुखनिर्गमनादिनानाक्रियाभेदाच्च नानासंज्ञां लभत इति॥

आकाशं निरूपयति।

## आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः॥ ४४॥

आकाशकालदिशामेकैकव्यक्तित्वात् आकाशत्वादिकं न जातिः। किन्तु आकाशत्वं शब्दाश्रयत्वम्[१]। वैशेषिक इति कथनं तु विशेषगुणान्तरव्यवच्छेदाय। एतेन प्रमाणमपि दर्शितं तथाहि शब्दो गुणः चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्त्वात्, स्पर्शवत्। शब्दो द्रव्यसमवेतः गुणत्वात्। संयोगवत् इत्यनुमानेन शब्दस्य द्रव्यसमवेतत्वे सिद्धे शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात्[२], सुखवत्। पाकजरूपादौ व्यभिचारवारणाय सत्यन्तं, पटरूपादौ व्यभिचारवारणाय अकारणगुणपूर्वकेति, जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षेति। शब्दो न दिक्कालमनसां गुणः विशेषगुणत्वात्। रूपवत् नात्मविशेषगुणः बाहिरिन्द्रियग्राह्यत्वात् रूपवत्। इत्थञ्च शब्दाधिकरणं नवमं द्रव्यं गगनात्मकं सिध्यतीति। नच वाय्ववयवेषु सूक्ष्मशब्दक्रमेण वायौ कारणगुणपूर्वकः शब्द उत्पद्यतामिति वाच्यम् अयावद्[३]द्रव्यभावित्वेन वायोर्विशेषगुणत्वाभावात्॥४४॥

तत्र[४] च शरीरस्य विषयस्य चाभावात् इन्द्रियं दर्शयति।

## इन्द्रियं तु भवेच्छ्रोत्रमेकः सन्नप्युपाधितः।

---

१ आश्रयता चात्र समवायसंबन्धेन विवक्षिता तेन कालस्य जगदाधारत्वेन शब्दाश्रयत्वेपि न क्षतिः।

२ अकारणगुणपूर्वकत्वे सति प्रत्यक्षत्वादित्यर्थः।

३ स्वाश्रयनाशजन्यनाशप्रतियोगि यद्यत् तद्भिन्नत्वेनेत्यर्थः।

४ आकाशेचेत्यर्थः।

नन्वाकाशं लाघवादेकं सिद्धं श्रोत्रं पुरुषभेदात् भिन्नं कथमाकाशं स्यादिति चेत्तत्राह एक इति । आकाश एकः सन्नपि उपाधेः कर्णशष्कुलीभेदात् भिन्नं श्रोत्रात्मकं भवतीत्यर्थः ॥

कालं निरूपयति ।

## जन्यानां जनकः कालो जगतामाश्रयो मतः ॥ ४५ ॥

तत्र प्रमाणं दर्शयितुमाह जगतामिति । तथाहि इदानीं घट इत्यादि-प्रतीतिः सूर्यपरिस्पन्दादिकं यदा विषयीकरोति तदा सूर्यपरिस्पन्दादिना घटादेः सम्बन्धो वाच्यः सच संबन्धः संयोगादिर्न सम्भवतीति काल एव सम्बन्धघटकः[1] कल्प्यते ॥ इत्थं च तस्याश्रयत्वमपि सम्यक् ॥ ४५ ॥

प्रमाणान्तरं दर्शयति ।

## परापरत्वधीहेतुः–

परत्वापरत्वबुद्धेरसाधारणं निमित्तं काल एव परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयो लाघवादतिरिक्तः काल एव कल्प्यत इति भावः ॥

नन्वेकस्य कालस्य सिद्धौ क्षणदिनमासवर्षादिसमयभेदो न स्यादत आह ।

## क्षणादिः स्यादुपाधितः ।

कालस्त्वेकोऽपि उपाधिभेदात् क्षणादिव्यवहारविषयः । उपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म । पूर्वसंयोगावच्छिन्नविभागो[2] वा ।

---

१ स्वाश्रयतपनसंयोगिसंयोग एव संबन्धो बोध्यः ।

२ स्वजन्यविभागनाश्यपूर्वसंयोगविशिष्टस्वजन्यविभागः इत्यर्थः । तेन स्वजन्यविभागस्य यत्किंचित् पूर्वसंयोगविशिष्टस्य द्वित्रिक्षणवृत्तित्वेपि यत्किंचित् विभागस्य स्वजन्यविभागनाश्यपूर्वसंयोगविशिष्टस्य तथात्वेपि न क्षतिः ।

पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावो[1] वा । उत्तरसंयोगावच्छिन्नं[2] कर्म वा । न चोत्तरसंयोगानन्तरं क्षणव्यवहारो न स्यादिति वाच्यम् कर्म्मान्तरस्यापि सत्त्वादिति महाप्रलये क्षणादिव्यवहारो यद्यस्ति तदानायत्याध्वंसेनैवोपपादनीयः दिनादिव्यवहारस्तु तत्तत्क्षणकूटैरेवेति ॥

दिशं निरूपयति ।

## दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते ॥ ४६ ॥
## उपाधिभेदादेकापि प्राच्यादि व्यपदेशभाक् ।

दूरत्वम् अन्तिकत्वं च दैशिकं परत्वमपरत्वं बोध्यम् । तद्बुद्धेरसाधारणं बीजं दिगेव । दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया लाघवादेका दिक् सिध्यतीति भावः । ननु यद्येकैव दिक् तदा प्राचीप्रतीच्यादिव्यवहारः कथमुपपद्यते इत्यत आह उपाधिभेदादिति । यदा यत्पुरुषस्य[3] उदयगिरिसन्निहिता या दिक् सा तत्पुरुषस्य प्राची । एवमुदयगिरिव्यवहिता या दिक् सा प्रतीची । एवं यत्पुरुषस्य सुमेरुसन्निहिता या दिक् सोदीची तद्व्यवहिता त्ववाची । " सर्व्वेषामेव वर्षाणां मेरुरुत्तरतः स्थितः " इति नियमात् ॥

आत्मानं निरूपयति ।

## आत्मेन्द्रियाद्यधिष्ठाता—

आत्मत्वजातिस्तु[4] सुखदुःखादिसमवायिकारणतावच्छेदकतया सिध्य-

१ स्वजन्यविभागजन्यपूर्वसंयोगनाशावच्छिन्नस्वजन्योत्तरसंयोगप्रागभाव इत्यर्थः।

२ स्वनाशकोत्तरसंयोग इत्यर्थः । तेन सर्वस्यैव संयोगस्योत्तरसंयोगतया तद्विशिष्टकर्मणः क्षणचतुष्टयावस्थायिनो न क्षणत्वापत्तिः ।

३ पुरुषस्येति पदार्थमात्रोपलक्षणं पञ्चम्यर्थे षष्ठी ।

४ यद्यप्यात्मत्वस्यान्यात्मन्यप्रत्यक्षेपि स्वात्मनि स्वरूपतो मानसप्रत्यक्षविषयत्वमस्त्येव । तथापि सकलात्मसाधारणानुगतप्रत्यक्षासंभवेन जातिरूपं तत्र सिद्ध्यतीति तत्रानुमानमेव प्रमाणमित्यभिप्रायेण सुखदुःखादिसमवायिकारणतावच्छेदकतया तत्सिद्धिः प्रदर्शिता ।

ति ईश्वरेऽपि सा जातिरस्त्येव । अदृष्टादिरूपकारणाभावान्न सुखदुःखाद्युत्पत्तिः । नित्यस्य स्वरूपयोग्यस्य फलावश्यम्भावनियम इत्यस्याप्रयोजकत्वात् । परे त्वीश्वरे सा जातिर्नास्त्येव प्रमाणाभावात् । नच दशमद्रव्यत्वापत्तिः ज्ञानवत्त्वेन विभजनादित्याहुः । इन्द्रियाद्यधिष्ठाता इन्द्रियाणां शरीरस्य च परम्परया चैतन्यसम्पादकः ॥

**यद्यप्यात्मनि "अहं सुखी दुःखीत्यादि" प्रत्यक्षविषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्नस्तत्प्रतीतिगोचर इति प्रतिपादयितुं न शक्यत इत्यतः प्रमाणान्तरं दर्शयति ।**

## करणं हि सकर्तृकम् ॥ ४७ ॥

वास्यादीनां च्छिदाकरणानां कर्तारमन्तरेण फलानुपधानं दृष्टम् एवं चक्षुरादीनां ज्ञानकरणानां फलोपधानं कर्त्तारमन्तरेण नोपपद्यत इत्यतिरिक्तः कर्ता कल्प्यते ॥ ४६ ॥ ४७ ॥

Indira Gandhi National Centre for the Arts

**ननु शरीरस्यैव कर्तृत्वमस्तु अत आह ।**

## शरीरेषु न चैतन्यं मृतेषु व्यभिचारतः ।

ननु चैतन्यं ज्ञानादिकमेव मुक्तात्मनां त्वन्मत इव मृतशरीराणामपि तदभावे का क्षतिः प्राणाभावेन ज्ञानाभावस्य सिद्धेरिति चेन्न । शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थविरे स्मरणानुपपत्तेः । शरीराणामवयवोपचयापचयैरुत्पादविनाशशालित्वात् । नच पूर्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरसंस्कार उत्पाद्यत इति वाच्यम् अनन्तसंस्कारकल्पने गौरवात् । एवं शरीरस्य चैतन्ये बालकस्य स्तन्यपाने प्रवृत्तिर्न स्यात् इष्टसाधनताज्ञानस्य तद्धेतुत्वात्तदानीमिष्टसाधनत्वानुभावकाभावात् । मन्मते तु जन्मा-

---

१ जनकतासंबन्धेनावच्छेदकतासंबन्धेन वा ।

२ तद्धेतुत्वान्नाम प्रवृत्तिहेतुत्वात् ।

न्तरानुभूतेष्टसाधनत्वस्य तदानीं स्मरणादेवप्रवृत्तिः नच जन्मान्तरानुभूतमन्यदपि स्मर्यतामिति वाच्यम् उद्बोधकाभावात् । अत्र त्वनायत्या जीवनादृष्टमेवोद्बोधकं कल्प्यते । इत्थंच संस्कारस्यानादितया आत्मनोऽनादित्वसिद्धौ अनादिभावस्य नाशासम्भवात् नित्यत्वं सिध्यतीति बोध्यम् ॥

नतु चक्षुरादीनां ज्ञानादिकं प्रति करणत्वं कर्तृत्वं चास्तु विरोधे साधकाभावादत आह।

## तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः॥४८॥

तथात्वं-चैतन्यम् । उपघाते नाशे सति अर्थाच्चक्षुरादीनामेव, कथम् स्मृतिः पूर्वं चक्षुषानुभूतानां चक्षुरभावे स्मरणं न स्यात् अनुभवितुरभावात् । अन्येनानुभूतस्यान्येन स्मरणासंभवात् । अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावादिति भावः ॥ ४८ ॥

Indira Gandhi National Centre for the Arts

नतु चक्षुरादीनां चैतन्यं मास्तु मनसस्तु नित्यस्य चैतन्यं स्यात् अत आह।

## मनोपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत् ।

न तथा नचेतनम् ज्ञानाद्यनध्यक्षं तदाभवेत् मनसोऽणुत्वात् प्रत्यक्षे च महत्त्वस्य हेतुत्वान्मनसि ज्ञानसुखादिसत्त्वे तत्प्रत्यक्षानुपपत्तिरित्यर्थः । यथाच मनसोऽणुत्वं तथा अग्रे वक्ष्यते नन्वस्तु विज्ञानमेव आत्मा तस्य स्वतः प्रकाशरूपत्वात् चेतनत्वम् । ज्ञानसुखादिकं तु तस्यैवाकारविशेषः । तस्यापि भावत्वादेव क्षणिकत्वम् पूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञानहेतुत्वात् सुषुप्त्यवस्थायामप्यालयविज्ञानधारा निराबाधैव मृगमदवासनावासितवसन इव पूर्वपूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञाने संक्रान्तत्वान्नानुपपत्तिः स्मरणादेरिति चेन्न । तस्य जगद्विषयकत्वे सर्वज्ञत्वापत्तेः । यत्किञ्चिद्विषयकत्वे विनिगमनाविरहः।सुषुप्तावपि

विषयावभासप्रसङ्गश्च । ज्ञानस्य सविषयत्वात् तदानीं निराकारा चित्सन्ततिरनुवर्तत इति चेन्न । तस्याः प्रकाशत्वे प्रमाणाभावात् । अन्यथा घटादीनामपि ज्ञानत्वापत्तिः न चेष्टापत्तिः । विज्ञानव्यतिरिक्तवस्तुनोऽभावादिति वाच्यम् । घटादेरनुभूयमानस्यापलपितुमशक्यत्वात् आकारविशेष एवायं विज्ञानस्येति चेन्न । किमयमाकारोऽतिरिच्यते विज्ञानात्तर्हि समायातं विज्ञानव्यतिरिक्तेन नातिरिच्यते, चेत्तर्हि समूहालम्बने नीलाकारोऽपि पीताकारः स्यात् स्वरूपतो विज्ञानस्याविशेषात् अपोहरूपो नीलत्वादिर्विज्ञानधर्म इति चेन्न । नीलत्वादीनां विरुद्धानामेकस्मिन्नसमावेशात् । इतरथा विरोधावधारणस्यैव दुरुपपादत्वात् । नवा वासनासंक्रमः सम्भवति । मातृपुत्रयोरपि वासनासंक्रमप्रसङ्गात् । नच उपादानोपादेयभावो नियामक इति वाच्यम् वासनायाः संक्रमासंभवात् । उत्तरस्मिन्नुत्पत्तिरेव संक्रम इति चेन्न तदुत्पादकाभावात् । चितामेवोत्पादकत्वे संस्कारानन्त्यप्रसङ्गः । क्षणिकविज्ञानेष्वतिशयविशेषः कल्प्यत इति चेन्न मानाभावात् कल्पनागौरवात् । एतेन क्षणिकशरीरेष्वेव चैतन्यम् प्रत्युक्तं गौरवादतिशये मानाभावाच्च । बीजादावपि सहकारिसमवधानासमवधानाभ्यामेवोपपत्तेः । कुर्वद्रूपत्वाकल्पनात् । अस्तु तर्हि क्षणिकविज्ञाने गौरवान्नित्यविज्ञानमेवात्मा "अविनाशी वा अरे अयमात्मा सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादि श्रुतेश्चेति चेन्न । तस्य सविषयकत्वासम्भवस्य दर्शितत्वात् । निर्विषयस्य ज्ञानत्वे मानाभावा-

---

१ निर्विषया ।

२ विज्ञानसन्ततिः ।

३ ज्ञानत्वे ।

४ नीलपीते इति समूहालम्बने इत्यर्थः ।

५ एकत्वात् ।

६ अनीलव्यावृत्तिरूपः ।

७ विरुद्धनीलत्वादीनामेकत्र समावेशे ।

८ शक्तिविशेषः ।

९ कुर्वद्रूपत्वं च अङ्कुरजनकतावच्छेदकतया सिद्धो जातिविशेषः ।

त् । सविषयकत्वस्याप्यननुभवात् । अतो विज्ञानादिभिन्नो नित्य आत्मेति सिद्धम् सत्यं ज्ञानमिति ब्रह्मपरम् जीवे तु नोपयुज्यते ज्ञानाज्ञानसुखित्वादिभिर्जीवानां भेदसिद्धौ सुतरामीश्वरभेदःअन्यथा बन्धमोक्षव्यवस्थानुपपत्तेः । योऽपीश्वराभेदबोधको वेदः सोऽपि तदभेदेन तदीयत्वं प्रतिपादयन् स्तौति अभेदभावनयैव यतितव्यमिति वदति । अत एव "सर्वे एते आत्मानः समर्पिता" इति श्रूयते । मोक्षदशायामज्ञाननिवृत्तावभेदो जायत इत्यपि न भेदस्य नित्यत्वे नाशासंभवात् भेदनाशेऽपि व्यक्तिद्वयं स्थास्यत्येव । नच द्वित्वमपि नश्यतीति वाच्यम् तव निर्धर्मके ब्रह्मणि सत्यत्वाभावेऽपि सत्यस्वरूपं तदितिवत् द्वित्वाभावेऽपि व्यक्तिद्वयात्मकौ ताविति सुवचत्वात् । मिथ्यात्वाभावोऽधिकरणात्मकस्तत्र सत्यत्वमिति चेत् एकत्वाभावो व्यक्तिद्वयात्मको द्वित्वमित्युच्यताम् प्रत्येकमेकत्वेऽपि पृथिवीजलयोर्न गन्ध इतिवदुभयं नैकमित्यस्य सर्वजनसिद्धत्वात् । योऽपि तदानीमभेदप्रतिपादको वेदः सोऽपि निर्दुःखत्वादिना साम्यं प्रतिपादयति । सम्पदाधिक्ये, पुरोहितोऽयं राजा संवृत्त इतिवत् । अत एव " निरञ्जनः परमं साम्यमुपैति " इति श्रूयते । ईश्वरोपि न ज्ञानसुखात्मा किन्तु ज्ञानाद्याश्रयः " नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादौ विज्ञानपदेन विज्ञानाश्रय एवोक्तः "यः सर्वज्ञः" इत्याद्यनुरोधात् । आनन्दम् इत्यस्यापि आनन्दवदित्यर्थः । अर्शआदित्वान्मत्वर्थीयोच्प्रत्ययः अन्यथा पुल्लिङ्गत्वापत्तेः । आनन्दोऽपि दुःखाभावे उपचर्यते भाराद्यपगमे सुखी संवृत्तोऽहमितिवत्, अस्तु वा तस्मिन्नानन्दो नत्वसावानन्दः असुखमिति श्रुतेः।न विद्यते सुखं यस्येति कुतो नार्थःइति चेन्न क्लिष्टकल्पनापत्तेः। प्रकरणविरोधादानन्दमित्यत्र मत्वर्थीयाच्प्रत्ययविरोधश्चे-

१ असुखमित्यत्र नञा ब्रह्मणि सुखभेदबोधनादिति भावः ।

२ बहुव्रीहावन्यपदार्थलाभार्थं नञस्तत्र लक्षणापत्तेरित्यर्थः ।

३ आनन्दशब्दस्य पुल्लिङ्गत्वम् नियमेन । आनन्दमिति रूपस्य मत्वार्थीयाप्रत्ययं विनानुपपत्तेरिति भावः ।

ति संक्षेपः। एतेन प्रकृतिः कर्त्री पुरुषस्तु पुष्करपलाशवन्निर्लेपः किन्तु चेतनः कार्यकारणयोरभेदात्। कार्यनाशेसति कार्यरूपतयातन्नाशोपि न स्यादित्यकारणत्वम् तस्य। बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्या तत् कल्पनम्। बुद्धिश्च प्रकृतेः परिणामः। सैव महत्तत्त्वमन्तःकरणमपीत्युच्यते। तत्सत्त्वासत्त्वाभ्यां पुरुषस्य संसारापवर्गौ। तस्या एवेन्द्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिना सम्बन्धः। पुरुषे कर्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्च भेदाग्रहात्। ममेदं कर्तव्यमिति मदंशः पुरुषोपरागो[1] बुद्धेः स्वच्छतया तत्प्रतिबिम्बादतात्त्विको दर्पणस्येव मुखोपरागः। इदमिति विषयोपरागः इन्द्रियप्रणालिकया परिणतिभेदस्तात्त्विको निःश्वासाभिहतदर्पणस्येव मलिनिमा। कर्तव्यमिति व्यापारांशः। तेनांशत्रयवती बुद्धिस्तत्परिणामेन ज्ञानेन पुरुषस्यातात्त्विकः सम्बन्धो दर्पणस्य मलिम्नेव मुखस्योपलब्धिरुच्यते। ज्ञानवत् सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि बुद्धेरेव। कृतिसामानाधिकरण्येन प्रतीतेः।

नच बुद्धिश्चेतना। परिणामित्वात्[2] इति मतमपास्तम्। कृत्यदृष्टभोगानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेस्तद्भिन्ने मानाभावाच्च चेतनोऽहं करोमीति प्रतीतिः चैतन्यांशे भ्रमः इति चेत् कृत्यंशेपि किं नेष्यते। अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावोऽनित्यत्वे तत्पूर्वमसंसारापत्तिः। नन्वचेतनायाः प्रकृतेः कार्यत्वात् बुद्धेरचैतन्यं कार्यकारणयोस्तादात्म्यादिति चेन्न। असिद्धेः[3] कर्तुर्जन्यत्वे मानाभावात्। वीतरागजन्मादर्शनादनादित्वम्। अनादेर्[4]नाशासम्भवान्नित्यत्वम्। तत् किं प्रकृत्यादिकल्पनेन। नच "प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।

अहङ्कारविमूढात्मा कर्ताहमिति मन्यते॥"

---

१ पुरुषसंबन्धो दर्पणस्य यथा मुखसंबन्धः प्रतिबिम्बमात्रं नतु तात्त्विकः तथा बुद्धिपुरुषयोर्भेदाग्रहादेकत्वाभिमानः पुरुषोपराग इत्यर्थः।

२ अनित्यधर्माश्रयत्वादित्यर्थः।

३ बुद्धौ प्रकृतिकार्यत्वाभावादिति भावः।

४ भावस्येति शेषः जन्यभावत्वेन नाशहेतुत्वादिति भावः।

इत्यनेन विरोध इति वाच्यम् । प्रकृतेरदृष्टस्य गुणैरदृष्टजन्यैर्गुणैः इच्छादिभिः । कर्ताहमेवेत्यस्य तदर्थत्वात् " तत्रैवं सति कर्तारमात्मानं केवलं तु यः " इत्यादि वदता भगवता प्रकटीकृतोऽयमुपरिष्टादाशय इति संक्षेपः ॥

## धर्माधर्माश्रयः–

आत्मेत्यनुषज्यते । शरीरस्य तदाश्रयत्वे देहान्तरकृतकर्मणां देहान्तरेण भोगानुपपत्तेः ॥

**अध्यक्षो विशेषगुणयोगतः ॥ ४९ ॥**

योग्यविशेषगुणस्य ज्ञानसुखादेः सम्बन्धेनात्मनः प्रत्यक्षं संभवति न त्वन्यथा अहं जाने अहं करोमि इत्यादिप्रतीतेः ॥ ४९ ॥

## प्रवृत्त्याद्यनुमेयोऽयम्–

आत्मा परदेहादौ प्रवृत्त्यादिनाऽनुमीयते । प्रवृत्तिरत्र चेष्टा । ज्ञानेच्छाप्रयत्नादीनां देहे अभावस्योक्तप्रायत्वात् । चेष्टायाश्च प्रयत्नसाध्यत्वात् । चेष्टया प्रयत्नवानात्मानुमीयत इति भावः ॥

तत्र दृष्टान्तमाह ।

**रथगत्येव सारथिः ।**

यद्यपि रथकर्मचेष्टा न भवति तथापि तेन कर्मणा सारथिर्यथाऽनुमीयते तथा चेष्टात्मकेन कर्मणा परात्मानुमीयत इति भावः ॥

## अहङ्कारस्याश्रयोऽयम्–

अहङ्कारोऽहमिति प्रत्ययः तस्याश्रयो विषयः आत्मा न शरीरादिरिति॥

**मनोमात्रस्य गोचरः ॥ ५० ॥**

मनोभिन्नेन्द्रियजन्यप्रत्यक्षाविषयः मानसप्रत्यक्षविषयश्चेत्यर्थः । रूपाद्यभावेनेन्द्रियान्तरायोग्यत्वात् ॥ ५० ॥

---

१ शरीरस्य न चैतन्यामित्यनेनोक्तत्वादित्यर्थः ।

**विभुर्बुद्ध्यादिगुणवान्—**

विभुत्वं परममहत्परिमाणवत्त्वम् । तच्च पूर्वोक्तमपि स्पष्टार्थमुक्तम् । बुद्ध्यादिगुणवानिति । बुद्धिसुखदुःखेच्छादयश्चतुर्दश गुणाः पूर्वमुक्ता वेदितव्याः ॥

अत्रैव प्रसङ्गात् कतिपयबुद्धेः प्रपञ्चं दर्शयति ।

**बुद्धिस्तु द्विविधा मता ।**

द्वैविध्यं व्युत्पादयति ।

**अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा ॥५१॥**
**प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे ।**

एतासां चतसृणां करणानि चत्वारि प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रोक्तानि वेदितव्यानि । इन्द्रियजन्यं ज्ञानं[1] प्रत्यक्षम् । यद्यपि मनोरूपेन्द्रियजन्यं सर्वमेव ज्ञानं तथापि इन्द्रियत्वेन रूपेण इन्द्रियाणां यत्र ज्ञाने करणत्वं तत्प्रत्यक्षमिति विवक्षितम् । ईश्वरप्रत्यक्षन्तु न लक्ष्यम् । इन्द्रियार्थसन्निकर्षोत्पन्नं प्रत्यक्षं ज्ञानमव्यपदेश्यम् अव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति सूत्रे तथैवोक्तत्वात् । अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षम् । अनुमितौ व्याप्तिज्ञानस्य उपमितौ सादृश्यज्ञानस्य शाब्दबोधे पदज्ञानस्य स्मरणेऽनुभवस्य च हेतुत्वान्न तत्रातिव्याप्तिः । इदं लक्षणमीश्वरप्रत्यक्षसाधारणम् परामर्शजन्यं ज्ञान-

---

१ इदंच यथाश्रुताभिप्रायेण वस्तुतो मनोरूपेन्द्रियजन्यानुमित्यादावतिव्याप्तिवारणाय इन्द्रियत्वावच्छिन्नजनकतानिरूपितजन्यताविवक्षणस्यावश्यकतया ज्ञानपदं स्वरूपकीर्तनमेवेति ज्ञेयम् ।

२ निर्विकल्पकमित्यर्थः ।

३ ईश्वरप्रत्यक्षालक्ष्यत्वस्यैवाभिप्रेतत्वादित्यर्थः ।

मनुमितिः । यद्यपि परामर्शप्रत्यक्षादिकं परामर्शजन्यं तथापि परामर्शजन्यं हेत्वविषयकं ज्ञानमनुमितिः । नच कादाचित्कहेतुविषयकानुमितावव्याप्तिरिति वाच्यं तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् । अथवा व्याप्तिज्ञानकरणकं ज्ञानमनुमितिः एवं सादृश्यज्ञानकरणकं ज्ञानमुपमितिः पदज्ञानकरणकं ज्ञानं शाब्दबोधः । वस्तुतो यां काञ्चिदनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्तिप्रत्यक्षावृत्तिजातिमत्त्वम् अनुमितित्वम् । एवं यत्किञ्चित् प्रत्यक्षादिकमादाय तद्व्यक्तिवृत्त्यनुमित्यवृत्तिजातिमत्त्वं प्रत्यक्षत्वादिकं वाच्यमिति ॥

जन्यप्रत्यक्षं विभजते ।

## घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम् ॥ ५२ ॥

घ्राणजं रासनं चाक्षुषं स्पार्शनं श्रौत्रं मानसमिति षड्विधं प्रत्यक्षम् । नचेश्वरप्रत्यक्षस्याविभजनान्न्यूनत्वम् । जन्यप्रत्यक्षत्वस्यैव निरूपणीयत्वात् उक्तसूत्रानुसारात् ॥ ५१ ॥ ५२ ॥

## घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः ।

गोचर इति ग्राह्य इत्यर्थः । गन्धत्वादिरिति आदिपदात् सुरभित्वासुरभित्वादिपरिग्रहः । गन्धस्य प्रत्यक्षत्वात्तद्वृत्तिजातिरपि प्रत्यक्षा । गन्धाश्रयग्रहणे तु घ्राणस्य न सामर्थ्यमिति बोध्यम् ॥

## तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुतेः॥५३॥

---

१ आदिपदेन विशेषणतावच्छेदकप्रकारकानिश्चयविधया परामर्शजन्यस्य विशिष्टवैशिष्ट्यबोधस्य परिग्रहः ।

२ धूमवान् पर्वतो वह्निमानित्यनुमितौ पक्षतावच्छेदकविधया धूमस्य भानादिति भावः ।

३ अनुभवत्वन्यूनवृत्तित्वं तदर्थः तेन नानुभवत्वजातिमादाय प्रत्यक्षादावतिप्रसङ्गः ।

रसत्वादिसहित इत्यर्थः। तथाशब्दोपि शब्दत्वादिसहितः। गन्धो रसश्च उद्भूतो बोध्यः ॥ ५३ ॥

उद्भूतरूपं नयनस्य गोचरो
द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये ।
विभागसंयोगपरापरत्व-
स्नेहद्रवत्वं परिमाणयुक्तम् ॥ ५४ ॥

ग्रीष्मोष्मा दावनुद्भूतरूपमिति न तत् प्रत्यक्षम्। तद्वन्ति उद्भूतरूपवन्ति ५४

क्रिया जातिर्योग्यवृत्तिः समवायश्च तादृशः ।

पृथक्त्वादिकमपि योग्यव्यक्तिवृत्तिबोध्यम्। तादृशः योग्यव्यक्तिवृत्तिः॥

चक्षुर्योग्यत्वमेव कथं तदाह ।

गृह्णाति चक्षुःसंयोगादालोकोद्भूतरूपयोः ॥ ५५ ॥

आलोकसंयोग उद्भूतरूपं च चाक्षुषप्रत्यक्षे कारणम् । तत्र द्रव्यचाक्षुषं प्रति तयोः समवायसम्बन्धेन कारणत्वम् । द्रव्यसमवेतरूपादिप्रत्यक्षे स्वाश्रयसमवायसम्बन्धेन द्रव्यसमवेतसमवेतस्य रूपत्वादेः प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेनेति ॥ ५५ ॥

उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः ।

उद्भूतस्पर्शवद्द्रव्यं गोचरस्त्वचो गोचरः । सोऽपि उद्भूतस्पर्शोऽपि स्पर्शत्वादिसहितः ॥

रूपान्यच्चक्षुषो योग्यम्-

रूपभिन्नं रूपत्वादिभिन्नं च यत् चक्षुषो योग्यं तत् त्वगिन्द्रियस्यापि ग्राह्यम् । तथाच पृथक्त्वसंख्यादयो ये चक्षुर्ग्राह्या गुणा उक्ता एवं क्रिया

१ उद्भूतरूपालोकसंयोगयोः ।

जातयो योग्यवृत्तयः त्वचो ग्राह्या इत्यर्थः ॥

रूपमत्रापि कारणम् ॥ ५६ ॥

द्रव्याध्यक्षे-

अत्रापि त्वगिन्द्रियजन्येऽपि द्रव्यप्रत्यक्षे रूपं कारणम् तथाच बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणमिति। नवीनास्तु बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे रूपं न कारणं प्रमाणाभावात्। किन्तु चाक्षुषप्रत्यक्षे रूपं स्पार्शनप्रत्यक्षे स्पर्शः कारणम् अन्वयव्यतिरेकात्। बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे किं कारणमिति चेत् न किञ्चित्। आत्मावृत्तिशब्दभिन्नविशेषगुणवत्त्वं वा प्रयोजकमस्तु। रूपस्य कारणत्वे लाघवमिति चेन्न। वायोस्त्वगिन्द्रियेणाग्रहणप्रसङ्गादिष्टापत्तिरिति चेत् उद्भूतस्पर्श एव लाघवात् कारणमस्तु। प्रभाया अप्रत्यक्षत्वे त्विष्टापत्तिरित्येव किं न स्यात्। तस्मात् प्रभां पश्यामीतिवत् वायुं स्पृशामीति प्रत्ययसंभवात् वायोरपि प्रत्यक्षत्वं संभवत्येव। बहिर्द्रव्यप्रत्यक्षमात्रे न रूपस्य न वा स्पर्शस्य हेतुत्वं वायुप्रभयोरेकत्वं गृह्यत एव। क्वचित् द्वित्वादिकमपि। क्वचित् संख्यापरिमाणाद्यग्रहो दोषादित्याहुः ॥

त्वचो योगो मनसा ज्ञानकारणम्।

त्वङ्मनःसंयोगो ज्ञानसामान्ये कारणमित्यर्थः। किं तत्र प्रमाणम्? सुषुप्तिकाले त्वचं त्यक्त्वा पुरीततिवर्तमानेन मनसा ज्ञानाजननमिति। ननु सुषुप्तिकाले किं ज्ञानं भविष्यति अनुभवरूपं स्मरणरूपं वा? नाद्यः अनुभवसामग्र्यभावात् तथाहि प्रत्यक्षे चक्षुरादिना सह मनःसंयोगस्य हेतुत्वा-

---

१ तथाच वायुगतिसंख्यादिग्रहे इष्टापत्त्या वायोः स्पार्शनाङ्गीकारे बाधकाभाव इति।

२ सजातीयसंवलनादिरूपदोषादित्यर्थः।

त्तदभावादेव न चाक्षुषादिप्रत्यक्षम् ज्ञानादेरभावादेव न मानसं प्रत्यक्षं ज्ञानाद्यभावे च आत्मनोपि न प्रत्यक्षमिति व्याप्तिज्ञानाभावादेव नानुमितिः सादृश्यज्ञानाभावान्नोपमितिः पदज्ञानाभावान्न शाब्दबोधः । इत्यनुभवसामग्र्यभावान्नानुभवः उद्बोधकाभावाच्च न स्मरणम् । मैवम् सुषुप्तिप्राक्कालोत्पन्नेच्छादिव्यक्तेस्तत्संबन्धेनात्मनश्च प्रत्यक्षत्वप्रसङ्गात् तदतीन्द्रियत्वे मानाभावात् । सुषुप्तिप्राक्काले निर्विकल्पकमेव नियमेन जायते इत्यत्रापि प्रमाणाभावात् अथ ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वं तदा रासनचाक्षुषादिप्रत्यक्षकाले त्वाचप्रत्यक्षं स्यात् विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च सत्त्वात् परस्परप्रतिबन्धादेकमपि वा न स्यादिति । अत्र केचित् पूर्वोक्तयुक्त्या त्वङ्मनोयोगस्य ज्ञानहेतुत्वे सिद्धे चाक्षुषादिसामग्र्याः स्पार्शनादिप्रतिबन्धकत्वमनुभवानुरोधात् कल्प्यते इति । अन्येतु सुषुप्त्यनुरोधेन चर्ममनःसंयोगस्य ज्ञानहेतुत्वं कल्प्यते चाक्षुषादिप्रत्यक्षकाले त्वङ्मनःसंयोगाभावान्न त्वाचप्रत्यक्षमिति ॥

Indira Gandhi National Centre for the Arts

## मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः ॥५७॥

मनोजन्यप्रत्यक्षविषय इत्यर्थः । मतिर्ज्ञानम्, कृतिर्यत्नः, एवं सुखत्वदुःखत्वादिकमपि मनोग्राह्यम् एवमात्मापि मनोग्राह्यः । किंतु मनोमात्रस्य गोचर इत्यनेन पूर्वमुक्तत्वादत्र नोक्तः ॥ ५७ ॥

## ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते ।

चक्षुःसंयोगाद्यनन्तरं घट इत्याकारकं घटत्वादिविशिष्टं ज्ञानं न सम्भवति पूर्वं विशेषणस्य घटत्वादेर्ज्ञानाभावात् । विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् । तथाच प्रथमतः घटघटत्वयोर्वैशिष्ट्या-

---

१ उद्बोधकस्य फलवत्त्वकल्प्यत्वादिति भावः ।

२ अनुभवत्वस्य त्वयापि स्वीकृतत्वात् अन्यथा इष्टापत्त्यादिना त्वदुक्तापत्तेः असङ्गतत्वापातादिति भावः ।

नवगाह्येव ज्ञानं जायते तदेव निर्विकल्पकं तच्च न प्रत्यक्षम् । तथाहि वैशिष्ट्यानवगाहिज्ञानस्य प्रत्यक्षं न भवति घटमहं जानामीति प्रत्ययात्तत्रात्मनि ज्ञानं प्रकारीभूय भासते ज्ञाने घटस्तत्र घटत्वं प्रकारो यः स एव विशेषणमित्युच्यते विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकमित्युच्यते विशेषणतावच्छेदकप्रकारकं ज्ञानं विशिष्टवैशिष्ट्यज्ञाने कारणम् । निर्विकल्पके च घटत्वादिकं न प्रकारः तेन घटत्वादिविशिष्टघटादिवैशिष्ट्यभानं ज्ञाने न संभवति घटत्वाद्यप्रकारकं च घटादिविशिष्टज्ञानं न संभवति जात्यखण्डोपाध्यतिरिक्तपदार्थज्ञानस्य किंचिद्धर्मप्रकारकत्वनियमात् ॥

## महत्त्वं षड्विधे हेतुः—

द्रव्यप्रत्यक्षे महत्त्वं समवायसंबन्धेन कारणम् द्रव्यसमवेतानां गुणकर्मसामान्यानां प्रत्यक्षे स्वाश्रयसमवायसंबन्धेन द्रव्यसमवेतसमवेतानां गुणत्वकर्मत्वादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवायसंबन्धेन कारणमिति ॥

## इन्द्रियं करणं मतम् ॥ ५८ ॥
## विषयेन्द्रियसंबन्धो व्यापारः सोऽपि षड्विधः ।

अत्रापि षड्विध इत्यनुषज्यते । इन्द्रियत्वं न जातिः पृथिवीत्वादिना साङ्कर्यात् । किंतु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वम् । आत्मादिवारणाय सत्यन्तम् । उद्भूतविशेषगुणस्य श्रोत्रे सत्त्वाच्छब्देतरेति। विशेषगुणस्य रूपादेश्चक्षुरादावपि सत्त्वादुद्भूतेति । उद्भूतत्वं न जातिः शुक्लत्वादिना सङ्करात् । नच शुक्लत्वादिव्याप्यं

१ वैशिष्ट्यानिष्ठसांसर्गिकविषयताशून्यमेवेत्यर्थः ।
२ आत्मादौ यो अतिव्याप्तिरूपो दोषस्तद्वारणायेत्यर्थः ।

नानैवोद्भूतत्वमिति वाच्यम् । उद्भूतरूपत्वादिना चाक्षुषादौ जनकत्वानुपपत्तेः किंतु शुक्लत्वादिव्याप्यं नानैवानुद्भूतत्वम् तदभावकूटश्चोद्भूतत्वम् । तच्च संयोगादावप्यस्ति तथा च शब्देतरोद्भूतगुणः संयोगादिश्चक्षुरादावप्यस्त्यतो विशेषेति । कालादिवारणाय विशेष्यदलम् । इन्द्रियावयवविषयसंयोगस्यापि प्राचां मते प्रत्यक्षजनकत्वादिन्द्रियावयववारणाय । नवीनमते कालादौ रूपाभावप्रत्यक्षे सन्निकर्षघटकतया कारणीभूतचक्षुःसंयोगाश्रयस्य कालादेर्वारणाय मनःपदम् । ज्ञानकारणमित्यपि तद्वारणाय । करणमिति । असाधारणं कारणं करणम् । असाधारणत्वं व्यापारवत्त्वम् व्यापारः[2] सन्निकर्षः ॥

षड्विधं सन्निकर्षमुदाहरणद्वारा प्रदर्शयति ।

**द्रव्यग्रहस्तु संयोगात्संयुक्तसमवायतः ॥ ५९ ॥**
**द्रव्येषु समवेतानां तथा तत्समवायतः ।**
**तत्रापि समवेतानां शब्दस्य समवायतः ॥६०॥**
**तद्वृत्तीनां समवेतसमवायेन तु ग्रहः ।**
**विशेषणतया तद्वदभावानां ग्रहो भवेत् ॥ ६१ ॥**
**यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते ।**
**प्रत्यक्षं समवायस्य विशेषणतया भवेत् ॥६२॥**

द्रव्यप्रत्यक्षमिन्द्रियसंयोगजन्यम् । द्रव्यसमवेतप्रत्यक्षमिन्द्रियसंयुक्तसमवायजन्यम् । एवमग्रेपि वस्तुतस्तु द्रव्यचाक्षुषं प्रति चक्षुःसंयोगकारणं द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः कारणम् द्रव्यसमवेतसमवेतचा-

---

१ एकैकस्य कारणतावच्छेदकत्वे व्यभिचारात् कूटस्यैकत्रावृत्तितया कारणतानवच्छेदकत्वादिति भावः ।

२ जन्यत्वघटितस्य व्यापारत्वस्य श्रोत्रसंबन्धे समवायरूपे अभावादाह व्यापार इति ।

क्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः एवमन्यत्रापि विशिष्यैव कार्यकारणभावः । परंतु पृथिवीपरमाणुनीले नीलत्वम् पृथिवीपरमाणौ पृथिवीत्वं च चक्षुषा कथं न गृह्यते तत्र परंपरयोद्भूतरूपसंबन्धस्य महत्त्वसंबन्धस्य च सत्त्वात् । तथाहि नीले नीलत्वजातिरेकैव घटनीले परमाणुनीले च वर्तते तथा च महत्त्वसंबन्धो घटनीलमादाय वर्तते । उद्भूतरूपसंबन्धस्तूभयमादायैव वर्तते एवं पृथिवीत्वेपि घटादिकमादाय महत्त्वसंबन्धो बोध्यः । एवं वायौ तदीयस्पर्शादौ च सत्तायाश्चाक्षुषप्रत्यक्षं स्यात् तस्मादुद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्य द्रव्यसमवेतचाक्षुषे तादृशचक्षुःसंयुक्तसमवेतसमवायस्य द्रव्यसमवेतसमवेतचाक्षुषे कारणत्वम् वाच्यम् इत्थं च परमाणुनीलादौ न नीलत्वादिग्रहः परमाणौ चक्षुःसंयोगस्य महत्त्वावच्छिन्नत्वाभावात् । एवं वाय्वादौ न सत्तादिचाक्षुषं तत्र चक्षुःसंयोगस्य उद्भूतरूपावच्छिन्नत्वाभावात् । एवं यत्र घटस्य पृष्ठावच्छेदेनालोकसंयोगः चक्षुःसंयोगस्त्वग्रावच्छेदेन तत्र घटप्रत्यक्षाभावात् आलोकसंयोगावच्छिन्नत्वं चक्षुःसंयोगे विशेषणम् देयम्। एवं द्रव्यस्पार्शनप्रत्यक्षे त्वक्संयोगः कारणम् द्रव्यसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवायः। द्रव्यसमवेतसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवेतसमवायः अत्रापि महत्त्वावच्छिन्नत्वमुद्भूतस्पर्शावच्छिन्नत्वं च पूर्ववदेव बोध्यम्। एवं गन्धप्रत्यक्षे घ्राणसंयुक्तसमवायः गन्धसमवेतस्य घ्राणजप्रत्यक्षे घ्राणसंयुक्तसमवेतसमवायः रासनप्रत्यक्षे रसना-

---

१ स्वाश्रयसमवेतसमवेतत्वादिसंबन्धेन ।

२ उद्भूतरूपावच्छिन्नत्वस्य महत्त्वावच्छिन्नत्वस्य च चक्षुःसंयुक्तपदार्थैकदेशे संयोगे अन्वयः । यद्यपि सामानाधिकरण्यसंबन्धेन संयोगे रूपावच्छिन्नत्वनिवेशापेक्षया संयुक्त एव समवायेन रूपावच्छिन्नत्वनिवेश एव लाघवम् । तथापि विभिन्नावच्छेदेनालोकचक्षुःसंयोगाभ्यां दण्डादिप्रत्यक्षवारणायाग्रे चक्षुःसंयोगे आलोकसंयोगनिष्ठावच्छेदकतानिरूपकत्वस्य विवक्षणीयतया तत्रैव महत्त्वोद्भूतरूपवैशिष्ट्यं निवेशितम् एकत्रैकं विशेषणमपरत्र विशेषणद्वयमिति स्वीकारे अर्धजरतीन्यायापत्तेरिति ज्ञेयम् ।

संयुक्तसमवायः रससमवेतरासनप्रत्यक्षे रसनासंयुक्तसमवेतसमवायः कारणम् शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः शब्दसमवेतश्रावणप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः कारणम् । अत्र सर्वं प्रत्यक्षं लौकिकं बोध्यम् । वक्ष्यमाणमलौकिकप्रत्यक्षमिन्द्रियं संयोगादिकं विनापि संभवति एवमात्मप्रत्यक्षे मनःसंयोगः आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवायः आत्मसमवेतसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवेतसमवायः कारणम् अभावप्रत्यक्षे समवायप्रत्यक्षे चेन्द्रियसंबद्धविशेषणता हेतुः वैशेषिकमते तु समवायो न प्रत्यक्षः[2] अत्र यद्यपि विशेषणता नानाविधा तथाहि भूतलादौ घटाद्यभावः संयुक्तविशेषणतया गृह्यते संख्यादौ रूपाद्यभावः संयुक्तसमवेतविशेषणतया संख्यात्वादौ रूपाद्यभावः । संयुक्तसमवेतसमवेतविशेषणतया शब्दाभावः केवलश्रोत्रावच्छिन्नविशेषणतया कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया । एवं कत्वाद्यवच्छिन्नाभावे गत्वाभावादिकं श्रोत्रावच्छिन्नविशेषणतया घटाभावादौ पटाभावः चक्षुःसंयुक्तविशेषणविशेषणतया एवमन्यत्राप्यूह्यम् । तथापि विशेषणतात्वेनैकैव सा गण्यते अन्यथा षोढा सन्निकर्ष इति प्राचां प्रवादो व्याहन्येत । यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते इति। अत्राभावप्रत्यक्षे योग्यानुपलब्धिः कारणम्। तथाहि भूतलादौ घटादिज्ञाने जाते घटाभावादिकं न ज्ञायते । तेनाभावोपलम्भे प्रतियोग्युपलम्भाभावः कारणम् तत्र योग्यताप्यपेक्षिता । सा च प्रतियोगिसत्त्वप्रसञ्जनप्रसाञ्जितप्रतियोगिकत्वरूपा तदर्थश्च प्रतियोगिनो

---

१ समवाये श्रोत्रावच्छिन्नत्वानिवेशे सकलपुरुषाणां सर्वशब्दप्रत्यक्षापत्तिः ।

२ संबन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वादिति भावः न्यायमते तु संबन्धप्रत्यक्षत्वं न कार्यतावच्छेदकं संबन्धत्वस्य अनुगतस्य निर्वक्तुमशक्यत्वात् । सांसर्गिकविषयतावत्त्वस्य कथंचित् सुवचत्वेपि तादृशसंबन्धत्वस्य घटत्वादिसाधारणतया तत्प्रत्यक्षापत्तेः । अपि तु संयोगप्रत्यक्षत्वमेव कार्यतावच्छेदकमतः समवायस्य तन्मते न प्रत्यक्षत्वानुपपत्तिरिति बोध्यम् ।

घटादेः सत्त्वप्रसक्त्या प्रसञ्जितउपलम्भरूपः प्रतियोगी यस्य सोऽभावप्रत्यक्षे हेतुः । तथाहि यत्रालोकसंयोगादिकं वर्तते यद्यत्र घटः स्यात्तर्हि उपलभ्येतेत्यापादयितुं शक्यते तत्र घटाभावादेः प्रत्यक्षं भवति ।

अन्धकारे तु नापादयितुं शक्यते तेन घटाभावादेरन्धकारे न चाक्षुषप्रत्यक्षम् । स्पार्शनप्रत्यक्षं तु भवत्येव । आलोकसंयोगं विनापि स्पार्शनप्रत्यक्षस्यापादयितुं शक्यत्वात् । गुरुत्वादिकं यदयोग्यं तदभावस्तु न योग्यः । तत्र गुरुत्वादिप्रत्यक्षस्यापादयितुमशक्यत्वात् । वायावुद्भूतरूपाभावः । पाषाणे सौरभाभावः । गुडे तिक्ताभावः । वह्नावनुष्णत्वाभावः । श्रोत्रे शब्दाभावः । आत्मनि सुखाद्यभावः । एवमादयस्तत्तदिन्द्रियैर्गृह्यन्ते । तत्तत्प्रत्यक्षस्यापादयितुं शक्यत्वात् संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता । अन्योन्याभावप्रत्यक्षेऽधिकरणयोग्यतापेक्षिता । अतस्तम्भादौ पिशाचादिभेदोपि चक्षुषा गृह्यते एव । प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधम् । तत्र लौकिकप्रत्यक्षे षोढा सन्निकर्षो वर्णितः ॥५९॥६०॥६१॥६२॥

अलौकिकसान्निकर्षस्त्वधुना उच्यते ।

## अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः । सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥६३॥

व्यापारः सन्निकर्षः सामान्यलक्षण इति सामान्यं लक्षणं यस्येत्यर्थः । तत्र लक्षणपदेन यदि स्वरूपमुच्यते तदा सामान्यस्वरूपाप्रत्या-

---

१ आपादितः । २ उपलम्भाभावः ।

३ अत्र तदधिकरणविषयकाभावप्रत्यक्षे तदधिकरणकतदापादककापत्ति योग्यतदुपलम्भस्य विषयतासंबन्धावच्छिन्नप्रतियोगिताकाभावोहेतुरित्यर्थः ।

४ धूमत्वादिसामान्यलक्षणाया इन्द्रियजन्यत्वाभावात् व्यापारत्वकथनमसङ्गत इत्यभिप्रेत्य सन्निकर्षकथनम् ।

सत्तिरित्यर्थो लभ्यते । तच्चेन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतं बोध्यम् । तथाहि यत्रेन्द्रियसंयुक्तो धूमादिस्तद्विशेष्यकं धूम इति ज्ञानं जातम् तत्र ज्ञाने धूमत्वं प्रकारस्तत्र धूमत्वेन सन्निकर्षेण धूमा इत्येवं रूपं सकलधूमविषयकं ज्ञानं जायते । अत्र यदीन्द्रियसंबद्धमित्येवोच्यते तदा धूलिपटले धूमभ्रमानन्तरं सकलधूमविषयकं ज्ञानं न स्यात् तत्र धूमत्वेन सह इन्द्रियसंबन्धाभावात् मन्मते तु इन्द्रियसंबद्धं धूलिपटलं तद्विशेष्यकं धूम इति ज्ञानं तत्र प्रकारीभूतं धूमत्वं प्रत्यासत्तिः । इन्द्रियसंबन्धश्च लौकिको[२] ग्राह्यः । इदं च बहिरिन्द्रियस्थले । मानसस्थले तु ज्ञानप्रकारीभूतं सामान्यं प्रत्यासत्तिः । परंतु समानानां भावः सामान्यम् तच्च क्वचिन्नित्यं धूमत्वादि क्वचिच्चानित्यम् घटादिः यत्रैको घटः संयोगेन भूतले समवायेन कपाले वा ज्ञातः तदनन्तरं च सर्वेषामेव तद्घटवतां भूतलादीनां कपालादीनां वा ज्ञानं भवति अत्रेदं बोध्यम् । परंतु सामान्यं येन संबन्धेन ज्ञायते तेन संबन्धेनाधिकारणानां प्रत्यासत्तिः । किंतु यत्र तद्घटनाशानन्तरं तद्घटवतां स्मरणं जातं तत्र सामान्यलक्षणया सर्वेषां तद्घटवतां भानं न स्यात् सामान्यस्य तदानीमभावात् ॥ ६३ ॥

किंचेन्द्रियसंबद्धविशेष्यकं घट इति ज्ञानं यत्र जातं तत्र परदिने इन्द्रियसंबन्धं विनापि तादृशज्ञाने प्रकारीभूतसामान्यस्य सत्त्वात् तादृशज्ञानं कुतो न जन्यते । तस्मात्सामान्यविषयकं ज्ञानं प्रत्यासत्तिः नतु सामान्यमित्याह ।

## आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते ।

आसत्तिः प्रत्यासत्तिरित्यर्थः । तथाच सामान्यलक्षण इत्यत्र लक्षण-

१ सामान्यस्वरूपं च ।

२ इह लौकिकसन्निकर्षस्य विशेषणविधया घटकत्वं बोध्यम् ।

शब्दस्य विषयोऽर्थः । तेन सामान्यविषयकं ज्ञानं प्रत्यासत्तिरित्यर्थो लभ्यते॥

ननु चक्षुःसंयोगादिकं विनापि सामान्यज्ञानं यत्र प्रवर्तते तत्र सकलघटादीनां चाक्षुषप्रत्यक्षं स्यादत आह ।

**तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्षते ॥ ६४ ॥**

अस्यार्थः यदा बहिरिन्द्रियेण सामान्यलक्षणया ज्ञानं जननीयं तदा यत्किंचिद्धर्मिणि तत्सामान्यस्य तदिन्द्रियजन्यज्ञानस्य सामग्र्यपेक्षिता सा च सामग्री चक्षुःसंयोगालोकसंयोगादिकम् तेनान्धकारादौ चक्षुरादिना तादृशं ज्ञानं न जन्यते ॥ ६४ ॥

ननु ज्ञानलक्षणा प्रत्यासत्तिर्यदि ज्ञानरूपा सामान्यलक्षणापि ज्ञानरूपा तदा तयोर्भेदो न स्यादत आह ।

**विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ।**

सामान्यलक्षणा प्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जनयति ज्ञानलक्षणा प्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिः । अत्रायमर्थः प्रत्यक्षे सन्निकर्षं विना भानं न संभवति तथाच सामान्यलक्षणं विना धूमत्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनां च भानं कथं भवेत् तदर्थं सामान्यलक्षणा स्वीक्रियते नच सकलवह्निधूमभानाभावे का क्षतिरिति वाच्यम् प्रत्यक्षधूमे वह्निसंबन्धस्य गृहीतत्वात् अन्यधूमस्य चानुपस्थितत्वात् धूमो वह्निव्याप्यो न वेति संशयानुपपत्तेः । मन्मते तु सामान्यलक्षणया सकलधूमोपस्थितौ कालान्तरीयदेशान्तरीयधूमे वह्निव्याप्यत्वसन्देहः संभव-

---

१ इन्द्रियसंबद्धविशेष्यकं सामान्यप्रकारकं ज्ञानमित्यर्थः । यद्वा सामान्यविषयकं ज्ञानमात्रमित्यर्थः । सामान्यविषयकज्ञानत्वं प्रत्यासत्तितावच्छेदकमिति यावत् अत्र कल्पे इन्द्रियसंबद्धविशेष्यकत्वप्रकारकत्वतदिन्द्रियजन्यत्वानि विशेषणानि ज्ञानस्य नोपादेयानीति ज्ञेयम् ।

ति नच सामान्यलक्षणास्वीकारे प्रमेयत्वेन सकलप्रमेयज्ञाने जाते सार्वज्ञ्यापत्तिरिति वाच्यम् प्रमेयत्वेन सकलप्रमेयज्ञाने जातेपि विशिष्यसकलपदार्थानामज्ञातत्वेन सार्वज्ञ्याभावात् । एवं ज्ञानलक्षणाया अस्वीकारे सुरभिचन्दनमिति ज्ञाने सौरभस्य ज्ञानं कथं स्यात् अत्र यद्यपि सामान्यलक्षणयापि सौरभस्य भानं सम्भवति तथापि सौरभत्वस्य भानं ज्ञानलक्षणया । एवं यत्र धूमत्वेन धूलिपटलं ज्ञातं धूलिपटलस्यानुव्यवसाये भानं ज्ञानलक्षणया[1] ।।

**योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ॥ ६५ ॥**

योगाभ्यासजनितो धर्मविशेषः श्रुतिपुराणादिप्रतिपाद्य इत्यर्थः । युक्तयुञ्जानरूपयोगिद्वैविध्याद्धर्मस्यापि द्वैविध्यमिति भावः ।। ६५ ।।

**युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः ।**

युक्तस्य तावद्योगजधर्मसहायेन मनसा आकाशपरमाण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति द्वितीयस्य चिन्ताविशेषोपि सहकारीति ॥

इति श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचितायां सिद्धान्तमुक्तावल्यां प्रत्यक्षपरिच्छेदः ।

अनुमितिं व्युत्पादयति ।

**व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् ॥ ६६ ॥**

**अनुमायाम्—**

अनुमितौ व्याप्तिज्ञानं करणम् परामर्शो व्यापारः तथाहि येन पुरुषेण

---

१ ज्ञानलक्षणयैव तत्र धूमत्वज्ञानरूपसामान्यलक्षणायाः स्वविषयधूमत्वाश्रयत्वसंबन्धेन धूलिपटले अभविनं सामान्यलक्षणया अनुव्यवसाये धूलिपटलभानासंभवादिति भावः ।

महानसादौ धूमे वह्निव्याप्तिर्गृहीता पश्चात्स एव पुरुषः क्वचित्पर्वतादावविच्छिन्नमूलां धूमरेखां पश्यति तदनन्तरं धूमो वह्निव्याप्य इत्येवं रूपं व्याप्तिस्मरणं तस्य भवति पश्चाच्च वह्निव्याप्यधूमवानयमिति ज्ञानम् सएव परामर्श इत्युच्यते तदनन्तरं पर्वतो वह्निमानित्यनुमितिर्जायते ॥

अत्र प्राचीनास्तु व्याप्यत्वेन ज्ञायमानं धूमादिकम् लिङ्गमनुमिति करणमिति वदन्ति तद्दूषयति ।

## ज्ञायमानं लिङ्गं तु करणं न हि ।

लिङ्गस्यानुमित्यकरणत्वे युक्तिमाह ।

## अनागतादिलिङ्गेन न स्यादनुमितिस्तदा ॥ ६७ ॥

यद्यनुमितौ लिङ्गं करणं स्यात्तदाऽनागतेन लिङ्गेन विनष्टेन चानुमितिर्न स्यात्।अनुमितिकरणस्य लिङ्गस्य तदानीम् अभावादिति[1]॥६६॥६७॥

## व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते ।

व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहिज्ञानमनुमितौ जनकं तच्च पक्षे व्याप्य इति ज्ञानं पक्षो व्याप्यवानिति ज्ञानं वा । अनुमितिस्तु पक्षे व्याप्य इति ज्ञानात् पक्षे साध्यमित्याकारिका पक्षो व्याप्यवानिति ज्ञानात् पक्षः साध्यवानित्याकारिका द्विविधादपि परामर्शात् पक्षःसाध्यवानित्येवानुमितिरित्यन्ये । ननु वह्निव्याप्यधूमवान् पर्वत इति ज्ञानं विनापि यत्र पर्वतो धूमवानिति प्रत्यक्षं ततो वह्निव्याप्यो धूम इति स्मरणम् तत्र ज्ञानद्वयादेवानुमितेर्दर्शनात् । व्याप्तिविशिष्टवैशिष्ट्यावगाहि ज्ञानं सर्वत्र न कारणम् । किन्तु व्याप्यतावच्छेदक-

---

१ ननु परामर्शरूपव्यापारसंबन्धेन तदानीं लिङ्गमस्त्येवेति चेत् न अतीतादिलिङ्गस्य परामर्शाजनकतया परामर्शस्य तद्व्यापारत्वासम्भवादिति बोध्यम् ।

प्रकारकपक्षधर्मताज्ञानत्वेन कारणत्वमावश्यकत्वात् । तत्र विशिष्टज्ञानकल्पने गौरवाच्चेति चेन्न । व्याप्यतावच्छेदकाज्ञानेपि वह्निव्याप्यवानिति ज्ञानादनुमित्युत्पत्तेर्लाघवाच्च । व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन हेतुत्वम् किञ्च धूमवान् पर्वत इति ज्ञानादनुमित्यापत्तिः व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकस्य पक्षधर्मताज्ञानस्य सत्त्वात् नच गृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वमिति वाच्यम् । चैत्रस्य व्याप्तिग्रहे मैत्रस्य पक्षधर्मताज्ञानात् अनुमितिः स्यात् यदितु तत्पुरुषीयगृह्यमाणव्याप्यतावच्छेदकप्रकारकं तत्पुरुषीयपक्षधर्मताज्ञानं तत्पुरुषीयानुमितौ हेतुरित्युच्यते तदानन्तकार्यकारणभावः । मन्मते तु समवायसंबन्धेन व्याप्तिप्रकारकपक्षधर्मताज्ञानं समवायसंबन्धेनानुमितिं जनयतीति नानन्तकार्यकारणभावः यदितु व्याप्तिप्रकारकं पक्षधर्मताज्ञानं च स्वतन्त्रं कारणमित्युच्यते तदा कार्यकारणभावद्वयम् वह्निव्याप्यो धूमः आलोकवान् पर्वत इति ज्ञानादप्यनुमितिः स्यात् । इत्थंच यत्र ज्ञानद्वयं तत्रापि विशिष्टज्ञानं कल्पनीयम् फलमुखगौरवस्यादोषात्[१] व्याप्यो नाम व्याप्त्याश्रयः ॥

तत्र व्याप्तिः केत्यत आह ।

## व्याप्तिः साध्यवदन्यस्मिन्न संबन्ध उदाहृतः॥६८॥

वह्निमान् धूमादित्यादौ साध्यो वह्निः साध्यवान् महानसादिस्तदन्यो जलहृदादिस्तद्वृत्तित्वं धूमस्येति लक्षणसमन्वयः धूमवान् वह्नेरित्यादौ साध्यवदन्यस्मिंस्तप्तायःपिण्डादौ वह्नेः सत्त्वान्नातिव्याप्तिः अत्र येन संबन्धेन साध्यं तेनैव संबन्धेन साध्यवान् बोध्यः । अन्यथा समवायसंबन्धेन वह्निमान्वह्नेरवयवस्तदन्यो महानसादिस्तत्र धूमस्य विद्य-

१ फलं कार्यकारणभावः तन्मुखं तदधीनं गौरवज्ञानमित्यर्थः ।

मानत्वादव्याप्तिप्रसङ्गात् साध्यवदन्यश्च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवान् बोध्यः । तेन यत्किंचिद्वह्निमतो महानसादेर्भिन्ने पर्वतादौ धूमसत्त्वेपि न क्षतिः येन संबन्धेन हेतुता तेनैव संबन्धेन साध्यवदन्यावृत्तित्वं बोध्यम् तेन साध्यवदन्यस्मिन्धूमस्य समवायसंबन्धेन सत्त्वेपि न क्षतिः । साध्यवदन्यावृत्तित्वं च साध्यवदन्यवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावः तेन धूमवान् वह्नेरित्यत्र साध्यवदन्यजलह्रदादिवृत्तित्वाभावेपि नातिव्याप्तिः । अत्र यद्यपि द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ विशिष्टसत्तायाः शुद्धसत्तायाश्चैक्यात् साध्यवदन्यस्मिन् गुणादाववृत्तित्वन्नास्ति तथापि हेतुतावच्छेदकरूपेणावृत्तित्वं वाच्यम् हेतुतावच्छेदकं वृत्तितानवच्छेदकमिति फलितोर्थः ॥ ६८ ॥

ननु केवलान्वयिनि ज्ञेयत्वादौ साध्ये साध्यवदन्यस्याप्रसिद्धत्वादव्याप्तिः किंच[1] सत्तावान् जातेरित्यादौ साध्यवदन्यस्मिन् सामान्यादौ हेतुतावच्छेदकसंबन्धेन समवायेन वृत्तेरप्रसिद्धत्वादव्याप्तिरत आह।

अथवा हेतुमन्निष्ठविरहाप्रतियोगिना ।
साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते ॥ ६९ ॥

हेतुमति निष्ठा वृत्तिर्यस्य स तथा विरहोऽभावः । तथाच हेत्वधिकरणवृत्तिर्योऽभावस्तदप्रतियोगिना साध्येन सह हेतोः सामानाधिकरण्यं व्याप्तिरुच्यते । अत्र यद्यपि वह्निमान् धूमादित्यादौ हेत्वधिकरणपर्वतादिवृत्त्यभावप्रतियोगित्वं तत्तद्वह्न्यादेरस्तीत्यव्याप्तिः । नच समानाधिकरणवह्निधूमयोरेव व्याप्तिरिति वाच्यम् तत्तद्वह्न्यादेरप्युभ-

---

१ ननु केवलान्वयित्वज्ञानकाले पक्षताघटकसंशयाभावान्नैवानुमितिः तच्छून्यकाले तु भ्रमात्मकव्याप्तिज्ञानादनुमितिर्भवत्येवेत्यत आह किं चेति ।

याभावसत्त्वादेकसत्त्वेपि द्वयं नास्तीति प्रतीतेः किंच गुणवान् द्रव्यत्वादित्यादावव्याप्तिश्च तथापि साध्यतावच्छेदकं प्रतियोगितानवच्छेदकं यत् तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति वाच्यम् ननु रूपत्वव्याप्यजातिमत्त्वात् पृथिवीत्वादित्यादौ साध्यतावच्छेदिकारूपत्वव्याप्यजातयस्तासां च शुक्लत्वादिजातीनां नीलघटादिवृत्त्यभावप्रतियोगितावच्छेदकत्वमस्तीत्यव्याप्तिरिति चेन्न । तत्र परम्परया[2] रूपत्वव्याप्यजातित्वस्यैव साध्यतावच्छेदकत्वात् नहि तादृशधर्मावच्छिन्नाभावः क्वापि पृथिव्यामस्ति रूपत्वव्याप्यजातिमान्नास्तीति बुद्ध्यापत्तेः । साध्यादिभेदेन व्याप्तेर्भेदात् तादृशस्थले साध्यतावच्छेदकतावच्छेदकं प्रतियोगितावच्छेदकतानवच्छेदकमित्येव लक्षणघटकमित्यपि वदन्ति । हेत्वधिकरणं हेतुतावच्छेदकविशिष्टाधिकरणं वाच्यम् । तेन द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ शुद्धसत्ताधिकरणगुणादिनिष्ठाभावप्रतियोगित्वेपि द्रव्यत्वस्य नाव्याप्तिः । हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणं बोध्यम् तेन समवायेन धूमाधिकरणतदवयवनिष्ठाभावप्रतियोगित्वेपि वह्नेर्नाव्याप्तिः । अभावश्च प्रतियोगिव्यधिकरणो बोध्यः तेन कपिसंयोगी एतद्वृक्षत्वादित्यत्र मूलावच्छेदेनैतद्वृक्षवृत्तिकपिसंयोगाभावप्रतियोगित्वेपि कपिसंयोगस्य नाव्याप्तिः । नच प्रतियोगिव्यधिकरणत्वं यदि प्रतियोग्यनधिकरणवृत्तित्वं तदा तथैवाव्याप्तिः ।

प्रतियोगिनः कपिसंयागस्यानधिकरणे गुणादौ वर्तमानो योऽभावस्तस्यैव वृक्षे मूलावच्छेदेन सत्त्वात् । यदि तु प्रतियोग्यधिकरणावृत्तित्वं तदासंयोगी सत्त्वादित्यादावतिव्याप्तिः सत्ताधिकरणे गुणादौ यः संयोगाभा-

---

१ एतद्रूपवानेतद्रसादित्यादौ लक्षणसत्त्वादसंभवाभाव इत्यतोऽव्याप्तिरिति ।

२ स्वाश्रयसमवेतत्वसंबन्धेनेत्यर्थः तथाचोक्तपरम्परया यदवच्छेदकं तदन्यत्वस्य जातित्वे सत्त्वान्नाव्याप्तिरिति भावः ।

वस्तस्य प्रतियोग्यधिकरणद्रव्यवृत्तित्वादिति वाच्यम् हेत्वधिकरणे प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य विवक्षितत्वात् स्वप्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभाव इति निष्कर्षः । प्रतियोग्यनधिकरणत्वं प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं वाच्यम् तेन विशिष्टसत्तावान् जातेरित्यादौ जात्यधिकरणगुणादेर्विशिष्टसत्तावान् जातेरित्यादौ जात्यधिकरणगुणादेर्विशिष्टसत्ताभावप्रतियोगिसत्ताधिकरणत्वेपि न क्षतिः । अत्र साध्यतावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणत्वं बोध्यम् तेन ज्ञानवान् सत्त्वादित्यादौ सत्ताधिकरणघटादेः विषयतया ज्ञानाधिकरणत्वेपि न क्षतिः[२] । इत्थं च वह्निमान् धूमादित्यादौ धूमाधिकरणे समवायेन वह्निविरहसत्त्वेपि न क्षतिः[३] । ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचित्प्रतियोगिनोनधिकरणत्वं तत्सामान्यस्य वा यत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं वा विवक्षितम् । आद्ये कपिसंयोगी एतद्वृक्षत्वादित्यत्र तथैवाव्याप्तिः । कपिसंयोगाभावस्य हि प्रतियोगितावच्छेदकावच्छिन्नो वृक्षावृत्तिकपिसंयोगोपि भवति तदनधिकरणं वृक्ष इति । द्वितीये तु प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः सर्वस्यैवाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात् । नच वह्निमान् धूमादित्यादौ घटाभावादेः पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वम् यद्यपि पर्वतादेस्तथापि साध्यतावच्छेदकसम्बन्धेन तत्प्रतियोग्यनधिकरणत्वमस्त्येवेति कथं प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति वाच्यम् घटाभावे यो वह्न्यभावः तस्य घटाभावात्मकतया घटाभावस्य वह्निरपि प्रतियोगी तदधिकरणं च पर्वतादिरित्येवंक्रमेण प्रतियोगिव्यधिकरणस्याप्रसिद्ध-

---

१ नातिव्याप्तिः ।

२ साध्यतावच्छेदकसंबन्धेन प्रतियोग्यनाधिकरणविवक्षणे चेत्यर्थः ।

३ नाव्याप्तिः।

त्वात् यदि घटाभावादौ वह्न्यभावादिर्भिन्न इत्युच्यते तथापि धूमाभाववान् वह्न्यभावादित्यादावव्याप्तिः । तत्र साध्यतावच्छेदकसंबन्धः स्वरूपसंबन्धस्तेन सर्वस्यैवाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं हेत्वधिकरणस्येति । तृतीये तु कपिसंयोगाभाववानात्मत्वादित्यादावव्याप्तिः तत्रात्मवृत्तिः कपिसंयोगाभावाभावः कपिसंयोगस्तस्य गुणत्वात् तत्प्रतियोगितावच्छेदकं गुणसामान्याभावत्वमपि तदवच्छिन्नानधिकरणत्वं हेत्वधिकरणस्यात्मन इति मैवम् यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात् । ननु कालो घटवान् कालपरिमाणादित्यत्र प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः हेत्वधिकरणस्य महाकालस्य जगदाधारतया सर्वेषामेवाभावानां साध्यतावच्छेदकसंबन्धेन कालिकविशेषणतया प्रतियोग्यधिकरणत्वात् । अत्र केचित् महाकालभेदविशिष्टघटाभावस्तत्र प्रतियोगिव्यधिकरणो महाकालस्य घटाधारत्वेपि महाकालभेदविशिष्टघटानाधारत्वात् महाकाले महाकालभेदाभावात् । वस्तुतस्तु[1] प्रतियोगितावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये यत्संबन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेन संबन्धेन तद्धर्मावच्छिन्नस्य तद्धेतुव्यापकत्वं बोध्यम् । व्यापकसामानाधिकरण्यं च व्याप्तिः यत्संबन्धः साध्यतावच्छेदकसंबन्धः यद्धर्मः साध्यतावच्छेदकः इत्थं च कालो घटवान् कालपरिमाणादित्यादौ संयोग संबन्धेन घटाभावप्रतियोगिनोपि घटस्यानधिकरणे हेत्वधिकरणे महाकाले वर्तमानः स एव संयोगेन घटाभावस्तस्य प्रतियोगितायां कालिकसंबन्धावच्छिन्नत्वघटत्वावच्छिन्नत्वो-

---

१ ननु महाकालमात्रवृत्तिविशेषणतासंबन्धेन साध्यतायां महाकालान्यत्वविशिष्टघटाभावोपि न प्रतियोगिव्यधिकरणः तत्र तेन संबन्धेन महाकालान्यत्वविशिष्टघटाधिकरणाप्रसिद्धेरत आह वस्तुतस्त्विति ।

भयाभावसत्त्वान्नाव्याप्तिः ननु प्रमेयवह्निमान् धूमादित्यादौ प्रमेयवह्नित्वावच्छिन्नत्वमप्रसिद्धम् गुरुधर्मस्यानवच्छेदकत्वादिति चेन्न । कम्बुग्रीवादिमान्नास्तीति प्रतीत्या कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताविषयीकरणेन गुरुधर्मस्याप्यवच्छेदकत्वस्वीकारादिति संक्षेपः ॥ ६९ ॥

पक्षवृत्तित्वमित्यत्र पक्षत्वं किं ? तदाह ।

**सिषाधयिषया शून्या सिद्धिर्यत्र न तिष्ठति ।**
**स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत् ॥७०॥**

सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता तद्वान् पक्ष इत्यर्थः । सिषाधयिषामात्रं न पक्षता विनापि सिषाधयिषां घनगर्जितेन मेघानुमानात् । अत एव साध्यसन्देहोपि न पक्षता विनापि सन्देहं तदनुमानात् सिद्धौ[1] सत्यामपि सिषाधयिषासत्त्वेऽनुमितिर्भवत्येव । अतः सिषाधयिषा विरहविशिष्टत्वं सिद्धौ विशेषणं तथाच यत्र सिद्धिर्नास्ति तत्र सिषाधयिषायां सत्त्यामसत्यामपि पक्षता । यत्र सिषाधयिषास्ति तत्र सिद्धौ सत्यामसत्यामपि पक्षता यत्र सिद्धिरस्ति सिषाधयिषा च नास्ति तत्र न पक्षता सिषाधयिषाविरहवि[2]शिष्टसिद्धेः सत्त्वात् । ननु यत्र परामर्शानन्तरं सिद्धिः ततः सिषाधयिषा तत्र सिषाधयिषाकाले परामर्शनाशान्नानुमितिः यत्र सिद्धिपरामर्शसिषाधयिषाः क्रमेण भवन्ति तत्र सिषाधयिषाकाले सिद्धेर्नाशात् प्रतिबन्धकाभावदेवानुमितिः । यत्र सिषाधयिषासिद्धिपरामर्शास्तत्र परामर्शकाले सिषाधयिषैव नास्ति एवमन्यत्रापि सिद्धिकाले परामर्शकाले च न सिषाध-

---

१ सिषाधयिषाविरहरूपविशेषणस्य प्रयोजनमाह सिद्धाविति ।

२ सिषाधयिषाविरहवैशिष्ट्यं च सिद्धौ एककालावच्छेदेनैकात्मवृत्तित्वं तेन सिषाधयिषाकालीनसिद्धेः कालिकसंबन्धेन सिषाधयिषाविरहविशिष्टसत्त्वेपि न क्षतिरिति ज्ञेयम् ।

यिषा योग्यविभुविशेषगुणानां यौगपद्यनिषेधात्। तत्कथं सिषाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणमिति चेन्न। यत्र वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति प्रत्यक्षं स्मरणं वा ततः सिषाधयिषा तत्र पक्षतासंपत्तये तद्विशेषणस्यावश्यकत्वात् इदन्तु बोध्यम् यादृशयादृशसिषाधयिषासत्त्वे सिद्धिसत्त्वेयल्लिङ्गकानुमितिस्तादृशतादृशसिषाधयिषाविरहविशिष्टसिद्ध्यभावस्तल्लिङ्गकानुमितौ पक्षता। तेन सिद्धिपरामर्शसत्त्वे यत्किंचित् ज्ञानं ज्ञायतामितीच्छायामपि नानुमितिः। वह्निव्याप्यधूमवान्पर्वतो वह्निमानिति प्रत्यक्षसत्त्वे प्रत्यक्षातिरिक्तं ज्ञानं जायतामितीच्छायां तु भवत्येव। एवं धूमपरामर्शसत्त्वे आलोकेन वह्निमनुमिनुयामितीच्छायामपि नानुमितिः सिषाधयिषाविरहकाले यादृशसिद्धिसत्त्वे नानुमितिस्तादृशी सिद्धिर्विशिष्यैव तदनुमितौ[1] प्रतिबन्धिका वक्तव्या। तेन पर्वतस्तेजस्वी पाषाणमयो वह्निमानिति ज्ञानसत्त्वेप्यनुमितेर्न विरोधः। परंतु पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेनानुमितेर्दर्शनात्। पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिरेव प्रतिबन्धिका पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्रति तु सिद्धिमात्रं विरोधि[2] इदं तु बोध्यम्। यत्रायं पुरुषो नवेति संशयानन्तरं पुरुषत्वव्याप्यकरादिमानयमिति ज्ञानम् तत्रासत्यामनुमित्सायाम् पुरुषस्य प्रत्यक्षं भवति नत्वनुमितिः अतोनुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्रीकामिनीजिज्ञासादिवत् स्वातन्त्र्येण प्रतिबन्धिका। एवं परामर्शानन्तरं विना प्रत्यक्षेच्छां पक्षादेः प्रत्यक्षानुत्पत्तेः प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्री भिन्नविषयकप्रत्यक्षे प्रतिबन्धिका ॥ ७० ॥

---

१ पर्वतो वह्निमानित्यनुमितौ पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयेन प्रतिबन्धकता वक्तव्येत्यर्थः।

२ पक्षविशेष्यकसाध्यप्रकारकनिश्चयत्वेन विरोधीत्यर्थः।

हेतुप्रसङ्गाद्धेत्वाभासान् विभजते ।

अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः ।
कालात्ययापदिष्टश्च हेत्वाभासाश्च पञ्चधा ॥७१॥
आद्यः साधारणस्तु स्यादसाधारणकोपरः ।
तथैवानुपसंहारी त्रिधा नैकान्तिको भवेत् ॥ ७२॥

तल्लक्षणं तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तत्त्वम् । तथाहि व्यभिचारादिविषयकत्वेन ज्ञानस्यानुमितिविरोधित्वात्ते दोषाः । यद्विषयकत्वं च यादृशविशिष्टविषयकत्वं बोध्यम् तेन बाधभ्रमस्यानुमितिविरोधित्वेपि न क्षतिः । तत्र पर्वतो वह्न्याभाववान् इति विशिष्टस्याप्रसिद्धत्वान्न हेतुदोषः नच वह्न्यभावव्याप्यपाषाणमयत्ववानिति परामर्शकाले वह्निव्याप्यधूमस्याभासत्वं न स्यात् । तत्र वह्न्यभावव्याप्यवान् पक्ष इति विशिष्टस्याप्रसिद्धत्वादिति वाच्यम् इष्टापत्तेः । अन्यथा बाधस्यापि अनित्यदोषत्वापत्तेः तस्मात्तत्र वह्न्यभावव्याप्यपाषाणमयत्ववानिति परामर्शकाले वह्निव्याप्यधूमस्य नाभासत्वम् भ्रमादनुमितिप्रतिबन्धमात्रं हेतुस्तु न दुष्टः इत्थं च साध्याभाववद्वृत्तिहेत्वादिकं दोषः तद्वत्त्वं च हेतौ येन केन संबन्धेनेति नव्याः । परे तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तद्वत्त्वं हेत्वाभासत्वं सत्प्रतिपक्षे विरोधिव्याप्त्यादिकमेव तथा तद्वत्त्वं च हेतौ ज्ञानरूपसंबन्धेन नचैवं वह्निमान् धूमादित्यादौ पक्षे बाधभ्रमस्य साध्याभावविषयकत्वेन नानुमितिविरोधित्वात् ज्ञानरूपसंबन्धेन तद्वत्त्वस्यापि सत्त्वात् सद्धेतोरपि बाधितत्वापत्तिरिति वाच्यम् । तत्र ज्ञानस्य संबन्धत्वाकल्पनात् अत्र सत्प्रतिपक्षित इति व्यवहारेण तत्कल्पनात् तत्र बाधित इति व्यवहाराभावादित्याहुः । अनुमितिविरोधित्वं चानुमितितत्क-

रणान्यतरविरोधित्वम् तेन व्यभिचारिणि नाव्याप्तिः दोषज्ञानं च यद्धेतु-विषयकं तद्धेतुकानुमितौ प्रतिबन्धकं तेनैकहेतौ व्यभिचारज्ञाने हेत्वन्तरे-णानुमित्युत्पत्तेः। तदभावाद्यनवगाहित्वाच्च व्यभिचारज्ञानस्य प्रकृतानुमिति विरोधित्वाभावेपि न क्षतिरिति संक्षेपः। यादृशसाध्यपक्षहेतौ यावन्तो दोषास्ता-वदन्यान्यत्वं तत्र हेत्वाभासत्वम् पञ्चत्वकथनन्तु तत्संभवस्थलाभिप्रायेण[1]। एवं च साधारणाद्यन्यतमत्वमनैकान्तिकत्वम् साधारणःसाध्यवदन्यवृत्तिःते-न च व्याप्तिज्ञानप्रतिबन्धः क्रियते। असाधारणः साध्यासमानाधिकरणो हेतुः तेन साध्यसामानाधिकरण्यग्रहः प्रतिबध्यते अन्ये तु सपक्षावृत्तिरसाधारणः सपक्षश्च निश्चितसाध्यवान् इत्थं च शब्दो नित्यः शब्दत्वादित्यादौ यदा पक्षे साध्यनिश्चयस्तदानासाधारण्यं तत्र हेतोर्निश्चयादिति वदन्ति अनुपसं-हारी च अत्यन्ताभावाप्रतियोगिसाध्यकादिः अनेन व्यतिरेकव्याप्ति-ग्रहप्रतिबन्धः क्रियते विरुद्धस्तु साध्यव्यापकीभूताभावप्रतियोगी अयं साध्याभावग्रहसामग्रीत्वेन प्रतिबन्धकः। सत्प्रतिपक्षे तु प्रतिहेतुः[2] साध्याभावसाधकः अत्र हेतुरेकएवेति विशेषः साध्याभावसाधक एव हेतुः साध्यसाधकत्वेनोपन्यस्त इत्यशक्तिविशेषोपस्थापकत्वाच्च विशेषः सत्प्रतिपक्षः साध्याभावव्याप्यवान् पक्षः। अगृहीताप्रामाण्यकसाध्य-व्याप्यवत्ताप्रकारकोपस्थितिकालीनाऽगृहीताप्रामाण्यकतदभावव्याप्यवत्ता प्रकारकोपस्थितिविषयस्तथेत्यन्ये[3]। अत्र च परस्पराभावव्याप्यवत्ताज्ञा-नात् परस्परानुमितिप्रतिबन्धः फलम् अत्र केचित् यथा घटाभाव-व्याप्यवत्ताज्ञाने विद्यमानेपि घटचक्षुःसंयोगे सति घटवत्ताज्ञानं जा-यते यथा च शङ्खे सत्यपि पीतत्वाभावव्याप्यशङ्खत्ववत्ताज्ञाने सति पित्तादिदोषे पीतः शङ्ख इति धीरेवं कोटिद्वयव्याप्यदर्शनेपि कोटिद्व-

---

१ वायुर्गन्धवान् स्नेहादित्यादौ सर्वहेत्वाभाससंभवादिति भावः।

२ प्रतिकूलो द्वितीयो हेतुरित्यर्थः।

३ इत्यनयोर्भेदः।

यस्य प्रत्यक्षरूपः संशयो भवति तथा सत्प्रतिपक्षस्थले संशयरूपानुमितिर्भवत्येव । यत्रचैककोटिव्याप्यदर्शनं तत्राधिकबलतया द्वितीयकोटिभानप्रतिबन्धान्न संशयः फलबलेन चाधिकबलसमबलभावः कल्प्यत इत्याहुः तन्न । तदभावव्याप्यवत्ताज्ञाने सति तदुपनीतभानविशेषशाब्दबोधादेरनुदयाल्लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यज्ञानमात्रे तस्य प्रतिबन्धकतालाघवान्नतूपनीतभानविशेषे शाब्दबोधे च पृथक्प्रतिबन्धकतागौरवात् तथाच प्रतिबन्धकसत्त्वात् कथमनुमितिः नहि लौकिकसन्निकर्षस्थले प्रत्यक्षमिव सत्प्रतिपक्षस्थले संशयाकारानुमितिः प्रामाणिकी येनानुमितिभिन्नत्वेनापि विशेषणीयम् यत्र च कोटिद्वयव्याप्यवत्ताज्ञानं तत्रोभयत्राप्रामाण्यज्ञानात् संशयो नान्यथाऽगृहीताप्रामाण्यकस्यैव विरोधिज्ञानस्य प्रतिबन्धकत्वादिति असिद्धिस्तु आश्रयासिध्याद्यन्यतमत्वम् । आश्रयासिद्धिः । पक्षे पक्षतावच्छेदकस्याभावः यत्र काञ्चनमयपर्वतो वह्निमानिति साध्यते तत्र पर्वतो न काञ्चनमय इति ज्ञाने विद्यमाने काञ्चनमये पर्वते परामर्शप्रतिबन्धः फलम् स्वरूपादिसिद्धिस्तु पक्षे व्याप्यत्वाभिमतस्याभावः तत्र च ह्रदो द्रव्यं धूमादित्यादौ पक्षे व्याप्यत्वाभिमतस्य हेतोअभावे ज्ञाते पक्षे व्याप्यहेतुमत्ताज्ञानरूपस्य परामर्शस्य प्रतिबन्धः फलम् साध्याप्रसिद्ध्यादयस्तु व्याप्यत्वासिद्धिमध्येऽन्तर्भूताः साध्ये साध्यतावच्छेदकस्याभावः साध्याप्रसिद्धिः एतज्ज्ञाने जाते काञ्चनमयवह्निमानित्यादौ साध्यतावच्छेदकविशिष्टसाध्यपरामर्शप्रतिबन्धः फलम् । एवं हेतौ हेतुतावच्छेदकाभावः साधनाप्रसिद्धिः यथा काञ्चनमयधूमादित्यादौ अत्र हेतुतावच्छेदकविशिष्टहेतुताज्ञानाभावात्तद्धेतुकव्याप्तिज्ञा-

१ अनुमितिं प्रति तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वे मानाभावात् क्लृप्तत्तत्तदभावानुमितिसामग्रीभ्यामेव तत्तदभावकोटिकसंशयानुमित्युत्पत्तौ संशयानुमितिं प्रत्युभयव्याप्यवत्तानिश्चयत्वेनातिरिक्तहेतुत्वाकल्पनप्रयुक्तगौरवाच्चेति भावः ।

नादेरभावः फलम् एवं वह्निमान्नीलधूमादित्यादौ गुरुतया नीलधूमत्वस्य हेतुतानवच्छेदकत्वमपि व्याप्यत्वासिद्धिरित्यपि वदन्ति। बाधस्तु पक्षे साध्याभावादिः एतस्य त्वनुमितिप्रतिबन्धः फलम्। तद्धर्मिकतदभावनिश्चयोलौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्धर्मिकतज्ज्ञानमात्रे विरोधीति। ननु संशयसाधारणं पक्षे साध्यसंसृष्टत्वज्ञानमनुमितिकारणम् [1]तद्विरोधितया च बाधसत्प्रतिपक्षयोर्हेत्वाभासत्वमिति युक्तम् अप्रसिद्धसाध्यकानुमित्यनापत्तेः। साध्यसंशयादिकं विनाप्यनुमित्युत्पत्तेश्च एवं साध्याभावज्ञाने प्रमात्वज्ञानमपि न प्रतिबन्धकं माना[2]भावाद्गौरवाच्च। अन्यथा सत्प्रतिपक्षादावपि तदभावव्याप्यज्ञाने प्रमात्वविषयकत्वेन प्रतिबन्धकतापत्तेः किन्तु भ्रमत्वज्ञानानास्कन्दितबाधबुद्धेः प्रतिबन्धकता। तत्र भ्रमत्वशङ्काविघटनेन प्रामाण्यज्ञानं क्वचिदुपयुज्यते नच बाधस्थले पक्षेहेतुसत्त्वे व्यभिचारः पक्षे हेत्वभावे स्वरूपासिद्धिरेव दोष इति वाच्यम् बाधज्ञानस्य व्यभिचारज्ञानादेर्भेदात्। किंच यत्र परामर्शानन्तरं बाधबुद्धिस्तत्र व्यभिचारज्ञानादेरकिंचित्करत्वाद्बाधस्यानुमितिप्रतिबन्धकत्वं वाच्यम् एवं यत्रोत्पत्तिक्षणावच्छिन्ने घटादौ गन्धव्याप्यपृथिवीत्ववत्ताज्ञानं तत्र [3]बाधस्यैव प्रतिबन्धकत्वं वाच्यम् नच पक्षे घटे गन्धसत्त्वात् कथं बाध इति वाच्यम् पक्षतावच्छेदकदेशकालावच्छेदेनानुमितेरनुभवसिद्धत्वादिति। बाधतद्व्याप्यभिन्ना ये हेत्वाभासास्तद्व्याप्या अपि तन्मध्य एवान्तर्भवन्ति अन्यथा हेत्वाभासाधिक्यप्रसङ्गात् बाधव्याप्यसत्प्रतिपक्षो भिन्न एव स्वत-

---

१ अनुमितिकारणीभूतस्य साध्यसंसृष्टत्वज्ञानविरोधितयेत्यर्थः।

२ ग्राह्याभावानवगाहिनस्तादृशज्ञानस्य विरोधित्वे मानाभावादित्यर्थः।

३ पक्षे हेतुसत्त्वे न स्वरूपासिद्धेः प्रतियोगिव्यधिकरणसाध्याभाववद्वृत्तित्वरूपस्य व्यभिचारस्य चाभावादिति भावः।

न्नेच्छेन मुनिना पृथगुपदेशात् सत्प्रतिपक्षव्याप्यस्तु न प्रतिबन्धक इति प्रघट्टकार्थः ॥ ७१ ॥ ७२ ॥

## यः सपक्षे विपक्षे च भवेत्साधारणस्तु सः ।

सपक्षविपक्षवृत्तिः साधारण इत्यर्थः । सपक्षो निश्चितसाध्यवान् विपक्षः साध्यवद्भिन्नः विरुद्धवारणाय सपक्षवृत्तित्वमुक्तम् वस्तुतो विपक्षवृत्तित्वमेव वाच्यम् विरुद्धस्य साधारणत्वेपि दूषकताबीजस्य भिन्नतया तस्य पार्थक्यात् ॥

## यस्तूभस्माद्व्यावृत्तः सत्वसाधारणो मतः ॥ ७३ ॥

सपक्षविपक्षव्यावृत्त इत्यर्थः । सपक्षः साध्यवत्तया निश्चितः विपक्षः साध्यशून्यतया निश्चितः । शब्दोऽनित्यः शब्दत्वादित्यादौ यदा शब्देऽनित्यत्वस्य सन्देहस्तदा सपक्षत्वं घटादीनामेव तद्व्यावृत्तं च शब्दत्वमिति तदा तदसाधारणम् यदा तु शब्देऽनित्यत्वनिश्चयस्तदा नासाधारणम् इदन्तु प्राचां मतम् नवीनमतं तु पूर्वमुक्तम् ॥ ७३ ॥

## तथैवानुपसंहारी केवलान्वयिपक्षकः ।

सर्वमभिधेयं प्रमेयत्वादित्यादौ सर्वस्यैव पक्षत्वात् सामानाधिकरण्यग्रहस्थलान्तराभावान्नानुमितिः इदं तु न सम्यक् पक्षैकदेशे सहचारग्रहेपि क्षतेरभावात् । अस्तु वा सहचाराग्रहः तावताप्यज्ञानरूपासिद्धिरेव न हेत्वाभासत्वं तस्य । तथापि केवलान्वयिसाध्यकत्वं तत्त्वमित्युक्तम् ॥

---

१ संशयोत्पत्तिक्षणे निश्चयवारणाय निश्चयं प्रति संशयसामग्र्याः प्रतिबन्धकत्वस्यावश्यंवाच्यतया प्रकृते सर्वत्र साध्यसंदेहसत्त्वेन तत्पूर्वतत्सामग्र्याः सत्त्वेन साध्यनिश्चयस्य क्वाप्यसंभवेन व्यापकसाध्यसामानाधिकरण्यविशिष्टप्रमेयत्वादिरूपव्याप्तिग्रहानुत्पादान्न तत्रानुमितिरित्यनुपसंहारिणो हेत्वाभासत्वमिति भावः ।

यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः ॥ ७४ ॥

एवकारेण साध्यवत्त्वावच्छेदेन हेत्वभावो बोधितस्तथा च साध्यव्यापकीभूताभावप्रतियोगित्वं तदर्थः ॥ ७४ ॥

असिद्धिं विभजते ।

आश्रयासिद्धिराद्या स्यात् स्वरूपासिद्धिरप्यथा ।
व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा ॥७५॥
पक्षासिद्धिर्यत्र पक्षो भवेन्मणिमयो गिरिः ।
ह्रदो द्रव्यं धूमवत्त्वादत्रासिद्धिरथापरा ॥ ७६ ॥
व्याप्यत्वासिद्धिरपरा नीलधूमादिकं भवेत् ।

पक्षासिद्धिरिति आश्रयासिद्धिरित्यर्थः । अपरेति स्वरूपासिद्धिरित्यर्थः । नीलधूमादिकमिति । नीलधूमत्वादिकं गुरुतया न हेतुतावच्छेदकम् स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तराघटितस्यैव व्याप्यतावच्छेदकत्वात् धूमप्रागभावत्वसङ्ग्रहाय स्वसमानाधिकरणेति ॥

विरुद्धयोः परामर्शे हेत्वोः सत्प्रतिपक्षता ॥ ७७ ॥

विरुद्धयोरिति । कपिसंयोगतदभावव्याप्यवत्तापरामर्शेपि न सत्प्रतिपक्षत्वमत उक्तम् विरुद्धयोरिति । तथा च स्वसाध्यविरुद्धसाध्याभावव्याप्यवत्तापरामर्शकालीनसाध्यव्याप्यवत्तापरामर्शविषय इत्यर्थः ॥ ॥ ७५ ॥ ७६ ॥ ७७ ॥

---

१ स्वस्य स्वाधिषयकप्रतीतिविषयत्वरूपस्वाघटितत्वाभावाधर्मान्तरविवेशः नच नीलधूमत्वस्यापि तादृशधर्मान्तराघटितत्वमस्त्येव धूमत्वस्य नीलधूमत्वभिन्नत्वाभावादिति वाच्यम् स्वाविषयप्रतीतिविषयत्वस्य स्वपर्याप्तावच्छेदकतानिरूपकप्रकारतानिरूपितावच्छेदकता पर्याप्त्यनधिकरणत्वपर्यवसितत्वस्यान्तरपदार्थत्वादिति बोध्यम् ।

साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः ।
उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते ॥ ७८ ॥

पक्षः पक्षतावच्छेदकविशिष्ट इत्यर्थः । तेन घटे गन्धसत्त्वेपि न क्षतिः । एवं मूलावच्छिन्नो वृक्षः कपिसंयोगीत्यत्रापि बोध्यम् ॥ ७८ ॥

इति सिद्धान्तमुक्तावल्याम् अनुमानम् ।

उपमितिं व्युत्पादयति ।

ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम् ।
सादृश्यधीर्गवादीनां या स्यात्सा करणं मतम् ७९
वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते ।
गवयादिपदानां तु शक्तिधीरुपमा फलम् ॥ ८० ॥

यत्रारण्यकेन केनचिद्ग्रामीणायोक्तम् गोसदृशो गवयपदवाच्य इति । पश्चाद्ग्रामीणेन क्वचिदरण्यादौ गवयो दृष्टः तत्र गोसादृश्यदर्शनं यज्जातं तदुपमितिकरणम् । तदनन्तरङ्गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थस्मरणं[1] यज्जायते तदेव व्यापारः । तदनन्तरं गवयो गवयपदवाच्य[2] इति ज्ञानं यज्जायते तदुपमितिः नत्वयं गवयपदवाच्य इत्युपमितिः गवयान्तरे शक्तिग्रहाभावप्रसङ्गात् ॥ ७९ ॥ ८० ॥

इत्युपमानखण्डम् ।

---

१ सादृश्यविशिष्टपिण्डदर्शनस्योद्बोधकविधया तादृशवाक्यार्थस्मारकत्वादिति ज्ञेयम् ।

२ नचेयमुपमितिर्नप्रमित्यतरं किन्तु शाब्दबोधरूपैव गोसदृशो गवय इत्यत्र सदृशपदेनोपस्थितसादृश्यावच्छेदेन गवयपदवाच्यत्वग्रहस्य गोसदृशो गवयपदवाच्य इत्याकारकस्यैवोपमितिस्वरूपत्वादिति वाच्यम् गवयत्वावच्छेदेन गवयपदवाच्यत्वविषयिण्या उपमितेर्गवयपदजन्यगवयत्वविशिष्टोपस्थितिं विना शाब्दबोधरूपत्वासंभवादिति बोध्यम् ।

शाब्दबोधप्रकारं दर्शयति ।

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥८१॥

ननु ज्ञायमानं पदं करणम् पदाभावेपि मौनिश्लोकादौ शाब्दबोधात् पदार्थधीरिति । पदजन्यपदार्थस्मरणं व्यापारः अन्यथा पदज्ञानवतः प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबोधापत्तेः । तत्रापि वृत्त्या पदजन्यत्वं बोध्यम् अन्यथा घटादिपदात् समवायसंबन्धेनाकाशस्मरणे जाते आकाशस्यापि शाब्दबोधापत्तेः । वृत्तिश्च शक्तिलक्षणान्यतरसंबन्धः अत्रैव शक्तिज्ञानस्योपयोगः पूर्वं शक्तिग्रहाभावे पदज्ञानेपि तत्संबन्धेन स्मरणानुपपत्तेः पदज्ञानस्य हि एकसंबन्धिज्ञानविधया स्मारकत्वम् शक्तिश्च पदेन सह पदार्थस्य संबन्धः सचास्माच्छब्दादयमर्थो बोद्धव्यः इतीश्वरेच्छारूपः आधुनिके नाम्नि शक्तिरस्त्येव एकादशेहनि पिता नाम कुर्यादितीश्वरेच्छायाः सत्त्वात् । आधुनिकसङ्केतिते तु न शक्तिरिति संप्रदायः । नव्यास्तु ईश्वरेच्छा न शक्तिः किन्त्विच्छैव तेनाधुनिकसङ्केतितेपि शक्तिरस्तीत्याहुः शक्तिग्रहस्तु व्याकरणादितः तथाहि "शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च । वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः" धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति क्वचित्सति बाधके त्यज्यते वैयाकरणैराख्यातस्य कर्तरि शक्तिरुच्यते चैत्रः पचतीत्यादौ कर्त्रा सह चैत्रस्याभेदान्वयस्तत्र गौरवात्त्यज्यते किन्तु कृतौ शक्तिर्लाघवात् कृतिश्चैत्रादौ प्रकारीभूय भासते नच कर्तुरनभिधानाच्चैत्रपदोत्तरं तृतीयास्यादि-

१ पदार्थज्ञानमात्रस्य व्यापारत्वे ।

२ पदजन्यपदार्थोपस्थितावपि घटकत्वं सप्तम्यर्थः ।

३ कृतित्वजातेः शक्यतावच्छेदकत्वे लाघवादित्यर्थः ।

ति वाच्यम् कर्तृसंख्यानभिधानस्य तत्र[1] तन्त्रत्वात्[2] । संख्याभिधानयोग्यश्च कर्मत्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यः । कर्मत्वादित्यस्येतरविशेषणत्वेन तात्पर्याविषयत्वमर्थः तेन चैत्र इव मैत्रो गच्छतीत्यादौ न चैत्रे संख्यान्वयः यत्र न कर्मादौ विशेषणत्वेन तात्पर्यं तद्वारणाय प्रथमान्तेति। यद्वा धात्वर्थातिरिक्ताविशेषणत्वम् प्रथमदलार्थः । तेन चैत्र इव मैत्रो गच्छतीत्यत्र चैत्रादेर्वारणम् । स्तोकं पचतीत्यादौ स्तोकादेर्वारणाय द्वितीयदलम् । तस्य द्वितीयान्तपदोपस्थाप्यत्वाद्वारणमिति एवं व्यापारेपि न शक्तिर्गौरवात्[3] रथोगच्छतीत्यादौ तु व्यापारे आश्रयत्वे वा लक्षणा जानातीत्यादौ त्वाश्रयत्वे नश्यतीत्यादौ तु प्रतियोगित्वे निरूढलक्षणा उपमानाद्यथाशक्तिग्रहस्तथोक्तम् एवं कोशादपि शक्तिग्रहः सति बाधके क्वचित्त्यज्यते यथा नीलादिपदानां नीलरूपादौ नीलविशिष्टे च शक्तिः कोशेन[4] व्युत्पादिता तथापि लाघवान्नीलादावेव शक्तिः नीलादिरूपविशिष्टे तु लक्षणा इति एवमाप्तवाक्यादपि यथा कोकिलः पिकशब्दवाच्य इत्यादिशब्दात् पिकादिशब्दानां कोकिले शक्तिग्रहः एवं व्यवहारादपि यथा प्रयोजकवृद्धेन घटमानयेत्युक्तम् तच्छ्रुत्वा प्रयोज्यवृद्धेन घट आनीतस्तदवधार्य पार्श्वस्थो बालोघटानयनरूपं कार्यं घटमानयेति शब्दप्रयोज्यमित्यवधारयति ततश्च घटं नय गामानयेत्यादिवाक्यादावापोद्वापाभ्यां[5] घटादिपदानां कार्यान्वितघटादौ शक्तिं गृह्णाति इत्थं च भूतले नीलो घट इत्यादिशब्दान्न शाब्दबोधः घटादिपदानां

---

१ तृतीयायाम् ।

२ प्रयोजकत्वात् ।

३ जन्यत्वादिघटितस्य व्यापारत्वस्य यत्नत्वजात्यपेक्षया गुरुत्वादिति भावः ।

४ "गुणे शुक्लादयः पुंसि गुणि लिङ्गास्तु तद्वती" ति कोशस्योभयत्र शक्तिग्राहकत्वादिति भावः ।

५ त्यागात्यागाभ्याम् ।

कार्यान्वितघटादिबोधे सामर्थ्यावधारणात् कार्यताबोधं प्रति च लिङा-दीनां सामर्थ्यात्तदभावान्न शाब्दबोध इति केचित्तन्न । प्रथमतः का-र्यान्वितघटादौ शक्त्यवधारणेपि लाघवेन पश्चात्तस्य परित्यागौचित्यात् अतएव चैत्र पुत्रस्ते जातः कन्या ते गर्भिणीत्यादौ मुखप्रसादमुख-मालिन्याभ्यां सुखदुःखे अनुमाय तत्कारणत्वेन परिशेषाच्छाब्दबोधं निर्णीय तद्धेतुतया तं शब्दमवधारयति तथा च व्यभिचारान्न कार्या-न्विते शक्तिः नच तत्र तं पश्येत्यादिशब्दान्तरमध्याहार्यं मानाभावा-त् । चैत्र पुत्रस्ते जातो मृतश्चेत्यादौ तदभावाच्च इत्थं च लाघवा-दन्वितघटेपि शक्तिं त्यक्त्वा घटपदस्य घटपदमात्रे शक्तिमवधारयति एवं वाक्यशेषादपि शक्तिग्रहः यथा यवमयश्चरुर्भवतीत्यत्र यवपदस्य दीर्घशूकविशेषे आर्याणां प्रयोगः कङ्गौ तु म्लेच्छानाम् । तत्रहि "वसन्ते सर्वसस्यानां जायते पत्रशातनम् । मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः " इति । " यत्रान्या ओषधयो म्लायन्तेऽथैते मोदमाना-स्तिष्ठन्ति" इति । वाक्यशेषाद्दीर्घशूके शक्तिर्निर्णीयते कङ्गौ तु शक्ति-भ्रमात्प्रयोगः नानाशक्तिकल्पने गौरवात् हर्यादिपदे तु विनिगमकाभा-वान्नानाशक्तिकल्पनम् एवं विवरणादपि शक्तिग्रहः विवरणन्तु तत्स-मानार्थकपदान्तरेण तदर्थकथनं यथा घटोस्तीत्यस्य कलशोस्तीत्यनेन विवरणात् घटपदस्य कलशे शक्तिग्रहः एवं पचतीत्यस्य पाकं क-रोतीत्यनेन विवरणात् । आख्यातस्य यत्नार्थकत्वं कल्प्यते एवं प्र-सिद्धपदस्य सान्निध्यादपि शक्तिग्रहः यथा इह सहकारतरौ मधुरं पिको रौतीत्यादौ पिकशब्दस्य कोकिले शक्तिग्रह इति तत्र जातावे-

१ कार्यत्वाविषयकबोधं प्रति हेतुत्वादेव ।

२ सुखदुःखयोः कारणत्वेन ।

३ तादृशशाब्दबोधे हेतुतया ।

४ आख्यातं यत्नत्वविशिष्टे शक्तम् यत्नत्वविशिष्टशक्तकरोतिप्रतिपादितार्थ-प्रतिपादकत्वादित्यनुमानविधया विवरणस्य शक्तिग्राहकत्वं बोध्यम् ।

व शक्तिग्रहः ननु व्यक्तौ व्यभिचारादानन्त्याच्च व्यक्तिं विना जाति-भानस्यासंभवाद्व्यक्तेरपि भानमिति केचित् तन्न । शक्तिं विना व्यक्तिभानानुपपत्तेः नच व्यक्तौ लक्षणा अनुपपत्तिप्रतिसन्धानं विनापि व्यक्तिबोधात् नच व्यक्तिशक्तावानन्त्यं सकलव्यक्तावेकस्या एव शक्तेः स्वीकारात् नचाननुगमः गोत्वादेरेवानुगमकत्वात् किंच गौः शक्येति शक्तिग्रहो यदि तदा व्यक्तौ शक्तिर्यदितु गोत्वं शक्यमिति शक्तिग्रहस्तदा गोत्वप्रकारकपदार्थस्मरणं शाब्दबोधश्च न स्यात् समानप्रकारकत्वेन शक्तिज्ञानस्य पदार्थस्मरणं शाब्दबोधं प्रति च हेतुत्वात् किंच गोत्वे यदि शक्तिस्तदा गोत्वत्वं शक्यतावच्छेदकं वाच्यम् गोत्वत्वं तु गवेतरासमवेतत्वे सति सकलगोसमवेतत्वम् तथाच गोव्यक्तीनां शक्यतावच्छेदकेऽनुप्रवेशात् तवैवं गौरवम् तस्मात्तत्तज्जात्याकृतिविशिष्टतत्तद्व्यक्तिबोधानुपपत्त्या कल्प्यमाना शक्तिर्विश्राम्यति। शक्तं पदम् तच्चतुर्विधम् क्वचिद्यौगिकं क्वचिद्रूढम् क्वचिद्योगरूढं क्वचिद्यौगिकरूढम् । तथाहि यत्रावयवार्थ एव बुध्यते तद्यौगिकम् यथा पाचकादिपदम् यत्रावयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेण बुध्यते तद्रूढम्, यथा गोमण्डलादिपदम् । यत्र तु अवयवशक्तिविषये समुदायशक्तिरप्यस्ति तद्योगरूढम् यथा पङ्कजादिपदम् । तथाहि पङ्कजपदमवयवशक्त्या पङ्कजनिकर्तृत्वरूपमर्थं बोधयति समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति नच केवलया अवयवशक्त्या कु-

---

१ अगृहीतशक्तिव्यक्तावपि शाब्दबोधोदयेन तत्र शक्तिज्ञानाभावात् व्यभिचारो ज्ञेयः ।

२ व्यक्तिभेदेन शक्तिभेदाच्छक्त्यानन्त्यं बोध्यम् ।

३ जातिभासकसामग्र्या एव व्यक्तिभासकत्वादिति भावः ।

४ गवेतरासमवेतत्वादिघटितगोत्वत्वादेर्धर्मितावच्छेदकताद्यात्मकविषयतायाः शाब्दबोधकारणतावच्छेदककोटिप्रवेशप्रयुक्तगौरवं बोध्यम् ।

मुदे प्रयोगः स्यादिति वाच्यम् रूढिज्ञानस्य केवलयौगिकार्थज्ञाने प्रतिबन्धकत्वादिति प्राञ्चः। वस्तुतस्तु समुदायशक्त्युपस्थितपद्मेऽवयवार्थपङ्कजनिकर्तुरन्वयो भवति सांन्निध्यात् । यत्र तु रूढ्यर्थस्य बाधः प्रतिसन्धीयते तत्र लक्षणया कुमुदादेर्बोधः यत्र तु कुमुदत्वेन रूपेण बोधे नतात्पर्यज्ञानं पद्मत्वस्य च बाधस्तत्र चावयवशक्तिमात्रेण निर्वाह इत्याहुः । यत्र तु स्थलपद्मादाववयवार्थबाधस्तत्र समुदायशक्त्या-पद्मत्वेन रूपेण बोधः यदि तु स्थलपद्मविजातीयमेव तदा लक्षणयैवेति । यत्र तु यौगिकार्थरूढ्यर्थयोः स्वातन्त्र्येण बोधस्तद्यौगिकरूढम् यथोद्भिदादिपदम् तत्रहि उद्भेदनकर्ता तरुगुल्मादिरपि बुध्यते यागविशेषोपीति ॥ ८१ ॥

## लक्षणा शक्यसंबन्धस्तात्पर्यानुपपत्तितः।

गङ्गायां घोष इत्यादौ गङ्गापदस्य शक्यार्थे प्रवाहरूपे घोषस्यान्वयानुपपत्तिः तात्पर्यानुपपत्तिर्वा यत्र प्रतिसन्धीयते तत्र लक्षणया तीरस्य बोध इति । सा च शक्यसंबन्धरूपा तथाहि प्रवाहरूपशक्यार्थसंबन्धस्य तीरे गृहीतत्वात् तीरस्य स्मरणम् ततः शाब्दबोधः परन्तु यद्यन्वयानुपपत्तिर्लक्षणाबीजं स्यात् तदा यष्टीः प्रवेशयेत्यादौ लक्षणा न स्यात् यष्टिषु प्रवेशान्वयस्यानुपपत्तेरभावात् तेन तत्प्रवेशे भोजनतात्पर्यानुपपत्त्या यष्टिधरेषु लक्षणा । एवं काकेभ्यो दधिरक्ष्यतामित्यादौ काकपदस्य दध्युपघातके लक्षणा सर्वतोदधिरक्षायास्तात्पर्यविषयत्वात् एवं छत्रिणो यान्तीत्यादौ छत्रिपदस्यैकसार्थवाहित्वे

१ रूढ्यर्थस्य सन्निहितपदोपस्थितिकत्वादित्यर्थः ।

२ छत्रिपदस्य लक्षणाभिधानं वाक्यलक्षणावादिमताभिप्रायेण न्यायमते छत्रपदस्यैवैकसार्थवाहित्वे लक्षणा प्रत्ययार्थश्च संबन्धी तथा चैकसार्थवन्तो गच्छन्तीत्यन्वयः एकसार्थवाहित्वं चैकसार्थ एव नत्वेकसार्थगन्तृत्वं नैराकाङ्क्ष्येण यान्तीत्यस्यानन्वयापत्तेः ।

लक्षणा इयमेवाजहत्स्वार्था लक्षणेत्युच्यते । एकसार्थवाहित्वेन रूपेण छत्रितदन्ययोर्बोधात् यदि चान्वयानुपपत्तिर्लक्षणाबीजं स्यात्तदा क्वचिद्गङ्गापदस्य तीरे क्वचिद्घोषपदस्य मत्स्यादौ लक्षणेति नियमो न स्यात् इदं तु बोध्यम् शक्यार्थसंबन्धो यदि तीरत्वेन रूपेण गृहीतस्तदा तीरत्वेन तीरबोधः यदितु गङ्गातीरत्वेन रूपेण गृहीतस्तदा तेनैव रूपेण स्मरणम् । अत एव लक्ष्यतावच्छेदकेन लक्षणा तत्प्रकारकबोधस्य तत्र लक्षणां विनाप्युपपत्तेः परन्तु एवंक्रमेण शक्यतावच्छेदकेपि शक्तिर्न स्यात् । तत्प्रकारकशक्यार्थस्मरणं प्रति तत्पदस्यसामर्थ्यमित्यस्य सुवचत्वादिति विभावनीयम् यत्र तु शक्यार्थस्य परम्परासंबन्धरूपा[1] लक्षणा सा लक्षितलक्षणेत्युच्यते यथा द्विरेफादिपदे रेफद्वयसंबन्धो भ्रमरपदे ज्ञायते भ्रमरपदस्य च संबन्धो भ्रमरे ज्ञायते तत्र लक्षितलक्षणा किंतु लाक्षणिकं पदं नानुभावकम् लाक्षणिकार्थस्य शाब्दबोधे तु पदान्तरं कारणम् शक्तिलक्षणान्यतरसंबन्धेनेतरपदार्थान्वित[2]स्वशक्यार्थशाब्दबोधं प्रति पदानां सामर्थ्यावधारणात् वाक्ये तु शक्तेरभावात् शक्यसंबन्धरूपा लक्षणापि नास्ति । यत्र गम्भीरायां नद्यां घोष इत्युक्तम् तत्र नदीपदस्य नदीतीरे लक्षणा गम्भीरपदार्थस्य नद्या सहाभेदान्वयः क्वचिदेकदेशान्वयस्यापि स्वीकृतत्वात् यदित्वत्रैकदेशान्वयो न स्वीक्रियते तदा नदीपदस्य गम्भीरनदीतीरे लक्षणा गम्भीरपदं तात्पर्यग्राहकम् । बहुव्रीहावप्येवं तत्र हि चित्रगुपदादौ यद्येकदेशान्वयः स्वीक्रियते तदा गोपदस्य[3] गोमति लक्षणा गवि चित्राभेदान्वयः यदि त्वेकदेशान्वयो न स्वीक्रियते तदा गोपदस्य चित्रगोमति लक्षणा चित्रपदं तात्पर्यग्राहकम् एवमारूढवानरो

---

१ स्ववाच्यरेफद्वयघटितपदवाच्यत्वादिरूपा ।

२ अन्यतरसंबन्धेन य इतरपदार्थः तदन्वितो यः स्वार्थ इत्यर्थः ।

३ प्रत्ययार्थान्वयानुरोधेनोत्तरपदलक्षणाया युक्तत्वादिति भावः ।

वृक्ष इत्यत्र वानरपदस्य वानरारोहणकर्मणि लक्षणा आरूढपदं तात्पर्यग्राहकम् एवमन्यत्रापि बोध्यम् तत्पुरुषे तु पूर्वपदे लक्षणा । तथाहि राजपुरुष इत्यादौ राजपदार्थेन पुरुषपदार्थस्य साक्षान्नान्वयः । निपातातिरिक्तनामार्थयोर्भेदेनान्वयबोधस्याव्युत्पन्नत्वात् अन्यथा. राजापुरुष इत्यत्रापि तथान्वयबोधः स्यात् घटो न पट इत्यादौ घटपटाभ्यां साक्षादेव नञोऽन्वयान्निपातातिरिक्तेति । नीलो घट इत्यादौ नामार्थयोरभेदसंबन्धेनान्वयाद्भेदेनेति । नच राजपुरुष इत्यादौ लुप्तविभक्तेः स्मरणं कल्प्यमिति वाच्यम् अस्मृतविभक्तेरपि ततो बोधोदयात् तस्माद्राजपदादौ राजसंबन्धिनि लक्षणा तस्य पुरुषेण सहाभेदान्वयः द्वन्द्वे तु धवखदिरौ छिन्धीत्यादौ धवः खदिरश्च विभक्त्यर्थद्वित्वप्रकारेण बुध्यते तत्र न लक्षणा नच साहित्ये लक्षणेति वाच्यम् साहित्यशून्ययोरपि द्वन्द्वदर्शनात् । नचैकक्रियान्वयित्वरूपसाहित्यमस्तीति वाच्यम् क्रियाभेदेपि धवखदिरौ छिन्धि पश्येत्यादौ तद्दर्शनात् साहित्यस्याननुभवाच्च अत एव राजपुरोहितौ सायुज्यकामौ यजेयातामित्यत्र लक्षणाभावात् द्वन्द्व आश्रीयते तस्मात्साहित्यं नार्थः । किन्तु वास्तवभेदो यत्र तत्र द्वन्द्वः नच नीलपटयोरभेद इत्यादौ कथमिति वाच्यम् तत्र नीलपदस्य नीलत्वे घटपदस्य घटत्वे लक्षणा अभेद इत्यस्य चाश्रयाभेद इत्यर्थात् । समाहारद्वन्द्वे तु यदि समाहारोप्यनुभूयत इत्युच्यते तदा अहिनकुलमित्यादौ परपदे अहिनकुलसमाहारे लक्षणा पूर्वपदं तु तात्पर्यग्राहकम् नच भेरीमृदङ्गं वादयेत्यत्र

---

१ निपातपदमव्ययस्याप्युपलक्षकं तेन चैत्र इवेत्यादाविवार्थसादृश्ये चैत्रस्य प्रतियोगितयान्वयोपपत्तिः ।

२ साहित्याश्रये इत्यर्थः ।

३ वस्तुगत्यैकक्रियान्वयित्वस्य धवखदिरयोः सत्त्वेप्येकक्रियान्वयित्वस्य शाब्दबोधाभावादित्यर्थः ।

कथं समाहारस्यान्वयः तस्यापेक्षाबुद्धिविशेषरूपस्य वादनासंभवादिति वाच्यम् परम्परासंबन्धेन तदन्वयात् । एवं पञ्चमूलीत्यादावपि । परे तु अहिनकुलमित्यादावहिर्नकुलश्च बुध्यते प्रत्येकमेकत्वान्वयः समाहारसंज्ञा च यत्रैकत्वं नपुंसकत्वम् च "द्वन्द्वश्च प्राणितूर्ये" त्यादिसूत्रेणोक्तम् तत्रैव अन्यत्रैकवचनमसाध्वित्याहुः पितरौ श्वशुरावित्यादौ पितृपदे जनकदम्पत्योः लक्षणा श्वशुरपदे स्त्रीजनकदम्पत्योर्लक्षणा एवमन्यत्रापि घटा इत्यादौ तु न लक्षणा घटत्वेन रूपेण नानाघटोपस्थितिसम्भवात् कर्मधारयस्थले तु नीलोत्पलमित्यादौ अभेदसंबन्धेन नीलपदार्थ उत्पलपदार्थे प्रकारस्तत्र न लक्षणा अत एव निषादस्थपतिं याजयेदित्यत्र न तत्पुरुषः लक्षणापत्तेः किन्तु कर्मधारयः लक्षणाभावात् नच निषादस्य सङ्करजातिविशेषस्य वेदानधिकाराद्याजनासम्भव इति वाच्यम् निषादस्य विद्याप्रयुक्तेस्ततएव कल्पनीयत्वात् लाघवेन मुख्यार्थान्वये तदन्वयानुपपत्त्या कल्पनायाः फलमुखगौरवतया अदोषत्वादिति । उपकुम्भमर्द्धपिप्पलीत्यादौ परपदे तत्संबन्धिनि लक्षणा पूर्वपदार्थप्रधानतयाचान्वयबोध इति इत्थं च समासेन क्वापि शक्तिः पदशक्त्यैव निर्वाहादिति ॥

## आसत्तिर्योग्यताकाङ्क्षा तात्पर्यज्ञानमिष्यते ८२

---

१ अभिघाताख्यसंयोगावच्छिन्नक्रियाया एव वादनपदार्थतया धात्वर्थतावच्छेदकीभूततादृशाभिघाताख्यसंयोगस्य समाहारेऽसंभवेन वादनकर्मत्वासंभवादित्यर्थः ।

२ स्वाश्रयवृत्तित्वरूपसंबन्धेन ।

३ स्त्रीशूद्रौ नाधीयाताम् इत्यनेन निषेधादिति भावः ।

४ श्रुतिबोधितयाजनानुपपत्त्यैवेत्यर्थः ।

५ कुम्भपदलक्षितस्य कुम्भसंबन्धिनः उपपदार्थे समीपे अभेदान्वयात् कुम्भसंबन्ध्यभिन्नं समीपमित्युपपदार्थविशेष्यको अन्वयबोध इत्यर्थः ।

आसत्तिज्ञानं योग्यताज्ञानम् आकाङ्क्षाज्ञानं तात्पर्यज्ञानं शाब्दबोधे कारणम् ८२ ॥

तत्रासत्तिपदार्थमाह ।

## कारणं सन्निधानं तु पदस्यासत्तिरुच्यते ।

सन्निधानमिति । यत्पदार्थेन सह यत्पदार्थस्यान्वयोऽपेक्षित[1]स्तयोरव्यवधानेनोपस्थितिः शाब्दबोधे कारणम् तेन गिरिर्भुक्तं वह्निमान्देवदत्तेनेत्यादौ न शाब्दबोधः नीलो घटो द्रव्यं पट इत्यत्र नासत्तिर्भ्रमाच्छाब्दबोधः । आसत्तिभ्रमेण शाब्दभ्रमाभावेपि न क्षतिः ननु यत्र छत्री कुण्डली वासस्वी देवदत्त इत्याद्युक्तं तत्रोत्तरपदस्मरणेन पूर्वपदस्मरणनाशादव्यवधानेन तदुत्तरपदस्मरणासम्भव इति चेन्न । प्रत्येकपदानुभवजन्यसंस्कारैश्चरमस्य तावत्पदविषयकस्मरणस्याव्यवधानेनोपपत्तेः[2] । नानासन्निकर्षैरेकप्रत्यक्षस्येव नानासंस्कारैरेकस्मरणोत्पत्तेरपि सम्भवात् तावत्पदसंस्कारसहितचरमवर्णज्ञानस्योद्बोधकत्वात्कथम् अन्यथा नानावर्णैरेकपदस्मरणं परंतु तावत्पदार्थानां स्मरणादेकदैव खले कपोतन्यायेन तावत्पदार्थानां क्रियाकर्मभावेनान्वयरूपः शाब्दबोधो भवतीति केचित् " वृद्धा युवानः शिशवः कपोताः खले यथामी युगपत्पतन्ति । तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवन्ति " परे तु " यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते । तेन तेनान्वितः स्वार्थः पदैरेवानुगम्यते" तथा च खण्डवाक्यार्थबोधानन्तरम् तथैव पदार्थस्मृत्या महावाक्यार्थबोधमित्याहुः । इदं तु बोध्यम् यत्र द्वारमित्युक्तं तत्र पिधेहीत्यादिपदस्य ज्ञानादेव बोधः नतु पिधानादिरूपार्थज्ञानात् पदजन्य[3]तत्तत्पदार्थोपस्थिते स्तत्तच्छाब्दबोधे हेतुत्वात् किंच क्रियाक-

---

१ तात्पर्यविषयीभूतः ।

२ अभेदेप्यवधानसंभवादिति भावः ।

३ पदार्थोपस्थितिमात्रस्य हेतुत्वे प्रत्यक्षादिनोपस्थितस्यापि शाब्दबोधापत्तेरतः पदजन्येति ।

र्मपदानां तेन तेनैव सह रूपेणाकाङ्क्षितत्वात् तेन क्रियापदं विना कथं बोधः स्यात् तथा च पुष्पेभ्य इत्यादौ स्पृहयतीत्यादिपदाध्याहारं विना चतुर्थ्यनुपपत्तेः । तस्मात् पदाध्याहार आवश्यकः ॥

योग्यतां निर्वक्ति ।

## पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता ॥ ८३ ॥

एकपदार्थेऽपरपदार्थसंबन्धो योग्यतेत्यर्थः । तज्ज्ञानाभावाच्च वह्निना सिञ्चतीत्यादौ न शाब्दबोधः नन्वेतस्या योग्यताया ज्ञानं शाब्दबोधात्प्राक् सर्वत्र न सम्भवति वाक्यार्थस्यापूर्वत्वा[१]दिति चेन्न । तत्तत्पदार्थस्मरणे सति कचित्संशय[२]रूपस्य कचिन्निश्चयरूपस्यापि योग्यताया ज्ञानस्य सम्भवात् । नव्यास्तु योग्यताज्ञानं न शाब्दबोधहेतुः । वह्निना सिञ्चतीत्यादौ सेके वह्निकरणकत्वाभावरूपा योग्यता निश्चयेन प्रतिबन्धान्न शाब्दबोधः तदभावनिश्चयस्य लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतज्ज्ञानमात्रे प्रतिबन्धकत्वात् शाब्दबोधं प्रत्यपि प्रतिबन्धकत्वं सिद्धम् योग्यताज्ञानविलम्बाच्च शाब्दबोधविलम्बोऽसिद्ध इत्याहुः ॥ ८३ ॥

आकाङ्क्षां निर्वक्ति ।

## यत्पदेन विना यस्याननुभावकता भवेत् ।

येन पदेन विना यत्पदस्यान्वयाननुभावकत्वं तेन पदेन सह तस्याकाङ्क्षेत्यर्थः । क्रियापदं विना कारकपदं नान्वयबोधं जनयति तेन तस्याकाङ्क्षा । वस्तुतस्तु क्रियाकारकपदानां सन्निधानमासत्त्या चरितार्थम् परंतु घटकर्मताबोधं प्रति घटपदोत्तरद्वितीयारूपाकाङ्क्षाज्ञानं

---

१ सर्वत्र शाब्दबोधात् पूर्वमनिश्चितत्वादित्यर्थः ।

२ संशयनिश्चयसाधारणयोग्यताज्ञानस्य हेतुत्वादिति भावः ।

कारणं तेन घटः, कर्मत्वमानयनं कृतिरित्यादौ न शाब्दबोधः अ-यमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यादौ पुत्रेण सह राजपदस्य तात्पर्यग्रहात्तेनैवान्वयबोधः पुरुषेण सह तात्पर्यग्रहे तु तेन सहान्वयबोधः स्यादेव ॥

तात्पर्यं निर्वक्ति।

## आकाङ्क्षा वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम् ८४

यदि तात्पर्यज्ञानं कारणं न स्यात् तदा सैन्धवमानयेत्यादौ क्वचिदश्वस्य क्वचिल्लवणस्य बोध इति न स्यात् नच तात्पर्यग्राहकाणां प्रकरणादीनां शाब्दबोधे कारणत्वमस्त्विति वाच्यम् तेषामननुगमात् । तात्पर्यज्ञानजनकत्वेन तेषामनुगमे तु तात्पर्यज्ञानमेव लाघवात् कारणमस्तु इत्थं च वेदस्थलेपि तात्पर्यज्ञानार्थमीश्वरः कल्प्यते नच तत्राध्यापकतात्पर्यज्ञानं कारणमिति वाच्यम् सर्गादावाध्यापकाभावात् नच प्रलय एव नास्ति कुत्र सर्गादिरिति वाच्यम् प्रलयस्यागमे प्रतिपाद्यत्वात् इत्थं च शुकवाक्येपीश्वरीयतात्पर्यज्ञानं कारणम् । विसंवादिशुकवाक्ये तु शिक्षयितुरेव तात्पर्यज्ञानं कारणं वाच्यम् । अन्ये तु नानार्थादौ क्वचिदेव तात्पर्यज्ञानं कारणम् तथा च शुकवाक्ये विनैव तात्पर्यज्ञानं शाब्दबोधः । वेदे त्वनादिमीमांसापरिशोधिततर्कैरर्थावधारणमित्याहुः ॥ ८४ ॥

इति शब्दखण्डं समाप्तम् ।

पूर्वमनुभवस्मरणभेदाद्बुद्धेर्द्वैविध्यमुक्तम् तत्रानुभवप्रकारा दर्शिताः स्मर-

---

१ घटमानयेत्यादौ कर्मत्वविशेष्यकाधेयतासंसर्गकघटप्रकारकप्रतीतीच्छा वक्तुस्तात्पर्यं तादृशेच्छयोच्चरितमिदं वाक्यमित्याकारकं श्रोतुस्तात्पर्यज्ञानं शाब्दबोधकारणमित्यर्थः ।

२ शाब्दबुद्धित्वावच्छिन्नं प्रति तात्पर्यज्ञानस्य हेतुत्वे चेत्यर्थः ।

३ गृहीतनानार्थवृत्तिकादावित्यर्थः ।

णं तु सुगमतया न दर्शितम् तत्र हि पूर्वानुभवः कारणम् अत्र केचित् अनुभवत्वेन न कारणत्वं किंतु ज्ञानत्वेनैव ।अन्यथा प्रकृत् अनुभूतस्थले स्मरणोत्तरस्मरणं न स्यात् समानप्रकारकस्मरणेन पूर्वसंस्कारस्य विनष्टत्वात् मन्मते तु तेनैव स्मरणेन संस्कारान्तरद्वारा स्मरणान्तरं जन्यते इत्याहुस्तन्न । यत्र समूहालम्बनोत्तरं घटपटादीनां क्रमेण स्मरणमजनिष्ट सकलविषयकस्मरणं तु नाभूत्तत्र फलस्य संस्कारनाशकत्वाभावात् । कालस्य रोगस्य वा चरमफलस्य वा संस्कारनाशकत्वं वाच्यम् । तथाच न क्रमिकस्मरणानुपपत्तिः । नच पुनः पुनः स्मरणाद्दृढतरसंस्कारानुपपत्तिरिति वाच्यम् झटित्युद्बोधकसमवधानस्य दार्ढ्यपदार्थत्वात् नच विनिगमनाविरहादेव ज्ञानत्वेनापि जनकत्वं स्यादिति वाच्यम् विशेषधर्मेण व्यभिचाराज्ञाने सामान्यधर्मेणान्यथासिद्धत्वात् । कथमन्यथा दण्डस्य भ्रमिद्वारा द्रव्यत्वेन रूपेण कारणत्वम् नचान्तरालिकस्मरणानां संस्कारनाशकत्वसंशयाद्व्यभिचारसंशय इति वाच्यम् अनन्तसंस्कारतन्नाशककल्पनापेक्षया लाघवेन चरमस्मरणस्यैव संस्कारनाशकत्वकल्पनेन व्यभिचारसंशयाभावात् ॥

इति स्मृतिप्रक्रिया ।

इदानीं क्रमप्राप्तं मनो निरूपयति ।

## साक्षात्कारे सुखादीनां करणं मन उच्यते ।
## अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहोच्यते ८५

साक्षात्कार इति । एतेन मनसि प्रमाणं दर्शितम् तथाहि सुखसाक्षात्कारः सकरणकः जन्यसाक्षात्कारत्वात् । चाक्षुषसाक्षात्कारवदि-

---

१ अनुभवस्य नष्टत्वादिति भावः ।

२ संस्कारनाशकेन समानप्रकारकस्मरणेनैव ।

३ अनुभवत्वेन व्यभिचारसंशय इत्यर्थः ।

त्यनुमानेन मनसः करणत्वसिद्धिः नचैवं दुःखादिसाक्षात्काराणामपि करणान्तराणि स्युरिति वाच्यम् लाघवादेकस्यैव सकलसाक्षात्कारकरणतया सिद्धेः एवं सुखादीनामसमवायिकारणसंयोगाश्रयतया मनसः सिद्धिर्बोद्धव्या । मनसोऽणुत्वे प्रमाणमाह अयौगपद्यादिति । ज्ञानानां चाक्षुषरासनादीनां अयौगपद्यमेककालोत्पत्तिर्नास्तीत्यनुभवसिद्धम् । तत्र नानेन्द्रियाणां सत्यपि विषयसन्निधाने यत्संबन्धादेकेनेन्द्रियेण ज्ञानं जन्यते यदसंबन्धाच्च परैर्ज्ञानं नोत्पाद्यते तन्मनः तन्मनसो विभुत्वे चासन्निधानं न संभवतीति न विभु मनः नच तदानीमदृष्टविशेषोद्बोधकविलम्बादेव तज्ज्ञानविलम्ब इति वाच्यम् तथा सति चक्षुरादीनामप्यकल्पनापत्तेः नच दीर्घशष्कुलीभक्षणादौ नानावधानभाजां च कथमेकदानेकेन्द्रियजन्यज्ञानमिति वाच्यम् मनसोतिलाघवाज्झटिति नानेन्द्रियसंबन्धान्नानाज्ञानोत्पत्तेः उत्पलशतपत्रभेदादिवद्यौगपद्यप्रत्ययस्य भ्रान्तत्वात् नच मनसः संकोचविकाशशालित्वादुभयोपपत्तिरिति वाच्यम् नानावयवतन्नाशादिकल्पने गौरवाल्लाघवान्निरवयवस्याणुरूपस्यैव मनसः कल्पनादिति संक्षेपः ॥ ८५ ॥

इति द्रव्यपदार्थो व्याख्यातः ।

## द्रव्यं निरूप्य गुणान् निरूपयति ।

# अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रियागुणाः ।

गुणत्वजातौ किंमानमिति चेत् इदं द्रव्यकर्मभिन्ने सामान्यव-

---

१ भावकार्यस्य समवायिकारणकत्वनियमादिति भावः ।

२ अव्यवहितकालोत्पत्तिकत्वस्य दोषत्वादिति भावः ।

३ यद्यपि गुणत्वजातौ प्रत्यक्षमेव प्रमाणं रूपादिषु संयुक्तसमवेतसमवायेन गुणत्वप्रत्यक्षसंभवात्तथापि अतीन्द्रियरूपादौ तत्प्रत्यक्षासंभवेन तत्साधारण्यं गुणत्वस्य न घटत इत्यनुमानं प्रदर्शितम् ।

ति या कारणता सा किंचिद्धर्मावच्छेद्या निरवच्छेद्यकारणतया असम्भवात् । नहि रूपत्वादिकं सत्ता वा तत्रावच्छेदिकान्यूनाधिकदेशवृत्तित्वादतश्चतुर्विंशत्यनुगतं किंचित् वाच्यं तदेव गुणत्वमिति । द्रव्याश्रिता इति । यद्यपि द्रव्याश्रितत्वं न लक्षणं कर्मादावतिव्याप्तेः । तथापि द्रव्यत्वव्यापकतावच्छेदकसत्ताभिन्नजातिमत्त्वं तदर्थः भवति हि गुणत्वं द्रव्यत्वव्यापकतावच्छेदकं तद्वत्ता च गुणानामिति । द्रव्यत्वं कर्मत्वं वा न द्रव्यत्वव्यापकतावच्छेदकं गगनादौ द्रव्यकर्मणोरभावात् द्रव्यत्वत्वं सामान्यत्वादिकं वा न जातिरिति तद्व्युदासः । निर्गुणा इति । यद्यपि निर्गुणत्वं कर्मादावपि तथापि सामान्यवत्त्वे सति कर्मान्यत्वे च सति निर्गुणत्वं बोध्यम् जात्यादीनां न सामान्यवत्त्वं कर्मणो न कर्मान्यत्वं द्रव्यस्य न निर्गुणत्वमिति । तत्र नातिव्याप्तिः । निष्क्रिया इति स्वरूपकथनं नतु लक्षणम् गगनादावतिव्याप्तेः ॥

Indira Gandhi National
Centre for the Arts

**रूपं रसः स्पर्शगन्धौ परत्वमपरत्वकम् ॥ ८६ ॥**
**द्रवत्वस्नेहवेगाश्च मता मूर्तगुणा अमी ।**
**धर्माधर्मौ भावना च शब्दो बुद्ध्यादयोपि च ८७**
**एतेऽमूर्तगुणा सर्वे विद्वद्भिः परिकीर्तिताः ।**
**संख्यादयो विभागान्ताः उभयेषां गुणा मताः८८**

वेगा इति । वेगेन स्थितिस्थापकोप्युपलक्षणीयः । मूर्तगुणा इति । अमूर्तेषु न वर्तन्ते इत्यर्थः । अमूर्तगुणा इति । मूर्तेषु न वर्तन्त इत्यर्थः । उभयेषामिति । मूर्तामूर्तगुणा इत्यर्थः । लक्षणं तु मूर्तवृत्ति-

---

१ सत्तारूपजातिमादाय द्रव्यादावतिव्याप्तिवारणाय सत्ताभिन्नेति ।
२ अमूर्तावृत्तिगुणत्वं प्रदर्शितगुणानां साधर्म्यमित्यर्थः ।

वृत्तिपदमूर्तवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वं संख्यात्वादिकमादाय लक्षणसमन्वयः ॥ ८६ ॥ ८७ ॥ ८८ ॥

**संयोगश्च विभागश्च संख्या द्वित्वादिकास्तथा ।**
**द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः ॥ ८९ ॥**

अनेकाश्रिता इति । संयोगविभागद्वित्वादीनि द्विवृत्तीनि त्रित्वचतुष्ट्वादिकत्रिचतुरादिवृत्तीति बोध्यम् ॥ ८९ ॥

**अतः शेषगुणाः सर्वे मता एकैकवृत्तयः ।**
**बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः ॥ ९० ॥**

रूपरसगन्धस्पर्शैकत्वपरिमाणैकपृथक्त्वपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्काराऽदृष्टशब्दा इत्यर्थः । बुद्ध्यादीति । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्ना इत्यर्थः । स्पर्शान्ताः रूपरसगन्धस्पर्शा इत्यर्थः । द्रवो द्रवत्वम् ॥ ९० ॥

**अदृष्टभावना शब्दा अमी वैशेषिका गुणाः ।**
**संख्यादिरपरत्वान्तो द्रवो सांसिद्धिकस्तथा ९१**
**गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्तिताः ।**

---

१ अनेकाश्रितत्वं संयोगादावव्याप्तमनेकपदस्य बहुत्वे विशिष्टे शक्तत्वादित्यत आह संयोगेति तथा च एकत्वाभिन्नसंख्याविशिष्टवाचकत्वमनेकपदस्येति न तत्राव्याप्तिरिति भावः ।

२ एकैकवृत्तय इति मूलस्य स्वाश्रयान्योन्याभावव्यापकात्यन्ताभावप्रतियोगिन इत्यर्थः स्वमेकत्वम् ।

३ सामान्यगुणत्वं च रूपस्पर्शान्यत्वे सति द्रव्यविभाजकोपाधिव्याप्यतावच्छेदकसंयोगविभागवेगद्रव्यत्वावृत्तिजातिशून्यगुणत्वं द्रव्यविभाजकतावच्छेदकं पृथिवीत्वादितद्व्याप्यतावच्छेदकं च गन्धत्वादितच्छून्यत्वस्य संख्यादौ सत्त्वाल्लक्षणसंगतिः ।

संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च ॥९२॥

वैशेषिकाः विशेषा एव वैशेषिकाः स्वार्थे ठक् विशेषगुणा इत्यर्थः । संख्यादिरिति । संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानीत्यर्थः ॥ ॥ ९१ ॥ ९२ ॥

एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दकाः ।
बाह्यैकैकेन्द्रियग्राह्या गुरुत्वादृष्टभावना ॥ ९३ ॥

चक्षुषा त्वचापि ग्रहयोग्यत्वात् बाह्येति । रूपादीनां चक्षुरादिग्राह्यत्वात् ॥ ९३ ॥

अतीन्द्रिया विभूनां तु ये स्युर्वैशेषिका गुणाः ।
अकारणगुणोत्पन्ना एते तु परिकीर्तिताः ॥ ९४ ॥

बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा इत्यर्थः । कारणगुणेन कार्ये गुणा ये उत्पाद्यन्ते ते कारणगुणपूर्वका रूपादयो वक्ष्यन्ते बुद्ध्यादयस्तु न तादृशाः आत्मादेः कारणाभावात् ॥ ९४ ॥

अपाकजास्तु स्पर्शान्ता द्रवत्वं च तथाविधम् ।
स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकम् ॥ ९५ ॥
स्थितिस्थापक इत्येते स्युः कारणगुणोद्भवाः ।

पाकजरूपादीनां कारणगुण[1]पूर्वकत्वाभावादपाकजा इत्युक्तम् । तथाविधमपाकजम् । तथैकत्वमपि बोध्यम् स्पष्टम् ॥

संयोगश्च विभागश्च वेगश्चैते तु कर्मजाः ॥ ९६॥

संयोगश्चेति । कर्मजन्यत्वं यद्यपि न साधर्म्यं घटादावतिव्याप्तेः ।

---

१ कारणगुणपूर्वकत्वव्यवहाराभावात् ।

संयोगजसंयोगेऽव्याप्तेश्च तथापि कर्मजन्यवृत्तिगुणत्वव्याप्यजातिमत्त्वं बोध्यम् । एवमन्यत्राप्यूह्यम् ॥ ९५ ॥ ९६ ॥

स्पर्शान्तपरिमाणैकपृथक्त्वं स्नेहशब्दके ।
भवेदसमवायित्वमथ वैशेषिके गुणे ॥ ९७ ॥
आत्मनः स्यान्निमित्तत्वं उष्णस्पर्शगुरुत्वयोः ।
वेगेपि च द्रवत्वे च संयोगादिद्वये तथा ॥९८॥

पृथक्त्वमित्यत्र त्वप्रत्ययस्य प्रत्येकमन्वयादेकत्वम् पृथक्त्वं च ग्राह्यम् पृथक्त्वपदेन चैकपृथक्त्वम् । भवेदसमवायित्वमिति । घटादिरूपरसगन्धस्पर्शाः कपालादिरूपरसगन्धस्पर्शेभ्यो भवन्ति एवं कपालादिपरिमाणादीनां घटादिपरिमाणाद्यसमवायिकारणत्वम् शब्दस्यापि द्वितीयशब्दं प्रति एवं स्थितिस्थापकैकपृथक्त्वयोरपि ज्ञेयम् । बुद्ध्यादीनामिच्छादिनिमित्तत्वादिति भावः ॥ ९७ ॥ ९८ ॥

द्विधैव कारणत्वं स्यादथ प्रादेशिको भवेत् ।
वैशेषिको विभुगुणः संयोगादिद्वये तथा ॥ ९९ ॥

असमवायिकारणत्वं निमित्तकारणत्वं च तथाहि उष्णस्पर्श उष्णस्पर्शस्यासमवायिकारणम् पाकजे निमित्तम् गुरुत्वं गुरुत्वपतनयोरसमवायिकारणमभिघाते निमित्तम् वेगो वेगस्पन्दयोरसमवायिअभिघाते निमित्तम् द्रवत्वं द्रवत्वस्पन्दनयोरसमवायिसंग्रहे निमित्तं भेरीदण्डसंयोगः शब्दे निमित्तं भेर्याकाशसंयोगोऽसमवायिवंशदलद्वयविभागः शब्दे निमित्तं वंशदलाकाशविभागोऽसमवायीति प्रादेशिकः अव्याप्यवृत्तिः ॥ ९९ ॥

---

१ एकत्वमेकपृथक्त्वं चेत्यर्थो बोध्यः ।
२ अवयवगत उष्णस्पर्श इत्यर्थः ।
३ सक्त्वादिसंयोगविशेषे ।
४ दैशिकेत्यादिस्तेन रूपादौ नातिव्याप्तिः ।

चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलम्भकम् ।
चक्षुषः सहकारि स्याच्छुक्लादिकमनेकधा ॥१००॥

रूपत्वजातिस्तु प्रत्यक्षसिद्धा रूपशब्दोल्लेखिनी प्रतीतिर्नास्तीति चेन्मास्तु रूपशब्दप्रयोगः तथापि नीलपीतादिष्वनुगतजातिविशेषोऽनुभवसिद्ध एव रूपशब्दाप्रयोगेपि नीलो वर्णः पीतो वर्ण इति वर्णशब्दोल्लेखिनी प्रतीतिरस्त्येव । एवं नीलत्वादिकमपि प्रत्यक्षसिद्धम् नचैकैका एव नीलारुणादिव्यक्तय इत्येकव्यक्तिवृत्तित्वान्नीलत्वादिकन्न जातिरिति वाच्यम् नीलो नष्टो रक्त उत्पन्न इत्यादिप्रतीतेर्नीलादेरुत्पादविनाशशालितया नानात्वात् अन्यथा एकनीलनाशे जगदनीलता मापद्येत । नच नीलसमवायरक्तसमवाययोरेवोत्पादविनाशविषयकोऽसौ प्रत्यय इति वाच्यम् प्रतीत्या समवायानुल्लेखात् नच स एवायन्नील इति प्रत्यक्षबलाल्लाघवाच्चैक्यमिति वाच्यम् । प्रत्यक्षस्य तज्जातीयविषयत्वात् सैवेयं गुर्जरीतिवत् लाघवं तु प्रत्यक्ष[1]बाधितम् अन्यथा घटादीनामप्यैक्यप्रसङ्गात् उत्पादविनाशबुद्धेः समवायालम्बनत्वापत्तेरिति एतेन रसादिकमपि व्याख्यातम् चक्षुर्ग्राह्यमिति चक्षुर्ग्राह्यविशेषगुणत्वमित्यर्थः । एवमग्रेपि द्रव्यादेरिति । उपलम्भकमुपलब्धिकारणम् इदमेव विवृणोति चक्षुष इति । द्रव्यगुणकर्मसामान्यानां चाक्षुषप्रत्यक्षं प्रति उद्भूतरूपं कारणम् शुक्लादिकमनेकधेति । तच्च रूपं शुक्लनीलपीतरक्तहारितकर्बुरादिभेदादनेकप्रकारकं भवति ननु कथं कर्बुरमतिरिक्तरूपं भवति इत्थं नीलपीताद्यवयवारब्धोऽवयवी न तावन्नीलरूपोऽप्रत्यक्षत्वप्रसङ्गात्[2] नापि व्याप्यवृत्तिनीलादिकं रूपमुत्पद्यते पीतावच्छेदेनापि नीलोपलब्धिप्रसङ्गात् नाप्यव्याप्यवृत्तिनीलादिकमुत्पद्यते व्याप्यवृत्तिजातीयगुणानामव्याप्यवृत्तित्वे विरोधात् । तस्मान्नानाजातीयरूपैरवयवि-

---

१ नीलो नष्टो रक्त उत्पन्न इत्यादिप्रत्यक्षबाधितमित्यर्थः ।

२ द्रव्यचाक्षुषं प्रति समवायसंबन्धेनोद्भूतरूपस्य हेतुत्वादिति भावः ।

नि विजातीयं चित्रं रूपमारभ्यते अत एवैकं चित्ररूपमित्यनुभवोपि नानारूपकल्पने गौरवात् इत्थं च नीलादीनां पीताद्यारम्भे प्रतिबन्धकत्वकल्पनात् । अवयविनि न पीताद्युत्पत्तिः एतेन स्पर्शोपि व्याख्यातः रसादिकमपि नाव्याप्यवृत्तिः किंतु नानाजातीयरसवदवयवैरारब्धेऽवयविनि रसाभावेपि न क्षतिः तत्र रसनयाऽवयवरस एव गृह्यते रसनेन्द्रियादीनां द्रव्यग्रहे सामर्थ्याभावात् अवयविनो नीरसत्वेपि क्षतेरभावात् नव्यास्तु तत्राव्याप्यवृत्त्येव नानारूपम् नीलादेः पीतादिप्रतिबन्धकत्वकल्पनागौरवात् । अत एव " लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः । श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते " इत्यादिशास्त्रमप्युपपद्यते नच व्याप्याव्याप्यवृत्तिजातीयद्वयोर्विरोधः मानाभावात् नच लाघवादेकं रूपम् अनुभवविरोधात् अन्यथा घटादेरपि लाघवादैक्यं स्यात् एतेन स्पर्शादिकमपि व्याख्यातमिति वदन्ति ॥ १०० ॥

Indira Gandhi National Centre for the Arts

## जलादिपरमाणौ तन्नित्यमन्यत्सहेतुकम् । रसस्तु रसनाग्राह्यो मधुरादिरनेकधा ॥ १०१ ॥

जलपरमाणौ तेजःपरमाणौ च रूपं नित्यम् पृथिवीपरमाणुरूपं तु न नित्यम् तत्र पाकेन रूपान्तरोत्पत्तेः । नहि घटस्य पाकानन्तरं तदवयवोऽपक्व उपलभ्यते नहि रक्तकपालस्य कपालिका नीलावयवा भवति एवं क्रमेण परमाणावपिपाकरूपसिद्धेः अन्यत् जलतेजःपरमाणुरूपभिन्नरूपम् सहेतुकं जन्यम् ॥ १०१ ॥

---

१ चित्रमिति प्रतीतिविषयताया अनेकत्र कल्पने गौरवादित्यर्थः ।

२ समवायसंबन्धेन नीलं प्रति स्वसमवायिसमवेतत्वसंबन्धेन नीलातिरिक्तरूपत्वेन पीतरूपं प्रति पीतातिरिक्तरूपत्वेन प्रतिबन्धकत्वमिति रीत्या प्रतिबध्यप्रतिबन्धकभावकल्पनादन्यथा नानाजातीयरूपवत् कपालारब्धे घटे नीलकपालाद्यवच्छेदेन पीतोत्पादापत्तेर्दुर्वारत्वादिति बोध्यम् ।

रसं निरूपयति ।

## सहकारि रसज्ञाया नित्यतादि च पूर्ववत् ।

रासनज्ञाने रसः कारणमित्यर्थः । पूर्ववदिति । जलपरमाणौ रसो नित्यः अन्यः सर्वोपि रसोऽनित्य इत्यर्थः ॥

गन्धं निरूपयति ।

## घ्राणग्राह्यो भवेद्गन्धो घ्राणस्यैवोपकारकः॥१०२॥
## सौरभश्चासौरभश्च स द्वेधा परिकीर्तितः ।

घ्राणजन्यज्ञाने सहकारी स इत्यर्थः । सर्वोपि गन्धो अनित्यएव ॥

स्पर्शं निरूपयति ।

## स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः ॥ १०३ ॥

उपकारक इति । स्पार्शनप्रत्यक्षे स्पर्शः कारणमित्यर्थः॥१०२॥१०३॥

## अनुष्णाशीतशीतोष्णभेदात्स त्रिविधो मतः ।
## काठिन्यादि क्षितावेव नित्यतादि च पूर्ववत् १०४

पृथिव्यां वायौ च स्पर्शोनुष्णाशीतः जले शीतः तेजस्युष्णः कठिनसुकुमारस्पर्शौ पृथिव्यामेवेत्यर्थः । कठिनत्वादिकं तु न संयोगगतो जातिविशेषः चक्षुर्ग्राह्यत्वापत्तेः जलतेजोवायुपरमाणुस्पर्शा नित्यास्तद्भिन्नास्त्वनित्या इत्यर्थः ॥ १०४ ॥

## एतेषां पाकजत्वं तु क्षितौ नान्यत्र कुत्रचित् ।
## तत्रापि परमाणौ स्यात्पाको वैशेषिके नये॥१०५॥

---

१ कठिनः संयोग इति प्रतीतिस्तु कठिनस्पर्शवद्द्रव्यप्रतियोगिकत्वमवगाहते इति भावः ।

एतेषां रूपरसगन्धस्पर्शानाम् । नान्यत्रेति । पृथिव्यां हि रूपरसगन्धस्पर्शपरावृत्तिरग्निसंयोगादुपलभ्यते नहि शतधा ध्मायमाने जले रूपादिकं परिवर्तते नीरे सौरभमौष्ण्यञ्चान्वयव्यतिरेकाभ्यामापौधिकमेवेति निर्णीयते पवनपृथिव्योः शीतस्पर्शादिवत् तत्रापि पार्थिवेष्वपि मध्ये परमाणावेव रूपादीनां पाक इति वैशेषिका वदन्ति तेषामयमाशयः अवयविनावष्टब्धेष्ववयवेषु पाको[1] न संभवति । परंतु वह्निसंयोगेनावयविषु विनष्टेषु[2] स्वतन्त्रेषु परमाणुषु पाकः पुनश्च पक्वपरमाणुसंयोगाद्‍द्व्यणुकादिक्रमेण पुनर्महावयविपर्यन्तमुत्पत्तिः । तेजसामतिशयितवेगवशात् पूर्वव्यूहनाशो[3] झटिति व्यूहान्तरोत्पत्तिश्चेति अथ द्व्यणुकादिविनाशमारभ्य कतिभिः क्षणैः पुनरुत्पत्त्या रूपादिमद्भवतीति शिष्यबुद्धिवैशद्याय[4] क्षणप्रक्रिया । तत्र विभागजविभागानङ्गीकारे नव क्षणाः । तदङ्गीकारे तु विभागः । किञ्चित्सापेक्षो विभागं जनयेत् । निरपेक्षस्य तत्त्वे[5] कर्मत्वं स्यात् "संयोगविभागयोरनपेक्षं कारणं कर्मेति" हि वैशेषिकं सूत्रम् स्वोत्तरोत्पन्नभावानपेक्षत्वं तस्यार्थः । अन्यथा कर्मणोप्युत्तरसंयोगोत्पत्तौ पूर्वसंयोगनाशापेक्षणादव्याप्तिः[6] स्यात् तत्र यदि द्रव्यारम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात्तदा दश क्षणाः अथ द्रव्यनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात्तदैकादश क्षणाः । तथाहि अथ नव क्षणाः वह्निसंयोगात्परमाणौ कर्म ततः परमाण्वन्तरेण विभागः ततः आरम्भकसंयोगनाशः ततो द्व्यणुकनाशः १ ततः परमाणौ श्यामा-

---

१ रूपादिपरावृत्तिफलकः तेजःसंयोगो न संभवतीत्यर्थः ।

२ कार्यद्रव्यध्वंसविशिष्टेषु ।

३ व्यूहः संस्थानम् ।

४ वैशद्यमुत्पत्तिः ।

५ विभागजनकत्वे ।

६ कर्मलक्षणस्यातिव्याप्तिः ।

दिनाशः २ ततो रक्ताद्युत्पत्तिः ३ ततो द्रव्यारम्भानुगुणा क्रिया ४ ततो विभागः ५ ततः पूर्वसंयोगनाशः ६ तत आरम्भकसंयोगः ७ ततो द्व्यणुकोत्पत्तिः ८ ततो रूपाद्युत्पत्तिः ९ इति नव क्षणाः। ननु श्यामादिनाशक्षणे रक्तोत्पत्तिक्षणे वा परमाणौ द्रव्यारम्भानुगुणक्रियाऽस्त्विति चेन्न अग्निसंयुक्ते परमाणौ यत्कर्म तद्विनाशमन्तरेण गुणोत्पत्तिमन्तरेण च परमाणौ क्रियान्तराभावात् कर्मवति[1] कर्मान्तरानुत्पत्तेः निर्गुणे द्रव्ये द्रव्यारम्भानुगुणक्रियानुपपत्तेश्च तथापि परमाणौ श्यामादिनिवृत्तिसमकाले रक्ताद्युत्पत्तिः स्यादिति चेन्न । पूर्वरूपादिध्वंसस्यापि रूपान्तरे हेतुत्वात् । अथ दश क्षणाः । सचारम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागेन विभागजनने सति स्यात् तथाहि वह्निसंयोगाद् द्व्यणुकारम्भके परमाणौ कर्म ततो विभागः तत आरम्भकसंयोगनाशः ततो द्व्यणुकनाशविभागजविभागौ १ ततः श्यामनाशपूर्वसंयोगनाशौ[2] २ ततो रक्तोत्पत्त्युत्तरसंयोगौ ३ ततो वह्निनोदनजन्यपरमाणुकर्मणो नाशः ४ ततोऽदृष्टवदात्मसंयोगाद्द्रव्यारम्भानुगुणा क्रिया ५ ततो विभागः ६ ततश्च पूर्वसंयोगनाशः ७ तत आरम्भकसंयोगः ८ ततो द्व्यणुकोत्पत्तिः ९ ततो रक्तोत्पत्तिः १० अथैकादश क्षणाः । वह्निसंयोगात्परमाणौ कर्म ततो विभागः । ततो द्रव्यारम्भकसंयोगनाशः ततो द्व्यणुकनाशः १ ततो द्व्यणुकनाशविशिष्टकालमपेक्ष्य विभागजविभागश्यामनाशौ २ ततः पूर्वसंयोगनाशरक्तोत्पत्ती ३ तत उत्तरदेशसंयोगः ४ ततो वह्निनोदनजन्यपरमाणौ कर्मनाशः ५ ततोऽदृष्टवदात्मसंयोगाद्द्रव्यारम्भानुगुणा क्रिया ६ ततो विभागः ७ ततः पूर्वसंयोगनाशः ८ ततो द्रव्यारम्भकोत्तरसंयोगः ९ ततो द्व्यणुकोत्पत्तिः १० ततो रक्ताद्युत्पत्तिः ११ मध्यशब्दवदे-

---

१ कर्मवति कर्मान्तरानुदयेन कर्मोत्पत्तौ कर्मणः प्रतिबन्धकत्वादिति भावः ।

२ परमाणुश्यामनाशपरमाण्वाकाशसंयोगनाशावित्यर्थः ।

कस्मादग्निसंयोगान्न रूपनाशोत्पादौ तावत्काल[1]मेकस्याग्नेरस्थिरत्वात् । किञ्च नाशक एवोत्पादकस्तदा नष्टे रूपादावग्निनाशे नीरूपश्चिरं परमाणुः स्यात् उत्पादकश्चेन्नाशकस्तदा रक्तोत्पत्तौ तदग्नेर्नाशे रक्ततरता[2] न स्यात् । अथ परमाण्वन्तरे कर्मचिन्तनात् पञ्चमादिक्षणेपि गुणोत्पत्तिः तथाहि एकत्र परमाणौ कर्म ततो विभागः ततः आरम्भकसंयोगनाशपरमाण्वन्तरकर्मणी ततो द्व्यणुकनाशः परमाण्वन्तरकर्मजन्यविभागः इत्येकः कालः १ ततः श्यामादिनाशो विभागाच्च पूर्वसंयोगनाशश्चेत्येकः कालः २ ततो रक्तोत्पत्तिर्द्रव्यारम्भकसंयोग इत्येकः कालः ३ अथ द्व्यणुकोत्पत्तिः ४ ततो रक्तोत्पत्तिरिति ५ पञ्च क्षणाः द्रव्यनाशसमकालं परमाण्वन्तरे कर्मचिन्तनात् षष्ठे गुणोत्पत्तिः तथाहि परमाणुकर्मणा परमाण्वन्तरविभागः तत आरम्भकसंयोगनाशः ततो द्व्यणुकनाशपरमाण्वन्तरकर्मणी अथ श्यामादिनाशः परमाण्वन्तरे कर्मजो विभागश्च २ ततो रक्तोत्पत्तिः परमाण्वन्तरे पूर्वसंयोगनाशश्च ३ ततः परमाण्वन्तरसंयोगः ४ ततो द्व्यणुकोत्पत्तिः ५ अथ रक्तोत्पत्तिः ६ एवं श्यामनाशक्षणे परमाण्वन्तरे कर्मचिन्तनात् सप्त क्षणाः तथाहि परमाणौ कर्म ततः परमाण्वन्तरे विभागः । तत आरम्भकसंयोगनाशः ततो द्व्यणुकनाशः १ ततः श्यामादिनाशपरमाण्वन्तरकर्मणी २ ततो रक्तोत्पत्तिः परमाण्वन्तरे कर्मजविभागश्च ३ ततः परमाण्वन्तरेण पूर्वसंयोगनाशः ४ ततः परमाण्वन्तरेण संयोगः ५ ततो द्व्यणुकोत्पत्तिः ६ ततो रक्तोत्पत्तिरि-

---

१ श्यामनाशोत्पत्त्यव्यवहितपूर्वक्षणपर्यन्तमित्यर्थः ।

२ अत्रायं भावः रूपनाशकतावच्छेदकं विलक्षणाग्निसंयोगत्वं तदेव यद्युत्पादकतावच्छेदकं तदा कार्यतावच्छेदकमपि सामान्यतःपृथ्वीपरमाणुरूपत्वं त्वया वाच्यम् तथा सति क्वचिद्रक्ततरता क्वचिच्च रक्ततमता परमाणौ न स्यात् कार्यवैचित्र्यस्य कारणतावच्छेदकभेदाधीनत्वादिति सिन्दूरादौ रक्ततारतम्यस्यानुभाविकतया तत्परमाणुषु तस्यावश्यंभावादिति बोध्यम् ।

ति ७ एवं रक्तोत्पत्तिसमकालपरमाण्वन्तरे कर्मचिन्तनादष्ट क्षणाः । तथाहि परमाणौ कर्म ततः परमाण्वन्तरविभागः । ततः आरम्भकसंयोगनाशः ततो द्व्यणुकनाशः १ ततः श्यामनाशः २ ततो रक्तोत्पत्तिपरमाण्वन्तरकर्मणी ३ ततः परमाण्वन्तरकर्मजविभागः ४ ततः पूर्वसंयोगनाशः ५ ततः परमाण्वन्तरसंयोगः ६ ततो द्व्यणुकोत्पत्तिः ७ अथ रक्तोत्पत्तिरित्यष्ट क्षणाः ॥ १०५ ॥

## नैयायिकानान्तु नये द्व्यणुकादावपीष्यते।

नैयायिकानां मते द्व्यणुकादाववयविन्यपि पाको भवति तेषामयमाशयः अवयविनां सच्छिद्रत्वाद्वह्नेः सूक्ष्मावयवैरन्तःप्रविष्टैरवयवेष्ववष्टब्धेष्वपि पाको न विरुद्ध्यते अनन्तावयवितन्नाशकल्पने गौरवम् इत्थंच सोऽयं घट इत्यादौ प्रत्यभिज्ञापि[3] संगच्छते । यत्र तु न प्रत्यभिज्ञा तत्रावयविनाशोपि स्वीक्रियत इति ॥

संख्यां निरूपयितुमाह ।

## गणनाव्यवहारे तु हेतुः संख्या विधीयते ॥ १०६ ॥

गणनव्यवहारासाधारणं[4] कारणं संख्येत्यर्थः ॥ १०६ ॥

## नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते।

नित्येषु परमाण्वादिषु एकत्वं नित्यम् अनित्ये घटादावेकत्वमनित्यमित्यर्थः ॥

---

१ द्व्यणुकारम्भकसंयोगनाशाद्युत्पत्त्यादिक्षणे द्व्यणुकान्तरारम्भककर्मचिन्तनादित्यर्थः ।

२ वक्ष्यमाणः ।

३ पूर्वावयविनाशे तूत्तरोत्पन्नावयविपूर्वावयविनोरभेदाभावे नाभेदावगाहिनी प्रत्यभिज्ञा न स्यादिति भावः ।

४ कालाद्यतिव्याप्तिवारकमसाधारणमिति वस्तुतः गणनं संख्यात्वं तत्प्रकारको व्यवहारस्तत्प्रकारकं प्रमात्मकं ज्ञानं तद्धेतुस्तद्विषय इत्यर्थान्न कालादावतिव्याप्तिरिति बोध्यम् ।

द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजा मताः १०७

द्वित्वादयो व्यासज्यवृत्तिसंख्या अपेक्षा[1]बुद्धिजन्याः ॥ १०७ ॥

अनेकाश्रयपर्याप्ता एते तु परिकीर्तिताः ।

यद्यपि द्वित्वादिसमवायः प्रत्येकं घटादावपि वर्तते तथापि एको द्वाविति प्रत्ययाभावात् । एको न द्वाविति प्रत्ययसद्भावाच्च द्वित्वादीनां पर्याप्तिलक्षणः कश्चित्संबन्धोऽनेकाश्रयोऽभ्युपेयते ॥

अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः॥१०८॥

प्रथममपेक्षाबुद्धिस्ततो द्वित्वोत्पत्तिः । ततो विशेषणज्ञानं द्वित्वत्वनिर्विकल्पात्मकम् ततो द्वित्वत्वविशिष्टप्रत्यक्षमपेक्षाबुद्धिनाशश्च ततो द्वित्वनाश इति। यद्यपि ज्ञानानां द्विक्षणमात्रस्थायित्वम् योग्यविभुविशेषगुणानां स्वोत्तरवृत्तिगुणनाश्यत्वात् तथाप्यपेक्षाबुद्धे[2]स्त्रिक्षणावस्थायित्वं कल्प्यते अन्यथा निर्विकल्पककालेऽपेक्षाबुद्धिनाशानन्तरं द्वित्वस्यैव नाशः स्यात् नतु द्वित्वप्रत्यक्षम् तदानीं विषयाभावाद्विद्यमानस्यैव चक्षुरादिना ज्ञानजननोपगमात् तस्माद्द्वित्वप्रत्यक्षादिकमपेक्षाबुद्धेर्नाशकं कल्प्यते न चापेक्षाबुद्धिनाशात्कथं द्वित्वनाश इति वाच्यम् कालान्तरे द्वित्वप्रत्यक्षाभावात् । अपेक्षाबुद्धिस्तदुत्पादिका तन्नाशात्तन्नाश इति कल्पनात् । अत[3]एव

---

१ एकत्वान्यसंख्यामात्रमपेक्षाबुद्धिरूपनिमित्तकारणजन्यमित्यर्थः । द्वित्वं प्रत्यसमवायिकारणन्तु समवायिकारणगतयावदेकत्वमिति बोध्यम् ।

२ अपेक्षाबुद्धेर्द्विक्षणमात्रावस्थायित्वे ।

३ अपेक्षाबुद्धेर्द्वित्वोत्पादकत्वे चैत्रीयापेक्षाबुद्धिजन्यद्वित्वस्यापेक्षाबुद्धिशून्येन मैत्रेण ग्रहणापत्तिः सन्निकर्षादिघटितसामग्र्याः सत्त्वात्तद्वारणाय विषयतासंबन्धेन तत्पुरुषीयप्रत्यक्षे तद्भिन्नपुरुषीयापेक्षाबुद्धिजन्याद्वित्वादेः तादात्म्येन प्रतिबन्धकत्वकल्पने गौरवमत आह अतएवेति पूर्वोक्तयुक्त्यापेक्षाबुद्धेर्द्वित्वोत्पादकत्वादेवेत्यर्थः

तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वादिकं तेनैव गृह्यत इति कल्प्यते । नचापेक्षाबुद्धेर्द्वित्वप्रत्यक्षे कारणत्वमस्त्विति वाच्यम् लाघवेन द्वित्वं प्रत्येव कारणत्वस्यैवोचितत्वात् अतीन्द्रिये द्व्यणुकादावपेक्षाबुद्धिर्योगिनाम् । सर्गादिकालीनपरमाण्वादावीश्वरीयापेक्षाबुद्धिः ब्रह्माण्डान्तरवर्तियोगिनामपेक्षाबुद्धिर्वा द्वित्वादिकारणमिति ॥ १०८ ॥

अपेक्षाबुद्धिः केत्यत आह ।

**अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरिष्यते ।**

अयमेकोऽयमेक इत्याकारिकेत्यर्थः । इदं तु बोध्यम् यत्रानियतैकत्वज्ञानं तत्र त्रित्वादिभिन्ना बहुत्वसंख्योत्पद्यते यथा सेनावनादाविति कन्दलीकारः आचार्यास्तु त्रित्वादिकमेव बहुत्वं मन्यन्ते तथाच त्रित्वत्वादिव्यापिका बहुत्वत्वजातिर्नातिरिच्यते सेनावनादावुत्पन्नेपि त्रित्वादौ त्रित्वत्वाद्यग्रहो दोषात् इत्थंचेतो बहुतरेयं सेनेति प्रतीतिरुपपद्यते बहुत्वस्य संख्यान्तरत्वे तु तत्तारतम्याभावान्नोपपद्येतेत्यवधेयम् ॥

परिमाणं निरूपयति ।

**परिमाणं भवेन्मानव्यवहारस्य कारणम् ॥१०९॥**

परिमितिव्यवहारासाधारणं कारणं परिमाणमित्यर्थः ॥ १०९ ॥

**अणु दीर्घं महद्ध्रस्वमिति तद्भेद ईरितः ।**
**अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम्**
**॥ ११० ॥**

---

१ द्वित्वप्रत्यक्षत्वापेक्षया द्वित्वत्वस्य कार्यतावच्छेदकस्य लघुत्वादिति भावः।
२ नियतानेकैकत्वज्ञानाभावात् ।

अणु महद्दीर्घं ह्रस्वं चेति तत् परिमाणम् । नित्यमित्यत्र परिमाणमित्यनुषज्यते जायत इत्यत्रापि परिमाणमित्यनुवर्तते अनित्यमिति पूर्वेणान्वितम् तथा च अनित्यपरिमाणं संख्याजन्यं परिमाणजन्यं प्रचयजन्यं चेत्यर्थः ॥ ११० ॥

तत्र संख्याजन्यमुदाहरति ।

**संख्यातः परिमाणाच्च प्रचयादपि जायते ।**
**अनित्यं द्व्यणुकादौ तु संख्याजन्यमुदाहृतम्**
**॥ १११ ॥**

द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुकपरिमाणं वा न कारणम् परिमाणस्य स्वसजातीयोत्कृष्टपरिमाणजनकत्वात् द्व्यणुकस्याणुपरिमाणं तु परमाण्वणुत्वापेक्षया नोत्कृष्टम् त्रसरेणुपरिमाणं न सजातीयम् अतः परिमाणौ द्वित्वसंख्या द्व्यणुकपरिमाणस्य द्व्यणुके त्रित्वसंख्या च त्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः १११

परिमाणजन्यं परिमाणमुदाहरति ।

**परिमाणं घटादौ तु परिमाणजमुच्यते ।**
**प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते**
**॥ ११२ ॥**

घटादिपरिमाणं कपालादिपरिमाणजन्यम् प्रचयजन्यमुदाहर्तुं प्रचयं निर्वक्ति प्रचय इति ॥ ११२ ॥

---

१ यद्यपि अणुत्वमेव ह्रस्वत्वमस्तु महत्त्वमेव दीर्घत्वमास्त्विति कुतश्चातुर्विध्यम् तथापि तदवधिकाणुतया प्रतीयमानेपि तदवधिकह्रस्वत्वाव्यवहारात्तदवधिकमहत्त्ववत्तया प्रतीयमानेपि तदवधिकदीर्घत्वाव्यवहाराच्च ह्रस्वत्वदीर्घत्वयोरतिरिक्तपरिमाणतया तच्चातुर्विध्यं बोध्यम् ।

परिमाणं चाश्रयनाशादेव नश्यतीत्याह ।

**परिमाणन्तूलकादौ नाशस्त्वाश्रयनाशतः ।**

नाशः अर्थात् परिमाणस्यैव नचावयविनाशः कथं परिमाणनाशकः सत्यप्यवयविनि त्रिचतुरादिपरमाणुविश्लेषे तदुपचयैरेवावयविनः प्रत्यभिज्ञानेपि परिमाणान्तरस्य प्रत्यक्षसिद्धत्वादिति वाच्यम् परमाणुविश्लेषे हि द्व्यणुकस्य नाशोऽवश्यमभ्युपेयः तन्नाशे च त्र्यणुकनाशः एवं क्रमेण महावयविनो नाशस्यावश्यकत्वात् सति च नाशकेऽनभ्युपगममात्रेण नाशस्यापलपितुमशक्यत्वात् शरीरादावयवोपचयेऽसमवायिकारणनाशस्यावश्यकत्वादवयविनाशः आवश्यकः । नच पटादिनाशेपि तन्त्वन्तरसंयोगात्परिमाणाधिक्यं न स्यादिति वाच्यम् । तत्रापि वेमाद्यभिघातेन समवायिकारणतन्तुसंयोगानाशात् पटनाशस्यावश्यकत्वात् किंच तन्त्वन्तरस्य तत्पटावयवत्वे पूर्वं तत्पट एव न स्यात् तन्त्वन्तररूपकारणाभावात् । तन्त्वन्तरस्यावयवत्वाभावे च न तेन परिमाणाधिक्यं संयुक्तद्रव्यान्तरवत् तस्मात्तत्र तन्त्वन्तरसंयोगे सति पूर्वं पटनाशः ततः पटान्तरोत्पत्तिरित्यवश्यं स्वीकार्यम् अवयविनः प्रत्यभिज्ञानं तु साजात्येन दीपकलिकादिवत्[2] । नच पूर्वतन्तव एव तन्त्वन्तरसहकारात्पूर्वपटे सत्येव पटान्तरमारभन्तामिति वाच्यम् मूर्तयोः समानदेशताविरोधात् तत्र पटद्वयासम्भवात् एकदा नानाद्रव्यस्य तत्रोपलम्भस्य बाधितत्वाच्च तस्मात्पूर्वस्य द्रव्यस्य प्रतिबन्धकस्य विनाशे द्रव्यान्तरोत्पत्तिरित्यस्यावश्यमभ्युपेयत्वात् ॥

पृथक्त्वं निरूपयति ।

**संख्यावत्तु पृथक्त्वं स्यात्पृथक्प्रत्ययकारणम् ॥ ॥ ११३ ॥**

---

१ प्रकरणादित्यर्थः यद्वार्थात् परिशेषादित्यर्थः ।

२ दीपज्वालावत् ।

पृथक्प्रत्ययासाधारणं कारणं पृथक्त्वम् तन्नित्यतादिकं संख्यावत् तथाहि नित्येष्वेकत्वन्नित्यमनित्येष्वनित्यम् अनित्यमेकत्वं तु आश्रयद्वितीयक्षणे चोत्पद्यते आश्रयनाशान्नश्यति तथैकपृथक्त्वमपि द्वित्वादिवच्च द्विपृथक्त्वादिकमपीत्यर्थः । नन्वयमस्मात् पृथगित्यादावन्योन्याभावो भासते तत्कथं पृथक्त्वं गुणान्तरं स्वीक्रियते नचास्तु पृथक्त्वमन्योन्याभाव इति वाच्यम् रूपन्न घट इति प्रतीत्यनापत्तेः ॥ ११३ ॥

**अन्योन्याभावतो नास्य चरितार्थत्वमिष्यते ।**
**अस्मात्पृथगिदन्नेति प्रतीतिर्हि विलक्षणा ॥११४॥**

नहि रूपेण घटावधिकं पृथक्त्वं गुणान्तरमस्ति न वा घटे घटावधिकं पृथक्त्वमस्ति येन परम्परासंबन्धः[1] कल्प्यत इत्यत आह अस्मादिति । ननु शब्दवैलक्षण्यमेव नत्वर्थवैलक्षण्यमिति चेन्न । विनार्थभेदं घटात्पृथगितिवद्घटो न पट इत्यत्रापि पञ्चमीप्रसङ्गात्[2] तस्माद्यदर्थकयोगे पञ्चमी सोऽर्थो नञर्थान्योन्याभावतो भिन्नो गुणान्तरं कल्प्यत इति ॥ ११४ ॥

संयोगं निरूपयति ।

**अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः ।**
**कीर्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्मजः ॥११५॥**

तं विभजते कीर्तित इति । एष संयोगः ॥ ११५ ॥

**तथोभयस्पन्दजन्यो भवेत्संयोगजोऽपरः ।**
**आदिमः श्येनशैलादिसंयोगः परिकीर्तितः ॥११६॥**
**मेषयोः सन्निपातो यः स द्वितीय उदाहृतः ।**

---

१ सामानाधिकरण्यरूपपरंपरासंबन्धविषयकत्वमुक्तप्रतीतेः कल्प्यमित्यर्थः ।
२ अन्योन्याभावार्थकपदयोगस्य पञ्चमीप्रयोजकस्य तत्र सत्त्वादिति भावः ।

कपालतरुसंयोगात्संयोगस्तरुकुम्भयोः ॥ ११७ ॥
तृतीयः स्यात्कर्मजोपि द्विधैव परिकीर्तितः।
अभिघातो नोदनं च शब्दहेतुरिहादिमः ॥ ११८ ॥
शब्दाहेतुर्द्वितीयः स्याद्विभागोपि त्रिधा भवेत्।
एककर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवोऽपरः ॥ ११९ ॥
विभागजस्तृतीयः स्यात्तृतीयोपि द्विधा भवेत्।
हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः ॥ १२० ॥

सन्निपातः संयोगः द्वितीयः उभयकर्मजः तृतीयः स्यादिति पूर्वेणान्वितम् तृतीय इति संयोगजसंयोग इत्यर्थः। आदिमः अभिघातः द्वितीयो नोदनाख्यः संयोग इति विभक्तप्रत्ययासाधारणं कारणं विभागं निरूपयति विभाग इति। एककर्मेति तदुदाहरणन्तु श्येनशैलविभागादिकं पूर्ववद्बोध्यम् तृतीयोपि विभागजः विभागः कारणमात्रविभागजन्यः कारणाकारणविभागजन्यश्चेति द्विविधः आद्यस्तावत् यत्रैककपाले कर्म ततः कपालद्वयविभागः ततो घटारम्भकसंयोगनाशस्ततो घटनाशः ततस्तेनैव कपालविभागेन सकर्मणः कपालस्याकाशविभागो जन्यते तत आकाशसंयोगनाशः तत उत्तरदेशसंयोगः ततः कर्मनाश इति नच तेन कर्मणैव कथं देशान्तरविभागो न जन्यत इति वाच्यम् एकस्य कर्मण आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्यानारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्य च विरोधात्। अन्यथा विकसत्कमलकुड्मलभङ्गप्रसङ्गात् तस्मा-

---

१ संयोगवदित्यर्थः।

२ तेन कपालविभागेनैवेत्यर्थः एवकारेण कर्मणो व्युदासः।

३ आरम्भकसंयोगः कपालद्वयसंयोगादिः तत्प्रतिद्वन्द्वी तद्विरोधी तन्नाशक इति यावत्।

४ आरम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्मणोऽनारम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्मणश्चैक्ये इत्यर्थः।

यदीदमनारम्भकसंयोगप्रतिद्वन्द्विविभागं जनयेत्, तदारम्भकसंयोगप्रतिद्वन्द्विविभागन्न जनयेत् नच कारणविभागेनैव द्रव्यनाशात्पूर्वं कुतो देशान्तरविभागो न जन्यत इति वाच्यम् आरम्भकसंयोगप्रतिद्वन्द्विविभागवतोऽवयवस्य सति द्रव्ये देशान्तरविभागासम्भवात् द्वितीयस्तावत् यत्र हस्तक्रियया हस्ततरुविभागस्ततः शरीरेपि विभक्तप्रत्ययो भवति तत्र शरीरतरुविभागे हस्तक्रिया न कारणं व्यधिकरणत्वात् शरीरे तु क्रिया नास्त्येव अवयविकर्मणो यावदवयवकर्मनियतत्वात् अतस्तत्र कारणाकारणविभागेन कार्याकार्यविभागो जन्यत इति अत एव विभागो गुणान्तरम् अन्यथा शरीरे विभक्तप्रत्ययो न स्यात्। अतः संयोगनाशेन विभागो नान्यथासिद्धो भवति ॥ ११६ ॥ ११७ ॥ ११८ ॥ ११९ ॥ १२० ॥

परापरव्यवहारनिमित्ते परत्वापरत्वे निरूपयति।

**परत्वं चापरत्वं च द्विविधं परिकीर्तितम्।**
**दैशिकं कालिकं चापि मूर्त एव तु दैशिकम् १२१**
**परत्वं मूर्तसंयोगभूयस्त्वज्ञानतो भवेत्।**
**अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम्॥१२२॥**

दैशिकमिति दैशिकपरत्वम् बहुतरमूर्तसंयोगान्तरितत्वज्ञानादुत्पद्यते एवं तदल्पीयस्त्वज्ञानादपरत्वमुत्पद्यते अत्रावधित्वार्थं पञ्चम्यपेक्षा यथा पाटलिपुत्रात् काशीमपेक्ष्य प्रयागः परः पाटलिपुत्रात्कुरुक्षेत्रमपेक्ष्य प्रयागोऽपर इति ॥ १२१ ॥ १२२ ॥

---

१ बहुतरसंयोगान्तरितत्वं तदेव विप्रकृष्टत्वं तद्विषयिण्यपेक्षाबुद्धिर्दैशिकपरत्वं प्रति निमित्तकारणमित्यर्थः।

२ अल्पसंयोगान्तरितत्वरूपसन्निकृष्टत्वविषयिण्यपेक्षाबुद्धिर्दैशिकापरत्वं प्रति निमित्तकारणमित्यर्थः।

तयोरसमवायी तु दिक्संयोगस्तदाश्रये ।
दिवाकरपरिस्पन्दभूयस्त्वज्ञानतो भवेत् ॥१२३॥

तयोर्दैशिकपरत्वापरत्वयोरसमवायी असमवायिकारणम् तदाश्रये दैशिकपरत्वापरत्वाश्रये दिवाकरेति ॥ १२३ ॥

परत्वमपरत्वन्तु तदीयाल्पत्वबुद्धितः ।
अत्र त्वसमवायी स्यात् संयोगः कालपिण्डयोः ॥
॥ १२४ ॥

अत्र परत्वापरत्वं कालिकं ग्राह्यम् यस्य सूर्यपरिस्पन्दापेक्षया यस्य सूर्यस्पन्दोऽधिकः स ज्येष्ठः यस्य न्यूनः स कनिष्ठः कालिकपरत्वापरत्वे जन्यद्रव्य एव । अत्र कालिकपरत्वापरत्वयोः ॥ १२४ ॥

अपेक्षाबुद्धिनाशेन[1] नाशस्तेषां निरूपितः ।

तेषां कालिकदैशिकपरत्वापरत्वानाम् ॥

क्रमप्राप्तां बुद्धिं निरूपयति ।

बुद्धेः प्रपञ्चः प्रागेव प्रायशो विनिरूपितः ॥१२५॥
अथावशिष्टोप्यपरः प्रकारः परिदर्श्यते ।
अप्रमा च प्रमाचेति ज्ञानं द्विविधमिष्यते॥१२६॥

तत्र अप्रमां निरूपयति ।

तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता ।
तत्प्रपञ्चो विपर्यासः संशयोपि प्रकीर्तितः॥१२७॥

तदभाववति तत्प्रकारकं ज्ञानं भ्रम इत्यर्थः । तत्प्रपञ्चः अप्रमाप्रपञ्चः ॥ १२७ ॥

---

१ स्वनिमित्तकारणविप्रकृष्टत्वादिबुद्धीनां नाशेनेत्यर्थः ।

आद्यो देहेष्वात्मबुद्धिः शङ्खादौ पीततामतिः ।
भवेन्निश्चयरूपा या संशयोथ प्रदर्श्यते ॥ १२८ ॥

आद्यः विपर्यास इत्यर्थः । शरीरादौ निश्चयरूपं यदात्मत्वप्रकारकं ज्ञानं गौरोहमित्याकारकम् एवं शङ्खादौ पीतः शङ्ख इत्याकारकं यज्ज्ञानं निश्चयरूपं तद्भ्रम इति ॥ १२८ ॥

किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः ।
तदभावाप्रकाराधीस्तत्प्रकरा तु निश्चयः ॥१२९॥

किंस्विदिति वितर्के निश्चयलक्षणमाह तदभावेति । तदभावा[1]प्रकारकं तत्प्रकारकं ज्ञानं निश्चयः ॥ १२९ ॥

संशयं लक्षयति ।

स संशयो मतिर्या स्यादेकत्राभावभावयोः ।
साधारणादिधर्मस्य ज्ञानं संशयकारणम् ॥१३०॥

एक[2]धर्मिकविरुद्ध[3]भावाभावप्रकारकं ज्ञानं संशय इत्यर्थः । साधारणेति उभयसाधारणो यो धर्मस्तज्ज्ञानं संशयकारणम् यथा उच्चैस्तरत्वं स्थाणुपुरुषसाधारणं ज्ञात्वाऽयं स्थाणुर्न वा इति संदिग्धे एवमसाधारणधर्मज्ञानं संशयकारणम् यथा शब्दत्वं नित्यानित्यव्यावृत्तं शब्दे गृहीत्वा शब्दो नित्यो न वेति संदिग्धे विप्रतिपत्तिस्तु शब्दोनित्यो न वेत्यादिशब्दात्मिका न संशयकारणम् शब्दव्याप्तिज्ञानादीनां निश्चयमात्रजनकत्वस्वाभाव्यात् किन्तु तत्र शब्देन कोटिद्वयज्ञानं जन्यते संशयस्तु मानस एवेति एवं ज्ञाने प्रामा-

---

१ अत्र तद्विशेष्यकत्वावच्छिन्नतदभावप्रकारताशून्यतद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्ववज्ज्ञानत्वमेव तन्निश्चयत्वं नतु यथाश्रुतं महानसोयं वह्निमान्न वा पर्वतो वह्निमानित्यस्य पर्वते वह्निनिश्चयत्वानापत्तेः ।

२ एकधर्मितावच्छेदकविशिष्टविशेष्यकत्वावच्छिन्नेत्यर्थः तेन पर्वतो वह्निमान् द्रव्यं वह्न्यभाववदिति ज्ञानव्युदासः ।

३ विरोधावगाहित्वं तदर्थः ।

प्यसंशयाद्विषयसंशय इति एवं व्याप्यसंशयादपि व्यापकसंशय इत्यादिकं बोध्यम्। किंतु संशये धर्मिज्ञानं धर्मीन्द्रियसन्निकर्षो वा कारणमिति॥ १३०

**दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवत्।**

अप्रमां प्रति दोषः कारणम् प्रमां प्रति तु गुणः कारणम् तत्रापि पित्तादिरूपा दोषा अननुगताः तेषां कारणत्वमन्वयव्यतिरेकाभ्यां सिद्धम् गुणस्य प्रमाजनकत्वं त्वनुमानात्सिद्धम्। यथा प्रमाज्ञानसामान्यकारणभिन्नकारणजन्याजन्यज्ञानत्वादप्रमावत् नच दोषाभाव एव कारणमस्त्विति वाच्यम् पीतः शङ्ख इति ज्ञानस्थलेपि पित्तरूपदोषसत्त्वाच्छङ्खप्रमानुत्पत्तिप्रसङ्गात् विनिगमनाविरहादनन्तदोषाभावकारणत्वमपेक्ष्य गुणस्य कारणताया न्याय्यत्वात् नच गुणसत्त्वेपि पित्तेन प्रतिबन्धाच्छङ्खेन श्वैत्यज्ञानम् अतः पित्तादिदोषाभावानां कारणत्वमवश्यं वाच्यम् तथा च किं गुणस्य हेतुत्वकल्पनेनेति वाच्यम् तथाप्यन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्वसिद्धेः॥

एवं भ्रमं प्रति गुणाभावः कारणमित्यस्यापि सुवचत्वात् तत्र दोषाः के इत्याकाङ्क्षायामाह।

**पित्तदूरत्वादिरूपो दोषो नानाविधो मतः॥१३१॥**

क्वचित्पीतादिभ्रमे पित्तं दोषः क्वचिच्चन्द्रादेः स्वल्पपरिमाणभ्रमे दूरत्वं दोषः। क्वचिच्च वंशोरगभ्रमे मण्डूकवसाञ्जनमित्येवं रूपा दोषा अननुगता एव भ्रान्तिजनका इत्यर्थः॥ १३१॥

अथ के गुणा इत्याकाङ्क्षायां प्रत्यक्षादौ क्रमेण गुणान् दर्शयति।

**प्रत्यक्षे तु विशेष्येण विशेषणवता समम्।**
**सन्निकर्षो गुणस्तु स्यादथ त्वनुमितौ पुनः॥१३२॥**

---

१ प्रमायां दोषाभावः कारणं गुणो वा कारणमित्यत्र विनिगमनाविरहादिति भावः।

पक्षे साध्यविशिष्टे तु परामर्शो गुणो भवेत् ।
शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः ॥१३३॥
शाब्दबोधे योग्यतायास्तात्पर्यस्याथवा प्रमा ।
गुणः स्यात्–

प्रत्यक्षे विशेषणवद्विशेष्यसन्निकर्षो गुणः अनुमितौ साध्यवति साध्यव्याप्यवैशिष्टयज्ञानं गुणः एवमग्रेपि ज्ञेयम् ॥

प्रमां निरूपयति ।

भ्रमभिन्नं तु ज्ञानमत्रोच्यते प्रमा ॥ १३४ ॥

॥ १३२ ॥ १३३ ॥ १३४ ॥

ननु यत्र शुक्तिरजतयोरिमे न रजते इति ज्ञानं जातं तत्र रजतांशेपि प्रमा न स्यात् तज्ज्ञानस्य भ्रमभिन्नत्वाभावादत आह ।

अथवा तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकम् ।
तत्प्रमा न प्रमा नापि भ्रमः स्यान्निर्विकल्पकम् ॥
॥ १३५ ॥

तद्वद्विशेष्यकत्वे[२] सति तत्प्रकारकं ज्ञानं प्रमेत्यर्थः । अथैवं स्मृतेरपि प्रमात्वं स्यात्ततः किमिति चेत्तथा सति तत्करणस्यापि प्रमाणान्तरत्वं स्यादिति चेन्न । यथार्थानुभवकरणस्यैव प्रमाणत्वेन विवक्षितत्वात् इदन्तु बोध्यम् येन संबन्धेन यद्वत्ता तेन संबन्धेन तत्प्रकारकत्वं वाच्यम्

---

१ उपमितौ शक्ये सादृश्यज्ञानम् शाब्दबोधे योग्यतायाः तात्पर्यस्य वा प्रमैव गुण इति भावः ।

२ तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्ववज्ज्ञानमित्यर्थः सतिसप्तम्याः अवच्छिन्नत्वार्थकत्वात् ।

तेन कपालादौ संयोगादिना घटादिज्ञाने नातिव्याप्तिः । एवं सति निर्विकल्पकं प्रमा न स्यात् तस्य सप्रकारकत्वाभावादत आह तत्प्रमेति । ननु वृक्षे कपिसंयोगज्ञानं भ्रमः प्रमा च स्यादिति चेन्न । प्रतियोगिव्यधिकरणसंयोगाभाववति संयोगज्ञानस्य भ्रमत्वात् नच वृक्षे कपिसंयोगाभावावच्छेदेन संयोगज्ञानं भ्रमो न स्यात् तत्र संयोगाभावस्य प्रतियोगिसमानाधिकरणत्वादिति वाच्यम् तत्र संयोगाभावावच्छेदेन संयोगज्ञानस्य भ्रमत्वात् लक्ष्यस्याननुगमाल्लक्षणाननुगमेऽपि न क्षतिः ।। १३५ ।।

## प्रकारतादिशून्यं हि संबन्धानवगाहि तत् ।
## प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः ॥१३६॥

मीमांसका हि प्रमात्वं स्वतो ग्राह्यमिति वदन्ति तत्र गुरूणां मते ज्ञानस्य स्वप्रकाशत्वात् तज्ज्ञानप्रामाण्यं तेनैव गृह्यत इति । भट्टानां मते ज्ञानमतीन्द्रियं ज्ञानजन्यज्ञातता प्रत्यक्षा तया च ज्ञानमनुमीयते मुरारिमिश्राणां मतेऽनुव्यवसायेन ज्ञानं गृह्यते सर्वेषामपि मते तत्तज्ज्ञानविषयकज्ञानेन तज्ज्ञानप्रामाण्यं गृह्यते विषयनिरूप्यं हि ज्ञानमतो ज्ञानवित्तिवेद्यो विषयः तन्मतं दूषयति न स्वतो ग्राह्यमिति संशयेति यदि ज्ञानस्य प्रामाण्यं स्वतो ग्राह्यम् स्यात्तदानभ्यासदशापन्नज्ञाने प्रामाण्यसंशयो न स्यात् तत्र हि यदि ज्ञानं ज्ञातं तदा त्वन्मते प्रामाण्यं ज्ञातमेवेति कथं संशयः यदि तु ज्ञानं न ज्ञातं तदा धर्मिज्ञानाभावात् कथं संशयस्तस्माज्ज्ञाने प्रामाण्यमनुमेयम् तथाहि इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वात् ।

---

१ तत्प्रकारकत्वस्य प्रमात्वघटकत्वे सति ।

२ स्वविषयकत्वादित्यर्थः ।

३ अयमत्रानुमानप्रकारः इयं ज्ञातता घटविशेष्यकघटत्वप्रकारकज्ञानजन्या घटवृत्तिघटत्वप्रकारकज्ञाततात्वात् या यद्वृत्तिर्यत्प्रकारिका ज्ञातता सा तद्विशेष्यकतत्प्रकारकज्ञानसाध्या यथा पटे पटत्वप्रकारिका ज्ञाततेति बोध्यम् ।

४ विषयाविषयकप्रत्यक्षाविषय इत्यर्थः ।

५ अनवधृतप्रामाण्यसजातीयेत्यर्थः ।

यन्नैवं तन्नैवं यथाऽप्रमा इदं पृथिवीत्वप्रकारकं ज्ञानं प्रमागन्धवति पृथिवीत्वप्रकारकज्ञानत्वात् । एवमिदं जलत्वप्रकारकं ज्ञानं प्रमा स्नेहवति जलत्वप्रकारकज्ञानत्वात् नच हेतुज्ञानं कथं जातमिति वाच्यम् पृथिवीत्वप्रकारकत्वस्य स्वतो ग्राह्यत्वात् तत्र गन्धग्रहेण गन्धवद्विशेष्यकत्वस्यापि सुग्रहत्वात् । तत्प्रकारकत्वावच्छिन्नतद्वद्विशेष्यकत्वं परन्न गृह्यते संशयानुरोधात् ननु सर्वेषां ज्ञानानां यथार्थत्वात् प्रमालक्षणे तद्वद्विशेष्यकत्वं विशेषणं व्यर्थम्[1] नच रङ्गे रजतार्थिनः प्रवृत्तिर्भ्रमजन्या न स्यात्तव मते भ्रमस्याभावादिति वाच्यम् तत्र हि दोषाधीनस्य पुरोवर्तिनि स्वतन्त्रोपस्थितरजतभेदाग्रहस्य हेतुत्वात् । सत्यरजतस्थले तु विशिष्टज्ञानस्य सत्त्वात्तदेव कारणम् अस्तु वा तत्रापि रजतभेदाग्रह[2] एव कारणमिति न चान्यथाख्यातिः सम्भवति रजतप्रत्यक्षकारणस्य रजतसन्निकर्षस्याभावात् रङ्गे रजतबुद्धेरनुपपत्तिरिति चेन्न । सत्यरजतस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुतायाः क्लृप्तत्वात् अन्यत्रापि[3] तत्कल्पनात्[4] । नच संवादिप्रवृत्तौ तत्कारणं विसंवादिप्रवृत्तौ च भेदाग्रहः कारणमिति वाच्यम् लाघवेन[5] प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात् इत्थंच रङ्गे रजतत्वविशिष्टबुद्ध्यनुरोधेन ज्ञानलक्षणप्रत्यासत्तिकल्पनेपि न क्षतिः फलमुख[6]गौरवस्यादोषत्वात् । किंच यत्र रङ्गरजतयोरिमे रजते रङ्गे वेति ज्ञानं जातं तत्र न

१ व्यावर्त्याया अन्यथाख्यातेरभावादिति भावः ।

२ रजतभेदासंसर्गग्रहाभाव इत्यर्थः यथाश्रुते रजते नेदं रजतमिति ग्रहेपि प्रवृत्त्यापत्तेः प्राभाकरमते तत्र रजतभेदाग्रहाभावस्य सत्त्वादन्यथान्यथाख्यात्यापत्तेः ।

३ रङ्गगोचररजतार्थिप्रवृत्तावपि ।

४ विशिष्टज्ञानहेतुत्वकल्पनात् ।

५ संवादिविसंवादिभेदेन कार्यकारणभावद्वयमपेक्ष्य प्रवृत्तिमात्रे विशिष्टज्ञानस्यैव हेतुत्वकल्पनालाघवेनेत्यर्थः ।

६ कार्यकारणभावग्रहात्मकफलात्पूर्वं गौरवस्यानिर्णयात् गौरवसन्देहस्य चाप्रतिबन्धकत्वादिति भावः ।

कारणबोधोपि अपि च यत्र रङ्गरजतयोरिमे रजतरङ्गे इति ज्ञानं तत्रो-भयत्र युगपत्प्रवृत्तिनिवृत्ती स्याताम् रङ्गे रङ्गभेदग्रहे रजते रजतभेदग्रहे चान्यथाख्यातिभयात् । त्वन्मते दोषादेव रङ्गे रजतभेदाग्रहस्य रजते रङ्गभेदाग्रहस्य च सत्त्वात् किं चानुमितिं प्रति भेदाग्रहस्य हेतुत्वे जल-ह्रदे वह्निव्याप्यधूमवद्भेदाग्रहादनुमितिर्निराबाधा । यदि च विशिष्टज्ञानं कारणं तदाऽयोगोलके वह्निव्याप्यधूमज्ञानमनुमित्यनुरोधादापतितं सेय-मुभयतः पाशा रज्जुः इत्थं चान्यथाख्यातौ प्रत्यक्षमेव प्रमाणम् रङ्गं रजतत-याऽवेदिषमित्यनुभवादिति संक्षेपः ॥ १३६ ॥

पूर्वं व्याप्तिरुक्ता तद्ग्रहोपायस्तु न दर्शित इत्यत-स्तं दर्शयति ।

**व्यभिचारस्याग्रहोऽथ सहचारग्रहस्तथा ।**
**हेतुर्व्याप्तिग्रहे तर्कः क्वचिच्छङ्कानिवर्तकः ॥ १३७॥**

व्यभिचारग्रहस्य व्याप्तिग्रहे प्रतिबन्धकत्वात्तदभावः कारणमित्यर्थः।एव-मन्वयव्यतिरेकाभ्यां सहचारग्रहस्यापि हेतुता भूयो दर्शनं तु न कारणम् । व्यभिचारास्फूर्तौ सकृद्दर्शनेपि क्वचित् व्याप्तिग्रहात् क्वचिद्व्यभिचारशङ्का-विधूननद्वारा भूयो दर्शनमुपयुज्यते यत्र तु भूयो दर्शनादपि शङ्का नापैति तत्र विपक्षे बाधकतर्कोपेक्षितः तथाहि वह्निविरहिण्यपि धूमः स्यादिति यद्याशङ्का भवति तदा सा वह्निधूमयोः कार्यकारणभाव-स्य प्रतिसन्धानान्निवर्तते यद्ययं वह्निमान्नस्यात्तदा धूमवान्नस्यात्कार-णं विना कार्यानुपपत्तेः यदि च क्वचित्कारणं विना कार्यं भवि-ष्यति तदाऽहेतुक एव भविष्यतीति तत्राप्याशङ्का भवेत् । तदा

---

१ व्याप्यवद्भेदाग्रहस्य ।

२ अन्यथाख्यातिरूपमापातितमित्यर्थः ।

३ धूमो वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादिति तर्काकारो बोध्यः ।

४ तादृशतर्ककारणीभूतकार्यकारणभावग्रहेपि आशङ्का प्रतिबन्धिका भवेत् ।

सा व्याघातादपसारणीया यदि हि कारणं विना कार्यं स्यात्तदा धूमार्थं वह्नेस्तृप्त्यर्थं भोजनस्य नियमत उपादानं तवैव न स्यादिति। यत्र स्वत एव शङ्का नावतरति तत्र न तर्कापेक्षापीति तदिदमुक्तं तर्कः क्वचिच्छङ्कानिवर्तक इति ॥ १३७ ॥

इदानीं परकीयव्याप्तिग्रहप्रतिबन्धार्थमुपाधिं निरूपयितुमाह ।

**साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा ।**
**स उपाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्श्यते॥१३८॥**

साध्यत्वाभिमतव्यापकत्वे[1] सति साधनत्वाभिमताव्यापकत्वमुपाधिरित्यर्थः । ननु स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजन्यत्वन्नोपाधिः स्यात्तस्य साध्यव्यापकत्वाभावाच्छ्यामत्वस्य घटादावपि सत्त्वात् एवं वायुः प्रत्यक्षः[2] प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वं नोपाधिः स्यात् प्रत्यक्षत्वस्यात्मादिषु सत्त्वात् तत्र च रूपाभावात् । एवं ध्वंसो विनाशी जन्यत्वादित्यत्र भावत्वं नोपाधिः स्याद्विनाशित्वस्य प्रागभावे सत्त्वात् तत्र भावत्वाभावादिति चेन्न । यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावछिन्नसाधनाव्यापकत्वमित्यर्थे तात्पर्यात् । मित्रातनयत्वावच्छिन्नश्यामत्वस्य व्यापकं शाकपाकजत्वं तदवच्छिन्नसाधनाव्यापकं च एवं पक्षधर्मबहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्य व्यापकमुद्भूतरूपवत्त्वम् एवं बहिर्द्रव्यत्वावच्छिन्नसाधनस्याव्यापकं च । एवं ध्वंसो विनाशी जन्यत्वादित्यत्र जन्यत्वावच्छिन्नसाध्यव्यापकं भावत्वम् सद्धेतावेतादृशो धर्मो नास्ति यदवच्छिन्नसाध्यस्य व्यापकं तदवच्छिन्नस्य साधनस्य चाव्यापकं किंचित् स्यात् व्यभिचारिणि तु उपाध्यधिकरणं य-

---

१ सिद्धिविषयत्वरूपसाध्यत्वस्य सिद्धिजनकत्वरूपसाधनत्वस्य च सोपाधावभावादभिमतेति ।

२ प्रत्यक्षं प्रति उद्भूतरूपस्य व्यापकत्वे रूपस्य सुतरां व्यापकत्वमित्युद्भूतपदं व्यर्थं तथाप्युपाधेः साध्यव्यापकत्वे कार्यकारणभावलक्षणानुकूलतर्कदर्शनार्थं तदिति ध्येयम् ।

त्साध्याधिकरणं यच्चोपाधिशून्यं साध्यव्यभिचाराधिकरणं तदन्यतरत्वावच्छिन्नस्य साध्यस्य व्यापकत्वं साधनस्य वा व्यापकत्वमुपाधेरन्ततः संभवति इति ॥ १३८ ॥

अत एव लक्ष्यमप्युपाधिस्वरूपमेतदनुसारेण दर्शयति ।

**सर्वे साध्यसमानाधिकरणाः स्युरुपाधयः ।**
**हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता॥१३९॥**

स्वं च साध्यं च स्वसाध्ये तयोर्व्यभिचारितेत्यर्थः ॥ १३९ ॥

उपाधेर्दूषकताबीजमाह ।

**व्यभिचारस्यानुमानमुपाधेस्तु प्रयोजनम् ।**
**शब्दोपमानयोर्नैव पृथक् प्रामाण्यमिष्यते।१४०।**

उपाधिव्यभिचारेण हेतौ साध्यव्यभिचारानुमानमुपाधेः प्रयोजनमित्यर्थः । तथाहि यत्र शुद्धसाध्यव्यापक उपाधिस्तत्र शुद्धेनैवोपाधिव्यभिचारेण साध्यव्यभिचारानुमानम् यथा धूमवान् वह्नेरित्यादौ वह्निर्धूमव्यभिचारी तद्व्यापकार्द्रेन्धनसंयोगव्यभिचारित्वादिति व्यापकव्यभिचारिणो व्याप्यव्यभिचारावश्यकत्वात् यत्र तु किंचिद्धर्मावच्छिन्नसाध्यस्य व्यापकउपाधिस्तत्र तद्धर्मवति उपाधिव्यभिचारेण साध्यव्यभिचारानुमानम् यथा स श्यामो मित्रातनयत्वादित्यादौ मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनये शाकपाकजत्वव्यभिचारित्वादिति बाधानुन्नीतपक्षेतरस्तु साध्यव्यापकताग्राहकप्रमाणाभावात् स्वव्याघातकत्वाच्च[2] नोपाधिः बाधोन्नीतस्तु[3] उपाधिर्भवत्येव यथा वह्निरनुष्णः कृतकत्वादित्यादौ प्रत्यक्षेण वह्नावुष्णत्वग्रहे वह्नीतरत्वमुपाधिः । यत्रतूपाधेः साध्यव्यापकता संदिह्यते स संदिग्धो-

१ तादृशधर्मान्तरस्यास्फूर्तीवित्यर्थः ।

२ उपाधिमात्रस्य दूषकत्वापसारकत्वादिति यावत् ।

३ बाधेन पक्षे साध्याभाववत्तया उन्नीतः साध्यव्यापकत्वेन निश्चित इत्यर्थः ।

४ पक्षे साध्यसन्देहेन साध्यव्यापकतासन्देहस्य पक्षेतरत्वे संभवादिति भावः ।

पाधिः पक्षेतरस्तु संदिग्धोपाधिरपि नोद्भावनीयः कथकसम्प्रदायानुरोधात् केचित्तु सत्प्रतिपक्षोत्थापनमुपाधेः फलं तथाहि अयोगोलकं धूमवद्वह्नेरित्यादौ अयोगोलकं धूमाभाववत् आर्द्रेन्धनाभावादिति सत्प्रतिपक्षसंभवात्। इत्थंच साधनव्यापकोपि क्वचिदुपाधिः यथा करकापृथिवी कठिनसंयोगवत्त्वादित्यादौ अनुष्णाशीतस्पर्शवत्त्वम् नचात्र स्वरूपासिद्धिरेव दूषणमिति वाच्यम् सर्वत्रोपाधेर्दूषणान्तरसाङ्कर्यात्[1]। अत्र च साध्यव्यापकः पक्षावृत्तिरुपाधिरिति[2] वदन्ति शब्दोपमानयोरिति ॥ १४० ॥

## अनुमानगतार्थत्वादिति वैशेषिकं मतम् ।

वैशेषिकाणां मते प्रत्यक्षमनुमानं च प्रमाणम् शब्दोपमानयोस्तु अनुमानविधयैव प्रामाण्यम् तथाहि दण्डेन गामानयेत्यादिलौकिकपदानि वैदिकपदानि वा तात्पर्यविषयस्मारितपदार्थसंसर्गप्रमापूर्वकाणि आकाङ्क्षादिमत्पदकदम्बकत्वात् घटमानयेति पदकदम्बकवत् । यद्वा एते पदार्था मिथः संसर्गवन्तः[3] योग्यतादिमत्पदोपस्थापितत्वात्तादृशपदार्थवद्दृष्टान्तेऽपि दृष्टान्तान्तरेण साध्यसिद्धिरिति एवं गवयव्यक्तिप्रत्यक्षानन्तरङ्गवयपदं गवयत्वप्रवृत्तिनिमित्तकम् असति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वात् असति वृत्त्यन्तरवृद्धैर्यत्र यत्प्रयुज्यते तत्र तत्प्रवृत्तिनिमित्तकं यथा गोपदं गोत्वप्रवृत्तिनिमित्तकम् यद्वा गवयपदं सप्रवृत्तिनिमित्तकं साधुपदत्वादित्यनुमानेन पक्षधर्मताबलात् गवयत्वप्रवृत्तिनिमित्तकत्वं सिध्यति ॥

तन्मतं दूषयति ।

## तन्न सम्यग्विनाव्याप्तिबोधशब्दादिबोधतः १४१

व्याप्तिज्ञानं विनापि शब्दादितो बोधस्यानुभवसिद्धत्वात् नहि सर्वत्र

---

१ सत्प्रतिपक्षोत्थापकतया दूषकत्वे चेत्यर्थः ।

२ पक्षवृत्तित्वे तु पक्षे तदभावेन साध्याभावासाधनादिति भावः ।

३ तात्पर्यविषयपरस्परसंसर्गवन्त इत्यर्थः तेन नातात्पर्यविषयसंसर्गमादायार्थान्तरम् ।

शब्दश्रवणानन्तरं व्याप्तिज्ञाने प्रमाणमस्तीति किंच सर्वत्र शब्दस्थले यदि व्याप्तिज्ञानं कल्प्यते तदा सर्वत्रानुमितिस्थले पदज्ञानं[1] कल्पयित्वा शब्दबोध एव किन्न स्वीक्रियतामिति ध्येयम् ॥ १४१ ॥

त्रैविध्यमनुमानस्य केवलान्वयिभेदतः ।
द्वैविध्यन्तु भवेद्व्याप्तिरन्वयव्यतिरेकतः ॥ १४२ ॥
अन्वयव्याप्तिरुक्तैव व्यतिरेकादिहोच्यते ।

अनुमानं हि त्रिविधं केवलान्वयिकेवलव्यतिरेकिअन्वयव्यतिरेकिभेदात् तत्रासद्विपक्षः[2] केवलान्वयि । यथा घटोभिधेयः प्रमेयत्वादित्यादौ तत्र हि सर्वस्यैवाभिधेयत्वाद्विपक्षासत्त्वम् असत्सपक्षः[3] केवलव्यतिरेकी यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वादित्यादौ तत्र हि जलादित्रयोदशभेदस्य पूर्वमनिश्चिततया निश्चितसाध्यवतः सपक्षस्याभावात् सत्सपक्षविपक्षो[4]ऽन्वयव्यतिरेकी यथा वह्निमान् धूमादित्यादौ तत्र सपक्षस्य महानसादेर्विपक्षस्य जलह्रदादेश्च सत्त्वादिति ॥

तत्र हि व्यतिरेकिणि व्यतिरेकव्याप्तिज्ञानं कारणं तदर्थं व्यतिरेकव्याप्तिं निर्वक्ति ।

साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेत् १४३

साध्याभावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः । अत्रेदं बोध्यम् यत्संबन्धेन यदवच्छिन्नं प्रति येन संबन्धेन येन रूपेण व्यापकता गृह्यते[5] तत्संबन्धावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभावज्ञानात् तत्संबन्धावच्छिन्नप्र-

---

१ पदस्मरणं कल्पयित्वेत्यर्थः वह्न्यादिशब्देनार्थस्येव वह्न्यादिरूपेणार्थेनापि वह्न्यादिपदस्मरणसंभवाद्वाच्यत्वादिवाचकत्वादिसंबन्धस्यापि स्मारकत्वादिति भावः ।

२ अत्यन्ताभावाप्रतियोगिसाध्य इत्यर्थः ।

३ यद्व्यतिरेकिसाध्यं तत्कत्वमित्यर्थो बोध्यः ।

४ गृहीतान्वयव्यतिरेकि साध्यकमित्यर्थः ।

५ यत्संबन्धावच्छिन्नयद्रूपावच्छिन्नव्याप्यतानिरूपितव्यापकता गृह्यते इत्यर्थः ।

तियोगिताकतद्धर्मावच्छिन्नाभावस्य सिद्धिरिति । इत्थं च यत्र विशेषणतासंबन्धेनेतरत्वव्यापकत्वं गन्धात्यन्ताभावे गृह्यते तत्र गन्धाभावाभावे नेतरत्वात्यन्ताभावः सिध्यति। यत्र तु तादात्म्यसंबन्धेनेतरव्यापकत्वं गन्धाभावस्य गृह्यते तत्र तादात्म्यसंबन्धेनेतरस्याभावः सिद्ध्यति स एवान्योन्याभावः एवं यत्र संयोगसंबन्धेन धूमं प्रति संयोगसंबन्धेन वह्नेर्व्यापकता गृह्यते तत्र संयोगसंबन्धावच्छिन्नप्रतियोगिताकवह्न्यभावेन जल ह्रदे संयोगसंबन्धावच्छिन्नप्रतियोगिताकधूमाभावः सिद्ध्यति अत्रच व्यतिरेकव्याप्तिग्रहे व्यतिरेकसहचारज्ञानं कारणम् । केचित्तु व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते नतु व्यतिरेकव्याप्तिज्ञानमपि कारणम् यत्र व्यतिरेकसहचाराद्व्याप्तिग्रहस्तत्र व्यतिरेकीत्युच्यते साध्यप्रसिद्धिस्तु घटादावेव जाता पश्चात् पृथिवीत्वावच्छेदेन साध्यत इति वदन्ति ॥ १४२ ॥ १४३ ॥

**अर्थापत्तिस्तु नैवेह प्रमाणान्तरमिष्यते ।**
**व्यतिरेकव्याप्तिबुद्ध्या चरितार्था हि सा यतः॥**
**॥ १४४ ॥**

अर्थापत्तिः प्रमाणान्तरमिति केचिन्मन्यन्ते । तथाहि यत्र देवदत्तस्य शतवर्षजीवित्वं ज्योतिःशास्त्रादवगतं जीविनो गृहासत्त्वं च प्रत्यक्षादवगतं तत्र शतवर्षजीविनो गृहासत्त्वं बहिःसत्त्वं विनाऽनुपपन्नमिति बहिःसत्त्वं कल्प्यत इति तदप्यनुमानेन गतार्थत्वान्नेष्यते तथाहि यत्र जीवित्वस्य बहिःसत्त्वगृहसत्त्वान्यतरव्याप्यत्वं गृहीतं

---

१ तादात्म्यसंबन्धावच्छिन्ना येतरनिष्ठव्याप्यता तन्निरूपितव्यापकतेत्यर्थः ।

२ ननु साध्यसाधनसहचारज्ञानाभावात्कथं व्यतिरेकव्याप्तिज्ञानमित्यत आह अत्रचेति ।

३ अवच्छेदकावच्छेदेनानुमितौ सामानाधिकरण्येन साध्यसिद्धेरप्रतिबन्धकत्वादिति भावः ।

तत्रान्यतरसिद्धौ जायमानायां गृहसत्त्वबाधाद्बहिःसत्त्वमनुमितौ भासते। एवं पीनो देवदत्तो दिवा न भुङ्क्ते इत्यादौ पीनत्वस्य भोजनव्याप्यत्वावगमाद्भोजनसिद्धौ दिवा भोजनबाधे रात्रिभोजनं सिद्ध्यतीति अभावप्रत्यक्षस्यानुभाविकत्वादनुपलम्भोपि न प्रमाणान्तरम् किंचानुपलम्भस्याज्ञातस्य हेतुत्वे ज्ञानाकारणत्वात् प्रत्यक्षम् ज्ञातस्य हेतुत्वे तु तत्राप्यनुपलम्भान्तरापेक्षेत्यनवस्था एवं चेष्टापि न प्रमाणान्तरम् तस्याः सङ्केतग्राहकशब्दस्मारकत्वेन लिप्यादिसमशीलत्वाच्छाब्द एवान्तर्भावात् यत्र च व्याप्त्यादिग्रहस्तत्रानुमितिरेवेति ॥ १४४ ॥

सुखं निरूपयति।

## सुखं हि जगतामेकं काम्यं धर्मेण जायते।

काम्यमभिलाषविषयः। धर्मेणेति। धर्मत्वेन सुखत्वेन कार्यकारणभाव इत्यर्थः॥

दुःखं निरूपयति।

## अधर्मजन्यं दुःखं स्यात्प्रतिकूलं सचेतसाम् १४५

अधर्मत्वेन दुःखत्वेन कार्यकारणभाव इत्यर्थः। प्रतिकूलमिति। दुःखत्वज्ञानादेव सर्वेषां स्वाभाविकद्वेषविषय इत्यर्थः॥ १४५॥

इच्छां निरूपयति।

## निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते।
## इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि॥१४६॥

इच्छा द्विविधा। फलविषयिणी उपायविषयिणी च। फलं तु सुखं दुःखाभावश्च तत्र[1] फलेच्छां प्रति फलज्ञानं कारणं अतएव[2]

---

१ तयोर्मध्ये।

२ फलज्ञानस्य फलेच्छां प्रति हेतुत्वादेव।

पुरुषार्थः संभवति यज्ज्ञातं सत्स्ववृत्तितयेष्यते स पुरुषार्थ इति त-ल्लक्षणात् इतरेच्छानधीनेच्छाविषयत्वं फलितोऽर्थः उपायेच्छां प्रतीष्ट-साधनताज्ञानं कारणम् ॥ १४६ ॥

चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा तु या भवेत् ।
तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत् ॥ १४७ ॥

कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयिणीच्छा चिकीर्षा पाकं कृत्या साधयामीति तदनुभवात् चिकीर्षां प्रति कृतिसाध्यताज्ञानमिष्ट-साधनताज्ञानं[1] च कारणम् । तद्धेतुरिति । अतएव[2] वृष्ट्यादौ कृति-साध्यताज्ञानाभावान्न चिकीर्षा ॥ १४७ ॥

बलवद्द्विष्टहेतुत्वमतिः स्यात्प्रतिबन्धिका ।
तदहेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते ॥ १४८ ॥

बलवद्द्विष्टसाधनताज्ञानं तत्र प्रतिबन्धकमतो मधुविषसंपृक्तान्नभोजने न चिकीर्षा बलवद्द्वेषः प्रतिबन्धक इत्यन्ये । तदहेतुत्वेति । बलवद-निष्टाजनकत्वज्ञानं कारणमित्यर्थः ॥ १४८ ॥

द्वेषं निरूपयति ।

द्विष्टसाधनताबुद्धिर्भवेद्द्वेषस्य कारणम् ।
प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम् ॥१४९॥

दुःखोपायविषयकं द्वेषं प्रति बलवद्द्विष्टसाधनताज्ञानं कारणमित्यर्थः । बलवद्द्विष्टसाधनताज्ञानं प्रतिबन्धकं तेन नान्तरीयकदुःखजनके पाका-दौ न द्वेषः प्रयत्नं निरूपयति । प्रवृत्तिरिति ॥ १४९ ॥

---

१ अन्यथा निष्फलत्वज्ञानेपि चैत्यवन्दनादौ चिकीर्षापत्तिरिति भावः ।
२ कृतिसाध्यताज्ञानस्य हेतुत्वादेव ।

एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिकीर्त्तितम् ।
चिकीर्षाकृतिसाध्येष्टसाधनत्वमतिस्तथा ॥१५०॥

प्रवृत्ति[1]निवृत्ति[2]जीवनयोनियत्न[3]भेदात्त्रिविधः प्रयत्न इत्यर्थः । चिकीर्षेति । मधुविषसम्पृक्तान्नभोजनादौ बलवदनिष्टानुबन्धित्वेन चिकीर्षाभावान्न प्रवृत्तिरिति भावः । कृतिसाध्यताज्ञानादिवद्बलवदनिष्टाननुबन्धित्वज्ञानमपि स्वतन्त्रान्वयव्यतिरेकाभ्यां प्रवृत्तौ कारणमित्यपि वदन्ति कार्यताज्ञानं प्रवर्तकमिति गुरवः तथाहि ज्ञानस्य प्रवृत्तौ जननीयायां चिकीर्षातिरिक्तं नापेक्षितमस्ति सा[4] च कृतिसाध्यताज्ञानसाध्या । इच्छायाः स्वप्रकारप्रकारकधीसाध्यत्वानियमात् चिकीर्षा हि कृतिसाध्यत्वप्रकारिकेच्छा तत्र कृतिसाध्यत्वं प्रकारस्तत्प्रकारकं ज्ञानं चिकीर्षायां तद्द्वारा च प्रवृत्तौ हेतुः नत्विष्टसाधनताज्ञानं तत्र हेतुः कृत्यसाध्येपि चन्द्रमण्डलानयनादौ प्रवृत्त्यापत्तेः कृत्यसाध्यताज्ञानं प्रतिबन्धकमिति चेन्न । तदभावापेक्षया कृतिसाध्यत्वज्ञानस्य लघुत्वात् नच द्वयोरेव हेतुत्वं गौरवात् । ननु त्वन्मतेपि मधुविषसंपृक्तान्नभोजने चैत्यवन्दने च प्रवृत्त्यापत्तिः कार्यताज्ञानस्य सत्त्वादिति चेन्न ।स्वविशेषण[5]वत्ताप्रतिसन्धानजन्यकार्यताज्ञानस्य प्रवर्तकत्वात् । काम्ये हि पाकयागादौ कामना पुंविशेषणं ततश्च बलवदनिष्टाननुबन्धिकाम्यसाधनताज्ञानेन कार्यताज्ञानं ततश्च प्रवृत्तिः तृप्तश्च भोजने न प्रवर्तते तदानीं कामनायाः पुरुषविशेषणत्वाभावात् । नित्ये च शौचादिकं पुरुषविशेषणं तेन शौचादिज्ञानाधीनकृतिसाध्यताज्ञानात्तत्र प्रवृतिः । ननु

---

१ प्रवृत्तित्वं च रागजन्यतावच्छेदकतया सिद्धो जातिविशेषः ।
२ निवृत्तित्वं च द्वेषजन्यतावच्छेदकतया सिद्धो जातिविशेषः ।
३ जीवनयोनियत्नत्वं च साहजिकप्राणसंचारविषयकयत्नत्वम् ।
४ चिकीर्षा च ।
५ स्वं प्रवर्तमानः पुरुषः तद्विशेषणं काम्ये कामना नित्ये कालशौचादि तद्वत्तापक्षे तत्संबन्धः तस्य प्रतिसन्धानं ज्ञानमित्यर्थः ।

तदपेक्षया लाघवेन बलवदनिष्टाननुबन्धीष्टसाधनताविषयकैककार्यताज्ञानत्वेनैव हेतुत्वमस्तु बलवदनिष्टाननुबन्धित्वं चेष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वं बलवद्द्वेषविषयदुःखाजनकत्वं वेति चेन्न। इष्टसाधनत्वकृतिसाध्यत्वयोर्युगपज्ज्ञातुमशक्यत्वात् साध्यत्वसाधनत्वयोर्विरोधित्वात्[१]। असिद्धस्य हि साध्यत्वं सिद्धस्य च साधनत्वम् नचैकमेकं नैकदासिद्धमसिद्धं चेति ज्ञायते तस्मात्कालभेदादुभयं ज्ञायत इति मैवम् लाघवेन बलवदनिष्टाननुबन्धीष्टसाधनत्वे सति कृतिसाध्यताज्ञानस्य तत्र हेतुत्वात् नच साध्यत्वसाधनत्वयोर्विरोधः। यदा कदाचित्साध्यत्वसाधनत्वयोरविरोधादेकसाध्यत्वसाधनत्वयोश्च ज्ञानात् नव्यास्तु ममेदं कृतिसाध्यमिति ज्ञानान्न प्रवर्तकमनागते तस्य ज्ञातुमशक्यत्वात्। किंतु यादृशपुंसः कृतिसाध्यं यद्दृष्टं तादृशत्वं स्वस्य प्रतिसन्धाय तत्र प्रवर्तते तेनौदनकामस्य तत्साधनताज्ञानवतस्तदुपकरणवतः पाकः कृतिसाध्यः। तादृशश्चाहमिति प्रतिसन्धाय पाके प्रवर्तत इत्याहुः तन्न। स्वकल्पितलिप्यादिप्रवृत्तौ यौवने कामोद्भेदादिना संभोगादौ च तदभावात्[२] इदं तु बोध्यम् इदानीन्तनेष्टसाधनत्वादिज्ञानं प्रवर्तकम् तेन भावियौवराज्ये बालस्य न प्रवृत्तिः इदानीं कृतिसाध्यत्वाज्ञानात्। एवं तृप्तश्च भोजने न प्रवर्तते। तदानीमिष्टसाधनत्वाज्ञानात् प्रवर्तते च रोषदूषितचित्तो विषादिभक्षणे तदानीं बलवदनिष्टाननुबन्धित्वज्ञानात् नचास्तिकस्यागम्यागमनशत्रुवधादिप्रवृत्तौ कथं बलवदनिष्टाननुबन्धित्वबुद्धिर्नरकसाधनत्वज्ञानादिति[३] वाच्यम् उत्कटरागादिना नारकसाधनताधीतिरोधानात्[४] वृष्ट्यादौ तु कृतिसाध्यताज्ञानाभावान्न चिकीर्षाप्रवृत्ती किंत्विष्टसाधनताज्ञानादिच्छामात्रम् कृतिश्च प्रवृत्तिरूपा[५] बोध्या तेन

---

१ आद्यक्षणवृत्तित्वविशिष्टस्य पाकादेरित्यर्थः।

२ यादृशस्य पुंसः कृतिसाध्यं यद्दृष्टं तादृशत्वज्ञानाभावादित्यर्थः।

३ नरकरूपबलवदनिष्टसाधनत्वज्ञानादित्यर्थः।

४ अनुत्पादनात्।

५ कृतिसाध्यताज्ञानमित्यत्र प्रवृत्तित्वेन कृतेः प्रवेश इत्यर्थः।

जीवनयोनियत्नसाध्ये प्राणपञ्चकसंचारे न प्रवृत्तिः इत्थं च प्रवर्तकत्वानुरोधाद्विधेरपीष्टसाधनत्वं[1] दिकमर्थः। इत्थंच विश्वजिताय जेत इत्यादौ यत्र फलं न श्रूयते तत्रापि स्वर्गः फलं कल्प्यते नन्वहरहः सन्ध्यामुपासीतेत्यादौ इष्टानुत्पत्तेः प्रवृत्तिः कथम्। नचार्थवादिकं ब्रह्मलोकादिप्रत्यवायाभावो वा फलमिति वाच्यम् तथासति काम्यत्वे नित्यत्वहान्यापत्तेः। कामनाभावे चाकरणापत्तेः।[2] इत्थं च यत्र फलश्रुतिस्तत्रार्थवादमात्रमिति चेन्न। ग्रहणश्राद्धादौ नित्यत्वनैमित्तिकत्वयोरिव नित्यत्वकाम्यत्वयोरप्यविरोधात् नच कामनाभावेऽकरणतापत्तिः त्रिकालस्तवपाठादाविव कामनासद्भावस्यैव कल्पनात् नतु वेदबोधितकार्यताज्ञानात्प्रवृत्तिरिति संभवति स्वेष्टसाधनत्वमज्ञाय तादृशकार्यताज्ञानसहस्रेणापि प्रवृत्तेरसंभवात्। यदपि पण्डापूर्वं फलमिति तदपि न कामनाभावेऽकरणतापत्तेस्तौल्यात् कामनाकल्पने त्वार्थवादिकं फलमेव रात्रिसत्रन्यायात्कल्प्यताम् अन्यथा प्रवृत्त्यनुपपत्तेः। तेनानुत्पत्तिं प्रत्यवायस्यान्ये मन्यन्ते। एवम् " सन्ध्यामुपासते ये तु सततं शंसितव्रताः। विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम् " एवम् " दद्यादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन् " इति प्रीत्यात्मकमेव फलमस्तु नच पितृप्रीतिः कथं फलं व्यधिकरणत्वादिति वाच्यम् गयाश्राद्धादाविवोद्देश्यत्वसंबन्धे[3]नैव फलजनकत्वस्य क्वचित्कल्पनात् अतएवोक्तं शास्त्रदर्शितं फलमनुष्ठानकर्तरीत्युत्सर्ग इति पितृणां मुक्तत्वे तु स्वस्य स्वर्गादिफलं यावत् नित्यनैमित्तिकानुष्ठानस्य सामान्यतः स्वर्गजनकत्वात् पण्डापूर्वार्थं प्रवृत्तिश्च न संभवति नहि तत्सुखं दुःखाभाववत्स्वतः पुरुषार्थः न वा तत्साधनम्। प्रत्यवायानुत्पत्तौ कथं प्रवृत्तिरिति चेत् इत्थम् यथा हि नित्ये कृते प्रत्य-

१ प्रवृत्तिं प्रतीष्टसाधनताधियो हेतुत्वे चेत्यर्थः।

२ प्रत्यवायानुत्पत्त्यापत्तेरित्यर्थः।

३ उद्देश्यत्वं सप्तम्यर्थः।

वायाभावस्तिष्ठति तदभावे तदभावः। एवं प्रत्यवायाभावसत्त्वे दुःखप्रागभावसत्त्वं तदभावे तदभाव इति योगक्षेमसाधारणकारणताया दुःखप्रागभावं प्रत्यपि सुवचत्वात्। एवमेव प्रायश्चित्तस्यापि दुःखप्रागभावहेतुत्वमिति। ननु न कलञ्जं भक्षयेदित्यत्र विध्यर्थे कथं नञर्थान्वयः इष्टसाधनत्वाभावस्य कृतिसाध्यत्वाभावस्य च बोधयितुमशक्यत्वादिति चेन्न। तत्र बाधादिष्टसाधनत्वं कृतिसाध्यत्वं च न विध्यर्थः किंतु बलवदनिष्टाननुबन्धित्वमात्रं तदभावश्च नञा बोध्यते। अथवा बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वे सति कृतिसाध्यत्वं विध्यर्थः तदभावश्च नञा बोध्यमानो विशिष्टाभावो विशेष्यवति विशेषणाभावे विश्राम्यति ननु श्येनेनाभिचरन् यजेतेत्यादौ कथं बलवदनिष्टाननुबन्धित्वमर्थः। श्येनस्य मरणानुकूलव्यापारस्य हिंसात्वेन नरकसाधनत्वात् नच वैधत्वान्न निषेध इति वाच्यम् अभिचारे प्रायश्चित्तोपदेशात् नच मरणानुकूलव्यापारमात्रं यदि हिंसा तदा खड्गकारस्य कूपकर्तुश्च हिंसकत्वापत्तिर्गरलमिश्रान्नभक्षणजन्यमरणे आत्मवधत्वापत्तिश्चेति वाच्यम्। मरणोद्देश्यकत्वस्यापि विशेषणत्वात् अन्योद्देश्यकक्षिप्तनाराचहतब्राह्मणस्य तु वाचनिकं प्रायश्चित्तमिति चेन्न। श्येनवारणायादृष्टाद्वारकत्वेन विशेषणात् अतएव काशीमरणार्थं कृतशिवपूजनादेरपि न हिंसात्वम्। नच साक्षान्मरणजनकस्यैव हिंसात्वं श्येनस्तु न तथा किन्तु तज्जन्यापूर्वमिति वाच्यम् खड्गघातेन ब्राह्मणे व्रणपाकपरम्परया मृते हिंसात्वानापत्तेः।

---

१ प्रत्यवायप्रागभाव इत्यर्थः।

२ संध्यावन्दनादिनित्याभावे।

३ प्रत्यवायाभावस्याभावः।

४ अप्राप्तस्य प्राप्तिर्योगः।

५ सिद्धस्य संरक्षणं क्षेमः।

६ श्येनस्यादृष्टाद्वारैव वैरिमरणसाधनत्वाद्धिंसेति भावः।

७ अदृष्टाद्वारकत्वविशेषणादेवेत्यर्थः।

केचित्तु श्येनस्य हिंसाफलं नतु मरणं तेन श्येनजन्यखड्गाभिघातादिरूपा हिंसाऽभिचारपदार्थस्तस्य पापजनकत्वम् अतः श्येनस्य वैधत्वात्पापाजनकत्वेपि अग्रिमपापं प्रतिसंधाय सन्तो न प्रवर्तन्ते इत्याहुः । आचार्यास्तु आप्ताभिप्रायो विध्यर्थः । पाकं कुर्या इत्यादावाज्ञादिरूपेच्छावाचित्ववत् लिङ्मात्रस्येच्छावाचित्वं लाघवात् एवंच स्वर्गकामो यजेतेत्यादौ यागस्वर्गकामकृतिसाध्यतया आप्तेष्ट इत्यर्थः । ततश्चाप्तेष्टत्वेनेष्टसाधनत्वादिकमनुमाय प्रवर्तते कलञ्जभक्षणे तदभावान्न प्रवर्तते यस्तु वेदे पौरुषेयत्वं नाभ्युपैति तं प्रति विधिरेव तावद्गर्भ इव श्रुतिकुमार्याः पुंयोगे मानम् नच कर्त्रस्मरणं बाधकम् । कपिलकणादादिभिरद्यपर्यन्तं कर्तृस्मरणस्यैव प्रतीयमानत्वात् अन्यथा स्मृतीनामप्यकर्तृकत्वापत्तेः तत्रैव कर्तृस्मरणमस्तीति चेद्वेदेपि "छन्दांसि जज्ञिरे तस्मा" दित्यादिकर्तृस्मरणमस्त्येव एवं प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते इत्यपि द्रष्टव्यम् "स्वयंभूरेष भगवान् वेदो गीतस्त्वया पुरा । शिवादिऋषिपर्यन्ता स्मर्तारोस्य न कारकाः" इति तु वेदस्य स्तुतिमात्रम् नच पौरुषेयत्वे भ्रमादिसंभवादप्रामाण्यं स्यादिति वाच्यम् नित्यसर्वज्ञप्रणीतत्वेन निर्दोषत्वात् अतएव पुरुषान्तरस्य भ्रमादिसंभवान्न कपिलादेरपि कर्तृत्वं वेदस्य किंच वर्णानामेवानित्यत्वस्य वक्ष्यमाणत्वात्सुतरां तत्सन्दर्भस्य वेदस्यानित्यत्वमिति सङ्क्षेपः ॥ १५० ॥

---

१ साक्षान्मरणफलको व्यापारः फलमित्यर्थः ।

२ खड्गाभिघातादेः ।

३ बलवदनिष्टाननुबन्धीष्टसाधनत्वाद्यपेक्षयेच्छात्वेन विधिशक्तौ लाघवादित्यर्थः ।

४ आप्तेष्टत्वाभावे तद्धेतुकेष्टसाधनत्वज्ञाना भावात् ।

५ कर्तुः वेदकर्तुः, अस्मरणं स्मृतिभिरबोधनं तथाच वेदो पौरुषेयः अस्मर्यमाणकर्तृकत्वादित्यनुमानं बाधकमित्यर्थः ।

६ पुरुषस्य भ्रमप्रमादादिदोषसंभवादित्यर्थः ।

७ भ्रमादिशून्यत्वात् ।

८ तन्निष्ठानुपूर्वीविशेषस्येत्यर्थः ।

उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् ।
निवृत्तिस्तु भवेद्द्वेषाद्द्विष्टसाधनताधियः ॥१५१॥

उपादानस्य समवायिकारणस्याध्यक्षम् प्रत्यक्षं प्रवृत्तौ कारणमिति निवृत्तिरिति द्विष्टसाधनताज्ञानस्य निवृत्तिं प्रति जनकत्वमन्वयव्यतिरेकाभ्यामवधारितमिति भावः ॥ १५१ ॥

यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत् ।
शरीरे प्राणसञ्चारे कारणं तत्प्रकीर्तितम् ॥ १५२॥

जीवनयोनियत्नो यावज्जीवमनुवर्तते सचातीन्द्रियः तत्र प्रमाणमाह शरीर इति । प्राणसंचारो हि प्रयत्नसाध्यः इत्थं च प्राणसंचारस्य सर्वस्य यत्नसाध्यत्वानुमानात् प्रत्यक्षप्रयत्नबाधाच्चातीन्द्रिययत्नसिद्धिः । स एव जीवनयोनिर्यत्नः ॥ १५२ ॥

Indira Gandhi National Centre for the Arts

गुरुत्वं निरूपयति ।

अतीन्द्रियं गुरुत्वं स्यात्पृथिव्यादिद्वये तु तत् ।
अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ॥
॥ १५३ ॥

अनित्ये द्व्यणुकादौ तद्गुरुत्वमनित्यं नित्ये परमाणौ नित्यं गुरुत्वमित्यनुवर्तते ॥ १५३ ॥

तदेव समवायि स्यात्पतनाख्ये तु कर्मणि ।

तद्गुरुत्वम् असमवायि असमवायिकारणम् पतनाख्ये इति । आद्यपतने इत्यर्थः ॥

द्रवत्वं निरूपयति ।

सांसिद्धिकं द्रवत्वं स्यान्नैमित्तिकमथापरम् १५४
सांसिद्धिकं तु सलिले द्वितीयं क्षितितेजसोः ।

परमाणौ जले नित्यमन्यत्रानित्यमिष्यते॥१५५॥

द्रवत्वं द्विविधं सांसिद्धिकं नैमित्तिकं चेत्यर्थः । द्वितीयं नैमित्तिकम् । परमाणाविति । जलपरमाणौ द्रवत्वं नित्यमित्यर्थः । अन्यत्र पृथिवीपरमाण्वादौ जलद्व्यणुकादौ च द्रवत्वमनित्यम् कुत्रचित् तेजसि कुत्रचित् पृथिव्यां च नैमित्तिकं द्रवत्वम् ॥ १५४ ॥ १५५ ॥

तत्र को वा नैमित्तिकार्थः तद्दर्शयति ।

नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु ।
द्रवत्वं स्पन्दने हेतुर्निमित्तं संग्रहे तु तत् ॥१५६॥

वह्नीति । अग्निसंयोगजन्यनैमित्तिकं द्रवत्वम् तच्च सुवर्णादिरूपे तेजसि घृतजतुप्रभृति पृथिव्यां च वर्तते इत्यर्थः द्रवत्वमिति हेतुरिति असमवायिकारणमित्यर्थः संग्रहे सक्तुकादिसंयोगविशेषे तद्द्रवत्वं स्नेहसहितमिति बोद्धव्यम् तेन द्रुतसुवर्णादीनान्न संग्रहः ॥ १५६ ॥

स्नेहं निरूपयति ।

स्नेहो जले स नित्योऽणावनित्योऽवयविन्यसौ ।
तैलान्तरे तत्प्रकर्षाद्दहनस्यानुकूलता ॥ १५७ ॥

जल इति । जल एवेत्यर्थः असौ स्नेहः ननु पृथिव्यामपि तैले स्नेह उपलभ्यते न चासौ जलीयस्तथा सति दहनप्रातिकूल्यप्रसङ्गात् अत आह तैलान्तर इति तत्प्रकर्षात् स्नेहप्रकर्षात् तैले उपलभ्यमानः स्नेहोपि जलीय एव तस्य प्रकृष्टत्वादग्नेरानुकूल्यम् अपकृष्टस्नेहं हि जलं वह्निं नाशयतीति भावः ॥ १५७ ॥

संस्कारं निरूपयति ।

संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने ।
मूर्तमात्रे तु वेगः स्यात्कर्मजो वेगजः क्वचित् १५८

वेगस्थितिस्थापकभावनाभेदात् संस्कारस्त्रिविध इत्यर्थः मूर्तमात्र इति कर्मजवेगजभेदाद्वेगोद्विविध इत्यर्थः शरीरादौ हि नोदनजनितेन कर्मणा वेगो जन्यते तेन च पूर्वकर्मनाशस्तत उत्तरकर्म एवमग्रेपि विनाच वेगं कर्मणः प्रतिबन्धकत्वात्पूर्वकर्मनाश उत्तरकर्मोत्पत्तिश्च न स्यात् यत्र च वेगवता कपालेन जनिते घटे वेगो जन्यते स वेगजो वेगः ॥ १५८ ॥

## स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि । अतीन्द्रियोऽसौ विज्ञेयः क्वचित्स्पन्देपि कारणम् ॥१५९॥

अतीन्द्रिय इति । आकृष्टशाखादीनां परित्यागे पुनर्गमनस्य स्थितिस्थापकसाध्यत्वात् केचिदिति । चतुर्षु क्षित्यादिषु स्थितिस्थापकं केचिन्मन्यन्ते तदप्रमाणमिति भावः असौ स्थितिस्थापकः क्वचिदाकृष्टशाखादौ ॥ १५९ ॥

Indira Gandhi National Centre for the Arts

## भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः । उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् १६०

तस्य संस्कारस्योपेक्षात्मकज्ञानात्संस्कारानुत्पत्तेरुपेक्षानात्मक इत्युक्तम् तत्संशयात्तस्यानुत्पत्तेर्निश्चय इत्युक्तं तेनोपेक्षान्यनिश्चयत्वेन संस्कारं प्रति हेतुतेति भावः ननु स्मरणं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुत्वं तेनोपेक्षादिस्थले न स्मरणम् इत्थं च संस्कारं प्रति ज्ञानत्वेनैव हेतुतास्त्विति चेन्न विनिगमनाविरहेणापि संस्कारं प्रति उपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात् किंचोपेक्षास्थले संस्कारकल्पनायाः गुरुत्वात्संस्कारं प्रति उपेक्षान्यत्वेन हेतुतायाः सिद्धत्वात् ॥ १६० ॥

---

१ पूर्वकर्मनाशानन्तरमित्यर्थः ।

२ वेगत्वं तु जातिविशेषः प्रत्यक्षसिद्धः ।

तत्र प्रमाणं दर्शयति ।

**स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते ।**

असौ संस्कारःयतः स्मरणं प्रत्यभिज्ञानं चजनयत्यतः संस्कारः कल्प्यते विना व्यपारं पूर्वानुभवस्य स्मरणादिजननासामर्थ्यात् स्वस्वव्यापारान्यतराभावे कारण त्वासंभवात् नच प्रत्यभिज्ञां प्रति तत्तत्संस्कारस्य हेतुत्वे प्रत्यभिज्ञायाः संस्कारजन्यत्वेन स्मृतित्वापत्तिरिति वाच्यम् अप्रयोज[1]कत्वात् परे त्वनुद्बुद्धसंस्कारात्प्रत्यभिज्ञानुदयादुद्बुद्धसंस्कारस्य हेतुत्वापेक्षया तत्तत्स्मरणस्यव प्रत्यभिज्ञां प्रति हेतुत्वं कल्प्यत इत्याहुः ॥

अदृष्टं निरूपयति ।

**धर्माधर्मावदृष्टं स्याद्धर्मः स्वर्गादिसाधनम् १६१**
**गङ्गास्नानादियागादिव्यापारः स तु कीर्तितः ।**

स्वर्गादिसकलसुखानां स्वर्गसाधनीभूतभूतशरीरादीनाञ्च साधनं धर्म इत्यर्थः।तत्र प्रमाणं दर्शयितुमाह यागादीति।यागादिव्यापारतया धर्मः कल्प्यते अन्यथा यागादीनां चिरविनष्टतया निर्व्यापारतया च कालान्तरभावि स्वर्गजनकत्वं न स्यात् । तदुक्तमाचार्यैः "चिरध्वस्तं[2] फलायालं न कर्मातिशयं विना" इति । ननु यागध्वंस एव व्यापारः स्यात् नच प्रतियोगितद्ध्वंसयोरेकत्राजनकत्वं सर्वत्र तथात्वे[3] मानाभावात् नच त्वन्मते फलानन्त्यं मन्मते चरमफलस्यापूर्वनाशकत्वान्न तथात्वमिति वाच्यम् कालविशेषस्य सहकारित्वादित्यत आह गङ्गास्नानेति । गङ्गास्नानस्य हि स्वर्गजनकत्वेऽनन्तानां जलसंयोगध्वंसानां व्यापारत्वमपेक्ष्यैकमपूर्वमेव कल्प्यते लाघवादिति भावः ॥

---

१ संस्कारजन्यत्वस्य स्मृतित्वे प्रयोजकत्वाभावादित्यर्थः ।

२ चिरकालनष्टकर्मातिशयमपूर्वं विना फलाय फलजननाय नालं न समर्थमित्यर्थः ।

३ ध्वंसप्रतियोगि नोरेकत्र जनकत्वाभावे ।

ननु ध्वंसोपि न व्यापारोस्तु नच निर्व्यापारस्य चिरध्वस्तस्य कथं कारणत्वमिति वाच्यम् अन्यथासिद्धनियतपूर्ववृत्तित्वस्य तत्रापि सत्त्वात् अव्यवहितपूर्ववृत्तित्वं [१] चक्षुःसंयोगादेः कारणत्वं नतु सर्वत्रकार्यकालवृत्तित्वमिव समवायिकारणस्य कारणत्वमित्यत आह ।

## कर्मनाशाजलस्पर्शादिना नाश्यस्त्वसौ मतः १६२

यदि हि अपूर्वन्न स्यात् तदा कर्मनाशाजलस्पर्शादिना नाश्यत्वं धर्मस्य न स्यात् नहि तेन यागादेर्नाशः प्रतिबन्धो वा कर्तुं शक्यते तस्य पूर्वमेव वृत्तत्वादिति भावः एतेन देवताप्रीतेरेव फलत्वमित्यपास्तम् गङ्गास्नानादौ सर्वत्र देवताप्रीतेरसंभवाच्च देवतायाश्चेतनत्वेऽपि तत्प्रीतेरनुद्देश्यत्वात् प्रीतेः सुखरूपत्वेन विष्णुप्रीत्यादौ तदसंभवात् जन्यसुखस्य तत्राभावात् तेन विष्णुप्रीतिजन्यत्वेन पराभिमतस्वर्गादिरेव विष्णुप्रीतिशब्देन लक्ष्यते॥ १६१ ॥ १६२ ॥

## अधर्मो नरकादीनां हेतुर्निन्दितकर्मजः ।

नरकादिसकलदुःखानां नारकीयशरीरादीनां च साधनमधर्म इत्यर्थः ॥

तत्र प्रमाणमाह ।

## प्रायश्चित्तादिनाश्योसौ जीवद्वृत्तीत्विमौ गुणौ ॥ १६३ ॥

यदि ह्यधर्मो न स्यात्तदा प्रायश्चित्तादिना नाश्यत्वं न स्यात् नहि तेन ब्रह्महननादीनां नाशः प्रतिबन्धो वा विधातुं शक्यते तस्य पूर्वमेव वृत्तत्वादिति भावः जीवेति । ईश्वरस्य धर्माधर्माभावादिति भावः ॥ १६३ ॥

## इमौ तु वासनाजन्यौ ज्ञानादपि विनश्यतः ।

इमौ धर्माधर्मौ अतो ज्ञानिना कृते अपि सुकृतदुष्कृतकर्मणी न फला-

१ उत्पन्नत्वाद्विनष्टत्वाच्चेत्यर्थः ।

यालमिति भावः ज्ञानादपीत्यपिना भोगपरिग्रहः ननु तत्त्वज्ञानस्य कथं धर्माधर्मनाशकत्वम् "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपी" ति वचनविरोधात् इत्थंच तत्त्वज्ञानिनं झटिति कायव्यूहेन सकलकर्मणां भोगेन क्षय इति चेन्न तत्र भोगस्य वेदबोधितनाशकोपलक्षकत्वात् कथमन्यथा प्रायश्चित्तादिना कर्मणां नाशः तदुक्तम् " ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे " इति ननु तत्त्वज्ञानिनस्तर्हि शरीरावस्थानं सुखदुःखादिकं च न स्यात् ज्ञानेन सर्वेषां कर्मणां नाशादिति चेन्न । प्रारब्धेतरकर्मणामेव नाशात् तत्तच्छरीरभोगजनकं हि यत्कर्म तत्प्रारब्धं तदभिप्रायमेव नाभुक्तमिति वचनमिति ॥

शब्दं निरूपयति ।

**शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः १६४**
**कण्ठसंयोगादिजन्या वर्णास्ते काद्यो मताः ।**
**सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते।१६५**

नभोवृत्तिः आकाशसमवेतः दूरस्थशब्दस्याग्रहणादाह श्रोत्रेति ॥ १६४ ॥ १६५ ॥

ननु मृदङ्गाद्यवच्छेदेनोत्पन्ने शब्दे श्रोत्रे कथमुत्पत्तिरत आह ।

**वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता ।**

आद्यशब्देन बहिर्दशदिगवच्छिन्नोन्यः शब्दस्तेनैव शब्देन जन्यते तेन चापरस्तद्व्यापकः एवंक्रमेण श्रोत्रोत्पन्नो गृह्यते इति ॥

---

१ कर्मणां भोगैकनाश्यत्वेचेत्यर्थः ।
२ उपलक्षकत्वाभावे ।
३ सर्वकर्मजन्यादृष्टानीत्यर्थः ।
४ नाशयति ।
५ प्रारब्धकर्माभिप्रायमेव ।
६ प्रथमशब्देन ।

कदम्बकोरकन्यायादुत्पत्तिः कस्यचिन्मते १६६

अन्त्यशब्दाद्दशं दिक्षु दश शब्दा उत्पद्यन्ते तैश्चान्ये दश शब्दा उत्पाद्यन्ते इतिभावः अस्मिन् मते कल्पनागौरवादुक्तं कस्यचिन्मत इति ॥१६६॥

ननु शब्दस्य नित्यत्वादुत्पत्तिकथनमसङ्गत मत आह ।

उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता।

शब्दानामुत्पादविनाशप्रत्ययशालित्वादनित्यत्वमित्यर्थः ॥

ननु स एवायं ककार इत्यादिप्रत्यभिज्ञानाच्छब्दानां नित्यत्वम् इत्थं चोत्पादविनाशबुद्धेर्भ्रमरूपैवेत्यत आह ।

सोऽयं क इति बुद्धिस्तु साजात्यमवलम्बते १६७

साजात्यमिति । तत्र प्रत्यभिज्ञानस्य तत्सजातीयत्वं विषयो नतु तद्व्यक्त्यभेदो विषयः उक्तप्रतीतिविरोधात् इत्थं च द्वयोरपि प्रतीत्योरभ्रमत्वमिति ॥ १६७ ॥

ननु सजातीये सोयमिति प्रत्यभिज्ञा कुत्र दृष्टेत्यत आह ।

तदेवौषधमित्यादौ सजातीयेपि दर्शनात्।

तस्मादनित्या एवेति वर्णाः सर्वे मतं हि नः १६८

इति श्रीविश्वनाथपञ्चाननकृता कारिकावली समाप्ता।

यदौषधमन्येन कृतं तदौषधं मयापि कृतमित्यादिदर्शनादिति भावः १६८

इति श्रीमहामहोपाध्यायविद्यानिवासभट्टाचार्य-
पुत्रश्रीयुतविश्वनाथपञ्चाननभट्टाचार्य-
विरचितः सिद्धान्तमुक्तावली-
समेतो भाषापरिच्छेदः
समाप्तः ।

---

१ दशशब्दानां तत्प्रागभावानां तद्धेतुहेतुमद्भावानां च कल्पने गौरवादित्यर्थः। २ उत्पादविनाशशालिप्रत्ययविरोधादित्यर्थः। ३ उत्पादप्रतीतिप्रत्यभिज्ञानयोः

श्रीः ।

# अथ न्यायमुक्तावल्याः शुद्धिपत्रम् ।

| पृ० | पं० | अशुद्धम्. | शुद्धम्. |
|---|---|---|---|
| २ | ७ | वेदाः प्रामाण्यम् | वेदाप्रामाण्यम् |
| ६ | ९ | व्यत्तयोः | व्यक्त्योः |
| ७ | १५ | नाप्यन्ताभावो | नाप्यत्यन्ता० |
| ८ | ८ | मत्त्वंमिति | मत्त्वमिति |
| १० | २ | संयोगे | संयोगस्य |
| १२ | १८ | पञ्चष्वन्यथा | पञ्चस्वन्यथा |
| १६ | २२ | घदादौ | घटादौ |
| १७ | २० | संख्यादि | संख्याद्याः |
| १८ | १६ | वदद्वृत्ति | वद्वृत्ति |
| २० | ८ | द्यणुकादेः | द्व्यणुकादेः |
| २२ | ३ | चेष्टाद्वृत्ति | चेष्टावद्वृत्ति |
| २२ | १० | गन्धादि | गन्धाभि |
| २३ | १० | वदूवृत्ति | वद्वृत्ति |
| २३ | २४ | जलनीलमिति | जले नीलमिति |
| ३१ | १२ | च्छिदा | छिदा |
| ३१ | २१ | शरीरसंस्कार | शरीरे संस्का० |
| ३१ | २१ | उत्पाद्यत | उत्पद्यत |
| ३२ | ४ | मेवोब्दो | मेवोद्बोधकं |
| ३२ | २२ | विज्ञानहेतुत्वात् | विज्ञाने हेतु० |
| ३३ | ६ | चेन्न | चेत् |
| ३३ | १५ | गौरवात् | गौरवाच्च |
| ४५ | १६ | व्याहन्येत | व्याहन्येतेति |
| ४६ | १२ | संसगाभाव | संसर्गाभाव |
| ६ | १३ | अतस्तम्भादौ | अतःस्तम्भादौ |
| ६ | २५ | सङ्गत इत्य० | सङ्गतमित्य० |
| ९ | २३ | अभविन | अभावेन |
| १ | २० | स्तद्वृत्तित्वं | स्तदऽवृत्तित्वं |
|  | २४ | कारणभावः | कारणभावग्रहः |
| ५३ | २० | संयाग | संयोग |
| ५४ | ६-७ | विशिष्टसत्ता वान्जातेरित्यादौजात्य धिकरणगुणादे | इदं त्याज्यम् |
| ५६ | २४ | विशिष्टसत्त्वेपि | विशिष्टत्वेपि |
| ५७ | ८ | ज्ञायता | जायता |
| ५७ | २५ | निश्चयेन | निश्चयत्वेन |
| ५८ | २१ | नानुमिति | अनुमिति |
| ६० | १६ | मतस्याःभावः | मतस्याभावः |
| ६० | १८ | हेतोअभावे | हेतोरभावे |
| ६० | २३ | हेतुताज्ञाना | हेतुज्ञाना |
| ६१ | १३ | पक्षहेतु | पक्षे हेतु |
| ६१ | २४ | सत्त्वे न | सत्त्वेन |
| ६२ | ९ | यस्तूभस्मा | यस्तूभयस्मा |
| ६३ | १० | धूमाधिकं | धूमादिकं |
| ६३ | २० | स्वाधिषयक | स्वाविषयक |
| ६३ | २० | भावाधर्मान्त | भावाद्धर्मान्त |
| ६६ | ३ | कर्मत्वादित्य | कर्मत्वादीत्य |
| ६८ | १३ | शक्तिर्विश्रा | शक्तिर्जात्याकृतिविशिष्टव्यक्तौ विश्रा० |
| ६८ | १९ | कर्तृत्वरूप | कर्तृरूप |
| ७१ | १७ | नीलपटयो | नीलघटयो |
| ७२ | १६ | समासेन | समासे न |
| ७२ | २६ | विशेष्यकोअ | विशेष्यकोऽन्व० |
| ७३ | २ | आसांत्तज्ञा | आसत्तिज्ञा |
| ७७ | ६ | रासनादीनां | रासनादीनाम् |
| ७८ | २ | कारणतया | कारणताया |
| ७८ | १९ | विभागान्ताः | विभागान्ता। |

IGNCA RAR
ACC. No.



| पृ० | पं० | अशुद्धम्. | शुद्धम्. |
|---|---|---|---|
| ७९ | २ | वृत्तिपदम्– | वृत्ति यदम् |
| ७९ | ४ | विभाश्च– | विभागश्च |
| ७९ | ४ | द्वित्वा दिका– | द्वित्वादिका |
| ७९ | ७ | चतुष्ट्वादिक– | चतुष्ट्वादिकं |
| ८० | ७ | भावना– | भावनाः |
| ८१ | ४ | पृथक्त्वं स्नेह– | पृथक्त्वस्नेह |
| ८१ | ६ | निमित्तत्वंउष्ण- | निमित्तत्वमु. |
| ८१ | १५ | संयोगादिद्वये– | संयोगादिद्वयं |
| ८१ | २५ | दैशिके०– | अव्याप्यवृत्ति-रित्यस्य दैशिके० |
| ८५ | ४ | मापौधिक– | मौपाधिक |
| ८८ | १५ | संख्या विधी– | संख्याभिधी |
| ८८ | २३ | भावे नाभेदा– | भावेनाभेदा |
| ९२ | १२ | संयोगानाशात्– | संयोगना० |
| ९३ | १० | रूपेण– | रूपे |
| ९७ | ८ | प्रकरा– | प्रकारा |
| ९८ | ४ | भवत्– | भवेत् |
| ९८ | ७ | प्रमाज्ञान– | प्रमा ज्ञान |
| ९८ | ११ | च्छङ्केन– | च्छङ्के न |
| १०० | १५ | ज्ञानवेत्ति– | ज्ञानवित्ति |
| १०४ | २३ | स्फूर्तीवि– | स्फूर्तावि |
| १०५ | २१ | बोध– | बोधं |
| १०६ | ९ | केवलान्वयि– | केवलान्वयी |
| १०८ | ८ | च्छाब्द– | च्छब्द |
| १०९ | २ | पुरुषार्थः– | स्वतःपुरुषार्थः |
| १११ | २ | बलवनिष्ठा– | बलवदनिष्ठा |
| १११ | २० | नारक– | नरक |
| ११२ | ७ | करणापत्तेः– | करणापत्तेश्च. |
| ११५ | १९ | तदेवसम– | तदेवासम |
| ११८ | ९ | स्मरणस्यव– | स्मरणस्यैव |
| ११८ | १३ | साधनीभूतभूत– | साधनीभूत |
| ११८ | १८ | तद्धंसयो– | तद्ध्वंसयो |

KALANIDHI
Rare Book Collection
ACC No.: R 500
IGNCA Date: 21-3-08

## हारीतसंहिता–(वैद्यकग्रन्थ)

(मूल संस्कृत और भाषाटीकासहित)

समस्त महाशयोंको विदित करनेमें आताहै कि,–"हारीतसंहिता" नामक वैद्यक ग्रन्थ सरल हिन्दीभाषानुवाद बनवाकर और शास्त्रियों द्वारा शुद्ध करवाकर सुन्दर मध्यमअक्षरोंमें छपाकर विक्रयार्थ प्रस्तुत है,–लीजिये तो यह ग्रन्थ बहोतही उपकारक और स्वल्पहोकरभी सर्ववैद्योंको सबतरहके औषधज्ञान तथा रोगोंकी चिकित्सा करनेमें अप्रतिम साह्य होगा इस्में कुछ संदेह नहींहै इसवास्ते वैद्य महाशयजी ! अभी ज्यादा लिखना बाहुल्यमात्रहै, तथापि इस अपूर्व ग्रन्थको अवश्य संग्रहमें रखकर रोगनिवारणद्वारा निर्मलकीर्तिको प्राप्त करेंगे. इस ग्रन्थका मूल्य केवल ३ रु.

## शार्ङ्गधरसंहिता (भाषाटीकासह)

यह टीका आढमल्ली और गूढार्थप्रकाशिका जो इस्की संस्कृतटीका है उनके अनुसार भाषाटीका करीगई है यद्यपि इसग्रंथकी टीका कईभिषग्वरोंने कीहै परन्तु इस रीतिसे विस्तारपूर्वक किसीने नहींकीहै तिसपरभी मूल्य केवल (तीन मुद्रा) ३ रु० रक्खाहै विलायतीकपडेकी जिल्दसहित ये नया छपाहै।

पुस्तकें मिलनेका ठिकाना—

गंगाविष्णु श्रीकृष्णद

"लक्ष्मीवेङ्कटेश्वर" छाप

कल्याण—


क्त-
बा०
रूप
लघटयो
ासे न
-विशेष्यकोऽन्व०
-आसत्तिज्ञा
-रासनादीनाम्
कारणताया
-विभागान्ता

Indira Gandhi National
Centre for the Arts